तारका ॥ अधमाचोदितेसूर्येप्रातःसंध्यात्रिधास्मृता ॥ स्मृत्यंतरेविशेषपू
र्वसंध्याजपंस्तिष्ठेदुपासीनश्चमध्यमां ॥ नचोत्तरांव्याहरेत् ॥ विरमेदाकृ
वन ॥ ॥ अथगायत्रीजपविधिः ॥ ॥ योगी ॥ ॐकारंपूर्वमुच्चार्यभूर्भुव
स्तथैवच ॥ गायत्रींप्रणवंचांतेजपोह्येवमुदाहृतः ॥ अतःप्रणवमोचा
ते ॥ कात्यायनः ॥ देवस्यवदनंप्रोक्तंगायत्रीपदापरत्तिस्त्रभिःप्रण
वाभिर्महाव्याहृतिभिः ॥ सह ॥ [illegible] चित्रं [illegible] मेनत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यम्ी।।त्रिवर्णमथमोंकारंभूर्भुवस्स्वरितित्रयः।।पादत्रयंचसावित्र्या भट्टी॰
ावेदाअदूदुहन्।।एतदक्षरमेतांचजपन्व्याहृतिपूर्वकं।।संध्यायोरभ
वेद्विप्रोवेदपुण्येनयुज्यते।।गायत्रीयनुज्ञानान्तिवृथातस्यपरिश्रमः।।च
श्वतुरोवेदागायत्रीचैकतःसमा।।[illegible]नापि।।एतेश्चतुरोवेदाःसांगपा
सपदक्रमाः।।एकतश्चैवगायत्रीतुलयेरूपानुसास्मनो।।सर्वेषामेवपा क
नांपरेरसमुपस्थिते।।दशसाहस्रिकाभ्यासागायत्र्याःशोधनंपरं।।
पानानघः।।ब्रह्मचारीगृहस्थश्चशतमष्टोत्तरंजपेत्।।वानप्रस्थोयति
श्चैवसहस्रादधिकंजपेत्।।मनुः।।मध्यमानामिकामध्यपर्वद्वितययुक्तस्ति
तं।।मेरुप्रदक्षिणीकुर्वन्ननामीमूलपर्वतः।।आरभ्यमध्यमामूलेपर्वांतं ॐ॰
गणयेत्क्रमात्।।अंगुलीनिविघुलीन्नकिंचिदाकुंचितेतले।।अंगुलीनां
वियोगात्तुछिद्रेषुश्रवतेजपः।।गणनाविधिमुल्लंघ्ययोजपेत्तत्तपंयतः।। नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गण्हं तिरात्क्षसात्ले न गणयेत्सर्वथा द्विजः ॥ अंगुष्ठं मोक्षदं विद्यात्तर्जनी श
त्रुनाशनी ॥ मध्यमा धनदा ह्यो लिकरा सेषांजनामिका ॥ कनिष्ठा रक्षणी प्रोक्ता
जपकर्मणि शोभनं ॥ ॥ इति गायत्रीजपविधिः ॥ ॥ अथ जपस्थानं ॥ ॥
गृहे जपं समं विद्याद्गोष्ठे शतगुणं तथा ॥ पुण्यारण्ये तथारामे सहस्रगुणितं विदुः ॥
अमितं पर्वते पुण्ये नद्यां लक्षमुदाहृतं ॥ कोटिर्देवालये प्राहुरनंतं शिवसंनि
धौ ॥ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य च ॥ विप्राणां च गवां चैव संनिधौ
शस्यते जपः ॥ अभ्यस्य मंत्रं मांत्रिसजपहोमस्तु रार्चनं ॥ जक्षय फलमाप्नोति श्रा
णो वचनं यथा ॥ [illegible]नात्के ॥ प्रातर्नाभौ करौ कृत्वा मध्यान्हे हृदि संस्थितौ ॥
पृजपस्तु नासाग्रे त्रिसंध्या जपलक्षणं ॥ [illegible] ॥ उत्तानं त्रियन्यूर्ध्वं नाभिहृ
सिकास्थितो ॥ प्रातर्मध्यान्हसायान्हेषु तादेवी कमार्जपेत् ॥ [illegible] ॥
मध्यान्हे स्युक्ता गायत्री निरता सदा ॥ मनसा कर्मणा वाचा धर्मध्येयेवानुचिं
[illegible]कामममति मिच्छति तेन नराः स्वर्गगामिनः ॥ ॥ [illegible]नतिपृथनिपिनातिप
तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षांकत्वं कानन्त्नामुक्त्कंकत्वागा॥ आवृत्तः॥ अपु ५ पत्र करामुद्रं नक्ष ५ मजा गत्क
॥ अपरोचत्तकरोरुत्वाग्निरसाश्राच्तोपिच॥ चिंतामुक्तिर चिंतोपान्कुद्दोमंत्रा
कृधांग्निल॥ अनासनः त्सयानो रागछ्नुछिष्ट एवच॥ रथ्याग्रामाचरावृस्खा
नजपत्तिमिरांतरे॥ ड यानहृष्टप्रारोच पालशाप्याग लेरत्तथा॥ प्रसार्यत्तजपेद्या
कुरुयुत्सनएवचः॥ १ लिता नाम संजानां दर्शनेभाषणे श्रुते॥ क्षुते धौंवायुगु
निजंभणेजपमुत्सृजेत्॥ प्राप्तावाचम्य एतशेषाश्रयामं पुड्गु कं॥ कृतांसकृजप
छुपंयद्गु स्तर्यादि दर्शनं॥ माजारंकुकुटं कौचश्वानश्रूद्रखरं कपि॥ दृष्ट्वाचेम्य
मरेत्कर्मस्पृष्टास्नानंविधीयते॥ ॥ [redacted] ॥ पंचविंशतिसोक्षा
थींग्निंशाः ग्रिर्घसिद्धिदा॥ सर्वार्थः सप्तविंशात्या पंचद्वय्याभिचारकं॥ पंचत्रा
मि: काम्यकर्मसिद्धिस्याच्चतुरत्तरे॥ अष्टोत्तरशते स्वर्गसिद्धिरक्षःस्तत्ता 31
स्रजा॥ शंखमणः श्रीहांस्युस्फाटिकोरमोहक्षे नर॥ १ माक्षादुष्टिक्षलक्ष्मी राम

चरदाक्षमुक्तिमुक्तिदाः ॥ पुत्रंजीवभवाः पुत्रपशुधान्यसमृद्धिदाः ॥ रिद्रुमावृत्य
धनदाः सौभाग्यार्थश्रीमौक्तिकाः ॥ पापक्षयाः कुशमयाः कर्मदाः स्वर्णरौप्यादौ
जाप्रवालमुक्तस्फटिके जपकोटिफलप्रदः ॥ तुलसीमणिनायेन गणितं चाक्षयं
फलं ॥ अन्यान्यसमरूपाणि ना[illegible]लिरुक्षं लकराणि च ॥ लंतुभिन्नं विशीर्णानि
निनजीर्णानि नवानि च ॥ ॥ गव्यैस्तु पंचभिः स्नानि संप्रक्षाल्य प्रथक् प्रथक्मंत
कृतं कृपुण्यास्त्रीनिर्मितं ग्रंथिवर्जितं ॥ त्रिगुणं त्रिगुणीकृत्य सम्यक्संप्रक्षा
विवृतं ॥ मणिमेकैकमादाय तत्तन्मंत्रं तु योजयेत् ॥ मुखं मुखेन तु संयोज्य पुष्ट
तु योजयेत् ॥ पुच्छं जपमालास्तु कारयेज्जपकर्मणि ॥ एकैकं मणिं बंधयेत्तु
एवं धंग्रन्थयेत् ॥ स्वयमाग्रथितामालां नाशकस्यापि श्रियं हरेत् ॥ गुरु
प्रकुर्वीत स्त्रियाहरेत् तथैव च ॥ गुरुसंपूज्य ते तु रत्नाग्रणीयात् सर्वसिद्धये
मध्यमायामक्षमालां ज्येष्ठेनावर्तयेत् क्रमात् ॥ भुक्तिमुक्तिःप्रदः सा यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ागणनक्रमः॥ जपसाक्षमालांसकृज्जांभ्रामयेदाक्षिरत्वामणिं॥ ब्रुपुनर्मूलं भुटी०
र॥ यज जपं कुर्यात्स्कनिश्चलं॥ जपस्यांते च तामालां शज यित्वा च गोमयेत्॥
पुनीजपसंख्यानमेरुमेकंगुणंभवेत्॥ रत्नायाष्टगुणं विद्यात्सुवर्णजीवेद्द
धिकं॥ शतं स्याच्छखमणिभिः प्रवालैस्तत्सहस्रकं॥ स्फटिकैर्दशसाहस्रे
केश्चैर्लक्षमुच्यते॥ पद्माक्षैर्दशलक्षंतु सुवर्णकोटिरुच्यते॥ कुशग्रंथ्याच
निक्षेरनंतफलमश्नुते॥ स्वेतपद्माक्षमालाभिर्जपस्यत्सुमितंफलं॥ न त्रांगु
लिजपं कुर्यात्सांगुष्ठांगुलिभिर्जपेत्॥ अंगुष्ठेन जपेज्जाप्यमन्यैरंगुलिभिः
सह॥ अंगुष्ठेन विना जाप्यं कृतंमप्यफलंभवेत्॥ ॥ अथ न संस्कारविधिक २२
तोर्द्धशाङ्गुणाज्जपकृतुरदीरितिः॥ उपांशुस्त्तछतगुणः सहस्रो मानसस्तथा॥
न दोषो मानसोजाप्ये सर्वदेशोपि सर्वदा॥ स्तछतगुणः सहस्रो मानसस्त
था॥ न दोषो मानसोजाप्ये सर्वदेशोऽपांशुः सर्वदा॥ स्तछतगुणः सांहस्रो राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानसस्तथा ॥ न दोषो मानसो ज्ञाप्यस्तर्वदेवेषु पांशुनिर्जनकैर्वौकगोरः ॥ शि च
च्छिद्रो जपः ॥ उक्तसंख्याजपं कुर्यान्मानसोपांशुवाचिकैः ॥ संख्याप्रतेर्निजं द्रव्ये
जुहुयात्तद्दशांशतः ॥ ततो होमदशांशं तु तर्पणं तु समाचरेत् ॥ स्वाभिषेकार्पे
मर्षैश्च पूर्ववत्तद्दशांशतः ॥ तर्पणं तु समाचरेत् ॥ स्वाभिषेकाद्यमर्षैश्च पूर्ववत्त
द्दशांशतः ॥ तद्दते महतीं पूजां कुर्याद्ब्राह्मणभोजनं ॥ इत्थं पुरश्चरणतः प्रसन्ना
देवी भवेत् ॥ ग्रहणे सूर्यस्य चंद्रस्य वा ऋक्षिः शुचिर्मुपोषितः ॥ नद्यां समुद्रगामिन्यां नाभि
तोये जलेस्थितः ॥ ग्रहणान्मोक्षपर्यंतं जपन्मंत्रं समाहितः ॥ ॥ अथ न्यासः ॥
...नन्यासादि ॥ प्रणवस्य प्रजापतिऋषिः परब्रह्मदेवता ॥ देवीगायत्री छंदः ॥
...प्राणायामे विनियोगः ॥ व्याहृतीनां सप्तानां विश्वामित्रजमदग्निभरद्वाजगौ
...तमात्रिवसिष्ठकश्यपा ऋषयः ॥ गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रि
ष्टुब्जगत्यश्छंदांसि अग्निवायुसूर्यबृहस्पतीवरुणेंद्रविश्वेदेवा देवताः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्य ॥ प्रजापतिऋषिः ॥ ब्रह्माग्निर्वायुसूर्यो देवता ॥ प्राणायामे विनियोगः ॥
नं॰ ॐ भुवः॰ ॐ स्वः॰ ॐ महः॰ ॐ जनः॰ ॐ तपः॰ ॐ सत्यं ॥ ॐ तत्सवितुर्वरे
र्भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ॐ आपो ज्योती रसोमृतं ब्र
ह्मभूर्भुवःस्वरों ॥ ॐ पातहरितधायद्धारापरमेष्ठ्यसीत्यर्थं प्रातःसंध्यामुपा
सिषे ॥ आपोहिष्ठेति त्रचस्य सिंधुद्वीपऋषिः ॥ आपो देवता गायत्री छंदः ॥
मार्जने विनियोगः ॥ ऋचा तत्त्वेन प्रतिपादं प्रतिप्रणवपूर्वकं नवकारं शिरसि मा
र्जनं कुर्यात् ॥ सूर्यश्चेति मंत्रस्य याज्ञवल्क्योपनिषद् ऋषिः ॥ सूर्यमन्युम
न्युपतयो देवता ॥ प्रकृती छंदः प्रातःसंध्या आचमने विनियोगः ॥ ॐ सूर
र्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां यद्रात्रिया पा ३३
पमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुं
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरुणं प्रलुयत्किंच दुरितं मयि ॥ इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वा
हा ॥ इत्यपः पीत्वा द्विराचम्य ॥ गायत्र्या जलमभिमंत्र्य ॥ आपो हि ष्ठेति नव च ऋ
चे स्याम्बरीषः सिंधुद्वीप ऋषी आपो देवता देवी गायत्री छंदः ॥ पंचमी वर्द्ध
माना सप्तमी प्रतिष्ठा अंते द्वे अनुष्टुभौ मार्जने विनियोगः ॥ आपो हि ष्ठा मयो
भुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ यो वः शिवतमो रसः ॥ तस्य भा
जयतेह नः ॥ उशतीरिव मातरः ॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ ॥ आ
पो जनयथा च नः ॥ शं नो देवीरभिष्टय आपो भवंतु पीतये ॥ शं योरभिस्रवंतु नः ॥
ईशाना वार्याणां क्षयंतीश्चर्षणी ~~[illegible]~~ नां ॥ अपो याचामि भेषजं ॥ अप्सु मे सोमो
अब्रवीदंतर्विश्वानि भेषजा ॥ अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥ आ
पः पृणीत भेषजं वरूथं तन्वे मम ॥ ज्योक्च सूर्यं दृशे ॥ इदमापः प्रवहत यत्किं
च दुरितं मयि ॥ यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥ आपो अद्यान्वचारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसेन समगस्महि ॥ पयस्वानग्न आगहि तं मा संसृज वर्चसा ॥ स्रेसेषी
दपरसोदियानत कं चसस्तरषी ॥ वरेण्य ऋतूरहमा देवी रवसे हुवे ॥ केचिद्रुपद
मोर्जयंति ॥ द्रुपदेस्यस्य द्रुपद ऋषिः ॥ वरुणो देवता ॥ अनुष्टुप् छंदः ॥ मार्जने
नियोगः ॥ ॐ द्रुपदाहिवमुंचतु द्रुपदादिवेन्नमुमुचानाहि न्नैस्नातनतीमलादि
पूतंपवित्रेण एवाज्य आपः शुंधतु मायिनसः ॥ तररत्समंदीसादिभिश्च केचि
त ॥ तररत्समंदीतिचतुर्ऋचस्य अवत्सार ऋषिः ॥ सोमः पवमानो देवता ॥ गाय
त्री छंदः ॥ मार्जने विनियोगः ॥ तररत्समंदी धावतीत्यादि ॥ ऋतं च सत्यं चेत्य
स्य मंत्रस्य अघमर्षण ऋषिः ॥ भाववृत्तो देवता ॥ अनुष्टुप् छंदः ॥ अघमर्षणे
विनियोगः ॥ ॐ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ॥ ततो रात्र्यजायत ततः
समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्सरो अजायत ॥ अहोरात्राणि विद
धद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् ॥ दिवं च पृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः सकृदाचम्य

थिवीं चांतरिक्षमथो स्वः ॥ इति मंत्रेण करस्थजलं नासिकाग्रं नीत्वा वामभागे
त्यजेत् ॥ ततः सकृदाचम्य ॥ समस्तादि क्रिया ॥ प्राणायामं कृत्वा गायत्र्या त्रिवार
जप्त्वार्घ्यं दद्यात् ॥ आसावादित्यो ब्रह्मेति उदकं परितः क्षिप्त्वा प्रदक्षिणं परिक्रम्या
चमनं कुर्यात् ॥ तथा यस्मृतिः ॥ यस्प्रदक्षिणं कुर्वीत तेन पाप्मानं धुनोति ॥ आन
मा ॥ योगीश्चिरा ज्योत्स्नायोर्द्ध कोटी च मंदेहा नाम राक्षसाः ॥ कृतघ्ना दारुणाचाराः
सूर्यमिच्छंति खादितुं ॥ ततो देवगणाः सर्वे ऋषयश्च तपोधनाः ॥ उपासते
च संध्यां प्रक्षिपंत्युदकांजलीं ॥ दह्यंते तेन ते दैत्या वज्रीभूतेन वारिणा ॥ ॥
पयात्स्वोपसंहरणमंत्रं ॥ अस्त्रोपसंहरणमंत्रस्य वृहत्सायुज्याख्य ऋषिभार्ग
ऋषिः ॥ सूर्यो देवता ॥ दैवी गायत्री छंदः ॥ अस्त्रोपसंहरणे विनियोगः ॥
ब्रह्मने हृदयाय नमः ॥ भास्वत्यै शिरसे स्वाहा ॥ सूर्याय शिखायै वषट् ॥ ब्रह्म
कवचाय हुं ॥ विष्णुनेत्रत्रयाय वौषट् ॥ रुद्राय अस्त्राय फट् ॥ ॐ आचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योयावायव्यांयाचतुर्वर्ण्णतूायव्यायवायव्यांसपाभग्मानमाछाधि॥ ए तूर्या भट्टा॰
नमः॥ सर्वगास्सिपाग्मानमूछधिसौं सूर्यायतूनमः॥ सर्वगोस्तिपाग्मानमेछिं
॥ ऐं क्लीं सौं अंतमण्यः गारुविनकुर्मज्ञानेविश्मुसविने॥ जगसचित्रेरुत्तयेरु
त्रेभारुत्तेनमः॥ नारायणायसोहमर्क्कमेहज्योत्तिरर्क्कज्योत्तिरहंशिवात्मज्यो
त्तिरहंसर्वज्योत्तिरहंशिवः॥ ॥ इत्याचम्ययसतर्पणं॥ अथतर्पणं॥ प्रातःकाले
संध्यागायत्री विश्वामित्रऋषिः ब्रह्मादेवता त्रिष्टुप्छंदः॥ भूपुरुषंतर्पणमु
हंकरिष्ये॥ ॐ भूःपुरुषंतर्पयामि॥ ऋग्वेदंतर्पयामि॥ गायत्रीतर्पयामि॥ वेद
मातरंतर्पयामि॥ साहृतींतर्पयामि॥ संध्यांतर्पयामि॥ कुमारींतर्पं॥ उषसीं
तर्पं॥ निम्रुजींतर्पं॥ सर्वार्थसिद्धिकरींतर्पं॥ सर्वमंत्राधिपतेंतर्पं॥ ॐ भू 35
र्भुवस्वः पुरुषंतर्पयामि॥ शिखाबंधनं॥ ऊर्ध्वकेशी विरूपाक्षी मांसशो
णितभोजने तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते॥ इतिगायत्र्यांना
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

शिखां बध्नीयात्॥ ततो गायत्रीरूपं कुर्यात्॥ तत्रादावासनबंधः॥ ततो मंत्रः॥
उत्तिष्ठंतु ये भूता ये भूमौ तिष्ठंति भूपतेः॥ भूतानामविरोधेन ब्रह्मकर्म समा
रभे तु॥ इति मंत्रं पठेत्॥ पृथिवीति मंत्रस्य मेरुपृष्ठ ऋषिः॥ कूर्मो देवता॥
सुतलं छंदः॥ आसने विनियोगः॥ पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृ
ता॥ त्वं च धारय मां देवी पवित्रं कुरु चासनं॥ विघ्नहर्त्रास्यै नमः॥ मायाश्रास्यै
नमः॥ अंतरिक्षं रक्षोतारिलो अरातयः॥ ॐ भूर्भुवः स्वाहा॥ आत्मासनाय
नमः॥ इत्यासनं परिकल्प्य॥ ॥ अथ भूतशुद्धिः॥ अपक्रामंतु भूतानि पिशाचाः
सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे तु॥ अपसर्पंतु ये भू
ता ये भूता भूमिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ इति
तानुस्तार्य॥ सर्वभूतानिवारणाय शार्ङ्गयज्ञाताय अस्त्रराजाय स्फट्दरी
यहभूमिति॥ तालत्रयं दिग्बंधं॥ वामदिशमकारत्रयं कुर्यात्॥ इति करना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांगंलं क्रोधेन ॥ दुष्टभूतानि र्गच्छतां घत्वा ॥ वाम पाद तलेनास्ति मुष्ट्यरत्न ॥ भ दी०
राधातैर्भौमानस्थिताल्त्रयेणांतरिक्षगतानूअस्त्रनिगमद्दष्ट्या दिव्यानू ॥
तान्युत्सार्य महाभूतसंहारं कुर्यात् ॥ श्रीगुरुभ्यो नमः ॥ श्रीगुरुपादुकाभ्यां न
मः ॥ परमगुरुभ्यो ॥ परात्परगुरुपादुकाभ्यां नमः ॥ परमेष्ठीगुरुभ्यो नमः ॥
परमेष्टिगुरुपादुकाभ्यां नमः ॥ आचार्यगुरुपादुकाभ्यां नमः ॥ पूर्वसिद्धेभ्यः पा
दुकाभ्यां नमः ॥ [illegible] नमो महद्भ्यः ॥ मूलाधारस्थितं नीवं प्रदीपकलिकाकारं तेज
प्रैणवेन समारुह्य द्वादशांतं निवेदयेत् ॥ पादादिजानुपर्यंतं पृथिवीस्थां
नं पीतवर्णं चतुरस्रं चतुष्टयवज्रलांछितं कठिनं गंधरूपरसस्पर्शशब्दगुणं
ब्रह्माधिष्ठितं निरस्तिंकं नान्वितं सद्योजाताधिदैवतं ॥ लं बीजमध्यमेसंचिं
सल्लकारस्य प्रजापतिऋषिः ॥ देवी गायत्री छंदः ॥ इंद्रो देवता ॥ पृथिवीम
लशुध्यर्थे जपे विं० ॥ ॐ लं ॐ हूं फट् नमः ॥ इ[illegible]नचयानन[illegible]त्वा ॥ तदंतेष्ट

३६

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थिवीमंडलं अपमंडले संहारयामि नमः ॥ इति [illegible] ॥ जान्वादि नाभिप
र्यंतं आपस्थानं शुक्लवर्णं अर्द्धचंद्राकारं द्रवरूपं रसरूपस्पर्शशब्दगुणं विष्णु
धिष्ठितं वामदेवाधिदेवतं बीजं मध्यमं संचिंत्य ॥ वकारस्य गौतम ऋषिः ॥ त्रि
ष्टुप् छंदः ॥ वरुणो देवता ॥ उदकभूतशुध्यर्थे जपे विनियोगः ॥ ॐ वं [illegible] फट् ॥
इति चतुर्घातेन कलशोदके अपमंडलं वन्हिमंडले संहारयामि नमः ॥ इति संह
रेत् ॥ नाभ्यादि कंठपर्यंतं आग्नेयमंडलं रक्तवर्णं ॥ त्रिकोणं स्वस्तिकलांछितं ॥
ज्वलद्रूपस्पर्शशब्दगुणं रुद्राधिष्ठितं त्रिपाकंठोज्वलितं ॥ अघोराधिदेवतं बीजं
मध्यमं संचिंत्य रकारस्य कश्यप ऋषिः ॥ जगतीछंदः ॥ जातवेदाग्निर्देवता ॥ आग्ने
यभूतशुध्यर्थे जपे विनियोगः ॥ ॐ [illegible] हुं फट् ॥ इति त्रि[illegible] हुं घातेन कलशोदके वन्हिम
डलं वायुमंडले संहरामि नमः ॥ इति संहरेत् ॥ कंठादि भ्रूमंडलपर्यंतं वायु
मंडलं धूम्रवर्णं षट्कोणं षड्बिंदुलांछितं चलनस्पर्शशब्दगुणं ईश्वराधिष्ठि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शानं कृत्वान्वितं ॥ तत्पुरुषाधिदैवतं यबीजमध्यमसंचिंत्य यकारस्य कि — ग्रं.टी.
धरऋषिः ॥ बृहतीछंदः ॥ मरुतो देवता ॥ वायुभूतशुद्ध्यर्थे जपे विनियोगः ॥
यं ॐ हुं फट् इति धरुद्विघालनं कृत्वा वायुमंडलं आकाशमंडले संहरामि नमः
संहरेत् ॥ भ्रूमध्यादिमूर्द्धपर्यंतं व्योममंडलं धूम्रवर्णं घृताकारं ध्वजलांछि
तं सुखिरशब्दैकगुणं सदाशिवाधिष्ठितं साक्षतीतं कलान्वितं ईशानाधिदैवतं
हं बीजमध्यमसंचिंत्य हकारस्य ब्रह्मा ऋषिः देवीगायत्रीछंदः परमात्मा देवता ॥
आकाशभूतशुद्ध्यर्थे विनियोगः ॥ ॐ हं ॐ हुं फट् इति संहरेत् ॥ आकाशं पंच
तन्मात्राहंकारमहदात्मिकायां मातृकासंज्ञिके शब्दब्रह्मस्वरूपायां हृल्लेखा
र्थभूषणायां प्रकृतिरूपमायायां ॥ प्रविलापयामि तथाविधमायां च निःसृष्टशुद्ध — २०
बुद्धरक्तत्वभावस्वप्रकाशरूपे सत्यज्ञानानंतानंदलक्षणे परमकारणपर
मार्थभूते परब्रह्मणि प्रविलापयामि ॥ समस्तदेहादि पंचपरब्रह्मणि प्र — राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञाप्य तत्त्वं नित्यशुद्धबुद्धमुक्तस्वभावं सच्चिदानंदस्वरूपं परीपूर्णं ब्रह्मैवात्मं
स्वभावयेत् ॥ एवं ध्याताद्यथोक्तस्वरूपात्सर्वज्ञानैश्वर्ययुक्ताश्रयाद्वात्मकात्सर
ब्रह्मणः सकाशात्तद्धेत्वर्थभूता सर्वमंत्रमयमातृकासंज्ञकशब्दब्रह्मात्मा सका
महदहंकारादिपंचतन्मात्रादिसमस्तप्रपंचाकारणभूता प्रकृतिरूपमाया
रज्जुसर्पवद्विवर्तरूपेण प्रादुर्भूतेति ध्यातव्या ॥ तस्या मायायाः सकाशात् यथो
क्तमाकाशमुत्पन्नं आकाशाद्वायुः ॥ वायोरग्निः ॥ अग्नेरापः ॥ अद्भ्यः पृथिवी ॥
समजायतेति ध्यातव्यं तेभ्यः पंचमहाभूतेभ्यः सकाशात् शरीरं तेजोमयं पुण्यां
सर्वपुरुषार्थसाधनं देवताराधनयोग्यमुत्पन्नमिति ध्यातव्यं तस्मिन् शरीरे
सकलं सर्वमंत्रदेवतामयं सच्चिदानंदस्वरूपं परब्रह्मात्मकरूपेणानुप्रवि
ष्टमिति भावयेत् ॥ एषा भावना मुख्या भूतशुद्धिः ॥ ॥ अथ प्राणायाम
विधिः ॥ ॐ गोविंदायनमः अंगुष्ठयोः ॥ तर्जन्योर्महीधराय ॥ मध्यमया

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

बीकेशाय ॥ अनामिकयोः ॥ त्रिविक्रमाय ॥ कनिष्ठिकयोर्विन्यसेत् ॥ करतलपृष्ठ भट्टी०
र्माधुराय ॥ प्रणवस्य प्रजापतिऋषिः परब्रह्म देवता ॥ देवी गायत्री छंदः ॥
बीजं उत्तान्तिः ॥ मंकीलकं ॥ विद्युद्वर्णः उदात्तः स्वरः ज्ञातव्यं गोत्रं ॥ ॐकारमं
णां ब्रह्माविष्णुमहेश्वरा देवा देवता ॥ वसिष्ठविश्वामित्रभरद्वाजऋषयः ॥
गायत्रीत्रिष्टुप्जगत्यः छंदांसि भूरंतरिक्षंद्यौस्थानानि ॥ गार्हपत्यदक्षिणा
ग्न्याहवनीयस्थानि ॥ पीतविद्युद्धेनाच वर्णा ॥ जाग्रत्स्वप्नसुषुप्तावस्थाः व्याहृ
तीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः ॥ अ
ग्निर्वायुसूर्यबृहस्पतिवरुणइंद्रविश्वेदेवा देवताः ॥ गायत्र्युष्णिगनुष्टुप्बृह
तीपंक्तीत्रिष्टुप्जगत्यः छंदांसि ॥ श्वेतश्यामपीतरक्तनीललोहितकृष्णवर्णाः ॥ २८
षड्जऋषभगांधारपंचमधैवतनिषादाः स्वराः ॥ पृथिव्यापस्तेजोवायुराका
शादिगात्मनो बीजानि ॥ श्रीकीर्तिमायाधृतिमेधास्मृतिवाचशक्तयः ॥ अ
राम

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नि वेश्य काश्यप गोतमांगिरस भार्गव कौशिक वाशिष्ठानि गोत्राणि ॥ शब्द
स्पर्श रूप रस गंध मनो बुध्यस्त त्वानि ॥ वित्त तत्त्व समाज लिक राकट विस्तृतेप
मया शाग्रथित्त व्यापका सुद्राः प्राणापान व्यानोदान समान मो बुद्धिजनित पा
पोपत्रायनं फलं ॥ मध्यम गायत्री छंदः ॥ विश्वामित्र ऋषिः सविता देवता ॥ शिर
सः प्रजापतिर्ऋषिः परमात्मा देवता त्रिष्टुप् छंदः ॥ सर्व स्वरः दीप्तो वर्णः प्राणा
यामे विनियोगः ॥ ॐ भूं नाभ्यै नमः ॥ ॐ हृदयाय नमः ॥ मुखाय नमः ॥
ॐ भूः पादाभ्यां नमः ॥ ॐ भुवः जानुभ्यां नमः ॥ ॐ स्वः गुह्याय नमः ॥ ॐ महः
नाभ्यै नमः ॥ ॐ जनः हृदयाय नमः ॥ ॐ तपः कंठाय नमः ॥ ॐ सत्यं मूर्ध्ने नमः ॥
ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः ॥ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा ॥ भ
र्गो देवस्य ज्योतिरात्मने शिखायै वषट् ॥ धीमहि मायात्मने कवचाय हुं ॥ धि
यो नः ज्ञानात्मने नेत्रत्रयाय वौषट् ॥ प्रचोदयात् तत्त्वात्मने अस्त्राय फट् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ापस्तनाभ्यांनमः ॥ज्योतिर्नेत्राभ्यांनमः ॥रसोज्जिह्वायैनमः ॥अमृतंललाटाय भट्टी॰
म ॥ब्रह्मभूर्भुवःस्वरोंकवचायहुं ॥तत्सवित्रीप्राणायोमान्छत्ता ॥प्रणवस्यब्रह्मा
तिऋषिः ॥परब्रह्मदेवता ॥देवीगायत्रीछंदः ॥गायत्र्यागायत्रीछंदः ॥विश्वामि
ऋषिःसवितादेवता ॥वरेण्यतिबीजं ॥यमितिशक्तिः ॥णकारस्तोधारणशक्तिः
श्वेतोवर्णः ॥अग्निर्मुखंब्रह्माशिरः ॥विष्णुर्हृदयं ॥रुद्रोललाटेपृथिवीकुक्षिस्त्रैलो
चरणौसांख्यायनगोत्रंत्रिपादगायत्री ॥अशेषपापक्षयार्थेअष्टोत्तरशतसंख्या
कंगायत्रीजपमहंकरिष्ये ॥धियोयोनःप्रचोदयात्करतलकरपृष्ठाभ्यांनमः ॥
तत्सर्वेणव्यापकेऽष्ठत्वा ॥ॐभूःअंगुष्ठाभ्यांनमः ॥ॐभुवःजानुभ्यांनमः ॥ॐ
स्वःमध्यमाभ्यांनमः ॥ॐतत्सवितुर्वरेण्यंअनामिकाभ्यांनमः ॥भर्गोदेवस्य
धीमहीकनिष्ठिकाभ्यांनमः ॥वरेण्यविश्वात्मनेशिरसेस्वाहा ॥भर्गोदेवस्यपरमा ३९
त्मनेशिखायैवषट् ॥धीमहिब्रह्मात्मनेकवचायहुं ॥धियोयोनविश्वात्मनेनेत्र

राम

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र्यायै वौषट्॥प्रचोदयोदात्मने अस्त्राय फट्॥ॐ भूः हृदयाय नमः॥ॐ भु
वः शिरसे स्वाहा॥ॐ स्वः शिखायै वषट्॥तत्सवितुर्वरेण्यं कवचाय हुं॥भर्गो
देवस्य धीमहि नेत्रत्रयाय वौषट्॥धियो यो नः प्रचोदयात् अस्त्राय फट्॥गायत्र्य
क्षराणां वशिष्ठ भारद्वाज गौतम भृगु शांडिल्य॥लोहित गार्ग्य॥शंभु॥सनत्कु
मार सत्यवानू॥गाधर्वा कश्यप जमदग्नि अत्रि विष्णु पराशर पुंडरीक क्रतु दक्ष प्र
गिरस कार्तिकेय भृगु॥अगस्ति विश्वामित्र ऋषयः॥अग्नि वायु सूर्य विष्णु
अर्यमा इंद्र विश्वेचा पर्जन्य इंद्र॥धर्वा॥सत्स मित्र वरुण॥त्वष्टा वसव॥मरुत
ष्टा॥अंगिरा विश्वदेवा॥विश्वेदेवा भर्गवस्त्र र्वब्रह्मा॥ब्रह्मा सविता रो देवता॥
यत्रि॥उष्णिक्॥अनुष्टुप् बृहती पंक्ती त्रिष्टुप् जगती प्रकृती विराट् विस्तार
पंक्तिः॥अक्षर पंक्ति॥क्रौंसायनी॥विष्टार पंक्ति॥कसायनी अक्षर पंक्ति॥क्रौ
यनी जगती जगत्ति महाभुच म[illegible] सिं॥उदात्तस्वरित॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुदात्ताउदात्त॥उदात्तस्वरित॥अनुदात्तउदात्त॥उदात्तस्वरितअनुदात्ता॥उ भट्टी०
त्तस्वरितास्वराश्चेपञ्च॥अलसीपुष्पपिंगल॥इंद्रनीलाभश्याम॥स्फटिकं॥
धुत॥तारकामेघा॥रक्त॥मरकत॥शुकुकांचनकुंद॥पद्मराग॥शंखपांडुर॥
क्म॥विद्युत्॥सूर्य॥इंद्रनील॥कुंकुमाकुंकुम॥रक्तवर्णाः॥पृथिवी॥आपः॥तेजः॥वा
यु॥आकाश॥गंधरस॥रूप॥स्पर्श॥शब्द॥वाक्॥हस्त॥उपस्थ॥वायु॥पाद॥श्रोत्र॥
त्वक्॥चक्षु॥घ्राण॥जिह्वा॥मन॥अहंकार॥चैत्त॥अव्यक्तानितत्त्वानि॥महा॥पु
प्रभावती॥नित्या॥शोभन॥भद्रा॥विमलाप्रभावती॥जया॥प्रल्हादिनी॥कां
ता॥जिह्वा॥सरस्वती॥विद्युद्वर्णा॥विश्वरूपा॥विभूति॥ज्ञानाविभूति॥ज्ञाना॥पु ४०
ष्टा॥रति॥प्रीति॥पद्मलयाविलासिनी॥लक्ष्मीकाः॥शक्तयः॥अड्ड॥म्हस्व॥ए॥ऐ॥
ओ॥अं॥अः॥कचटतप॥यरलव॥चत्वारःषसहा॥वीजानि॥सम्मुखसंपुट॥यमपाश॥
ग्रंथितसन्मुख॥प्रलंब॥मुष्टिक॥मीन॥कूर्म॥वराह॥सिंह॥क्रोल॥मुद्गर॥पल्लव॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्रापातकनाशन ॥ उपपातकनाशन ॥ महापातकनाशन ॥ ग्रहरोगशांत्यर्थे
भ्रूणहत्यानाशन ॥ अगम्यागमनपातकदोषनाशन ॥ अभक्ष्याभक्षण ॥ गुरुवधे ॥
गोवधस्त्रीवध ॥ चाण्डालग्रामकोधु ॥ सर्वजन्मार्जितपापनाशन ॥ विरंचिप
दप्राप्ति विष्णुपदप्राप्ति ॥ रुद्रलोकप्राप्ति सगुणब्रह्मपदप्राप्ति ॥ परमपदप्राप्त्य
र्थे अंगुष्ठादिपदन्यासे अक्षरन्यासे विनियोग ॥ ॐ तत्पादाभ्यां नमः ॥ सवि
तुर्जंघयोः ॥ वरेण्यं कट्यै भर्गो नाभ्यै देवस्य हृदयाय धीमहि कंठाय ॥ धियो मुखा
य ॥ यश्चक्षुभ्यां ॥ नो ललाटाय ॥ प्रचोदयात् मूर्ध्ने नमः ॥ तत् अंगुष्ठाभ्यां नमः ॥ स
वितुस्तर्जनीभ्यां नमः ॥ वरेण्यं मध्यमायै ॥ भर्गो अनामिकायै ॥ देवस्य कनिष्ठि
कायै ॥ देवस्य कट्यै ॥ धीमहि वामांगुष्ठाय धियः वामतर्जन्यै ॥ यः वाममध्यमा
यै नः वामानामिकायै प्रचोदयात् वामकनिष्ठिकायै तत् पादांगुष्ठाभ्यां नमः ॥ स
...गुल्फाभ्यां नमः ॥ विजंघाभ्यां नमः ॥ तुर्जानुभ्यां नमः ॥ वरेरुभ्यां ॥ रेणु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याय ॥ णरखणाभ्या ॥ पकारेभ्या ॥ भूनाभ्ये ॥ गोविंदरायनमः ॥ देस्तनाभ्यावे ।रुद्री०
दरयायनमः ॥ स्यमुखाय ॥ धीतालवे ॥ मनासिकाग्रायनमः ॥ हिभ्रूमध्याय
नमः ॥ धिचक्षुभ्यानमः ॥ यो ललाटायनमः ॥ योपूर्वचक्राय ॥ त्तदक्षिण
चक्राय ॥ प्रपश्चिमचक्राय ॥ वोउत्तरचक्राय ॥ यानमूर्ध्नेनमः ॥ ॥ ॐ ध्यानं अथ
प्रातःसंध्याकुमारीरक्तांगीरक्तवस्त्राभरणभूषितां ॥ ब्रह्माणिब्रह्मदेवत्यांहंस
वाहनांरक्तमंडलुदंडक्षसूत्ररक्तकमलहस्तां ऋग्वेदमुद्दिरंति सत्यओंकारस्व
र्यमंडलस्तूर्यमंडलांमूमध्यभूमध्याचक्षुर्वीचक्षुषावंलेवलांप्राणंप्राणो
दत्तर्यामिनमाविशंतिसोहमस्मीतिध्यायेत् ॥ आयातिविति मंत्रस्यविश्वदे
वऋषयः ॥ ब्राह्मोदेवता ॥ अनुष्टुप्छंदः ॥ गायत्र्यावाहनेविनियोगः ॥ ॥ ४१
ॐ आयातुवरदादेविअक्षरंब्रह्मसंमितं ॥ गायत्रीछंदसांमातेदंब्रह्मजुष
स्वमे ॥ यदन्हात्कुरुते पापंतदन्हात्प्रतिमुच्यते ॥ यद्रात्रियात्कुरुतेपापंतद्रा त्राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्त्या प्रतिमुच्यते ॥ सर्ववर्णे महादेवि संध्याविद्ये सरस्वती ॥ अजरे अमरे देवि स
र्वदेवि नमोस्तु ते ॥ ओजोसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि ।
विश्वमसि विश्वायुः सर्वमसि सर्वायुः ॥ अभिभूरों गायत्रीमावाहयामि ॥ मुक्ता
विद्रुमहेमनीलधवलच्छायैर्मुखैस्त्र्यक्षयोयुक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वार्थ
वर्णात्मिकां ॥ गायत्रीं वरदाभयांकुशकशांशुभ्रंकपालं गुणं शंखं चक्रमथारविं
दयुगुलं हस्तैर्वहंतीं भजेत् ॥ इदृक्त्रीं चैव गायत्रीं ध्यायेतेयस्तु नित्यशः ॥ सर्वपापप
रित्यज्य सगच्छेत्परमं पदं ॥ ध्येयः सदा सवितृमंडलमध्यवर्त्ती नारायणः सरसि
जासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटी हारी हिरन्मयवपुर्धृत
शंखचक्रः ॥ गायत्र्यै सांगायै सवाहनायै सपरिवारायै आवाहनादि षोडशवा
डशोपचारैः समर्पयामि नमः ॥ एतेर्मयाकृतैर्मानसैरुपचारैर्गायत्री सांगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ायुयासुप्रसन्नावरदा भवतु॥ उपात्तदुरितक्षयार्थं अष्टोत्तरशतसंख्याकं
ायत्री जपमहं करिष्ये॥ गायत्री तुरीय पादस्य विमल ऋषिः परमात्मा देवता दे
गायत्री स्तुति विनियोगः॥ परोरजसे हृदयाय नमः॥ रजसे शिरसे स्वाहा॥ असावदो
शिखायै वषट्॥ परोरजसे कवचाय हुं॥ असावदो नेत्राय वौषट्॥ परोरजसे
सावदो अस्त्राय फट्॥ मुद्रा॥ सुरभिर्ज्ञानयोनिश्च मच्छः कूर्मोथ पंकजं॥ लिंगनि
र्याण मुद्रा च अष्टमुद्राः प्रकीर्तिताः॥ दृष्ट्वा जपेत्॥ एवमष्टोत्तरशतगा
यत्री जप कृत्वा षडंगं न्यसं कुर्यात्॥ अथ मुद्रा लक्षणं॥ सुमुखं संपुटं चैव वि
ततं विस्तृतं तथा॥ द्विमुखं त्रिमुखं चैव चतुः पंचमुखं तथा॥ षण्मुखाधोमु
खं चैव व्यापकांजलिकं तथा॥ शकटं यमपाशं च ग्रथितं सन्मुखोन्मुखं॥ प्रलंबं
मुष्टिकं मीनः कूर्मो वराहकं॥ सिंहाक्रांतं महाक्रांतं मुद्गरं पल्लवं तथा॥ एता
मुद्राश्चतुर्विंशद्गायत्र्यां सुप्रतिष्ठिताः॥ संमुखं संहतौ हस्तौ उत्तानौ कुंचितांगु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली॥ कुंचिताग्रकांगुल्व योयायोरल्कुलक्षणयोर्हस्तंयोरस्तोसंमुखं नाममुद्रा॥
संपुटोपमकोत्राणभोकरावन्योन्यसंहतो॥ संहतौपद्ममुकुलाभौ॥ संपुटंनाम
मुद्रा॥२॥ चिलूलितसंहतोहस्तोउत्तानावायतांगुली आयतानाग्रस्तारितोअंगुल
यायययोर्हस्तयोस्तो चिततंनाममुद्रा॥३॥ विस्तीर्णौ संहतौ पाणी मिथो मुक्तां
गुलिद्वयो मुक्तमंगुलिद्वयाभ्यां पाणिभ्यां तौ मिथः संहतौ विस्तीर्णं नाममुद्रा
॥४॥ संमुखासक्तायययोपाण्योः कनिष्ठाद्वययोगतः॥ शेषांगुलिनां वेकस्यैद्वि
मुखं त्रिमुखादयः॥ मिथः संमुखासक्तयोः पापाण्योः कनिष्ठाद्वययोगेनाद्यो
ऽगुलीनां वेकस्ये॥ अंगुष्ठद्वयमारभ्य अनामिकांतं यावद्विमुखं त्रिमुखं चतु
खपंचमुखं नाममुद्राभवंति॥ तत्रच कारं द्विमुखं॥५॥ कारं त्रिमुखं॥६॥ लि
ारंचतुर्मुखं॥७॥ मकारे पंचमुखं॥८॥ शेषांगुलिनां संयोगात्सर्वयोग वि
ानानं॥ तिर्यक्स्कसुज्यमानाग्नोसंयुक्तांगुलिमंडलौ॥ हस्तौ षण्मुखमिस्फक्तासुद्रा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ द्रा॥ विस्तारदैः पूर्वयोगः ॥५॥ निष्ठिका द्वयसंयोगः ॥ तद्विनाशेनेतरयोगं अंगु प्रदी०
लीनां संयोगात्तिर्यक्संयुज्यमानमग्रं ययोस्तथा संयुक्तमंगुलीमंडलं चययो
ताहस्तो षण्मुखमुद्रा ॥८॥ आकुंचिताग्नौ संयुक्तौ न्युब्जौ हस्तौ वियोगमुखं ॥
९ षड्भिः काग्रावेवाकृष्टौ संयुक्तौ हस्तावधोमुखनाममुद्रा ॥१०॥ उत्तानौ ताहशा
वेवव्यापकं कुंचितौ करौ तादृशौ संकृत्का [illegible] लक्षणौ करौ व्यापकांजलिकंना
ममुद्रा ॥११॥ अधोमुखोर्द्ध्वमुष्टी मुक्ताग्रांगुष्ठकौ करौ ॥ शकटं नाम कथितं मुक्ता
ग्रावंगुष्ठौ ययोरन्योन्यलक्षण्ययोः करयोस्तौ शकटं नाममुद्रा ॥१२॥ यमपाशमनः
परं ॥ बद्धमुष्टिकयोः पाण्योरपर्ययोभावेनावस्थितयोः पाण्योरुत्तानाकुंचि
तायावामतर्जनीसान्ययावामतर्जन्यां कुंचवक्रया ॥ मुक्ताय मपाशनाममुद्रा ॥
॥१३॥ उत्तानसंधिसंलीनबद्धांगुलिद्वयौ करौ ॥ शंखाघुघटि[illegible]तो द्वौ पंगुष्ठौ ४३
ग्रपितमुच्यते ॥ उत्तानसंधिष्टसंलीनानिबद्धान्यंगुलिदलानि ययोन्करयो

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तौ तथोत्क्षौ तावन्योन्यसंमुखावघटितौ दीर्घाचंगुष्ठौ ययोस्तो ग्रथितं नाम मुद्रा ॥१४॥
कुंचितोर्ध्वांगुल्लिर्वामस्ताद्दृग्दक्षिणेन तु ॥ अधोमुखेन संयुक्तः संमुखोन्मुख
मुच्यते ॥ संकुचिताः संबद्धाः ऊर्ध्वांगुल्ययोर्यस्य तथोक्तः सतादृशेन दक्षिणेनाधो
मुखेन संयुक्तः सन्मुखनामा मुद्रा ॥१५॥ उत्तानोन्नतकोटिश्चप्रलंबः कथितोकु
री ॥ उत्तानेकुन्नते कोटीत्र ययोस्तौ प्रलंबो नाम मुद्रा ॥१६॥ मुष्टिचान्योन्यसंयुक्तो
उत्तानमुष्टिकोभवेत् ॥ अन्योन्यसंयुक्तावुत्तानौ मुष्टी मुष्टीकानाम मुद्रा ॥१७॥
मीनस्थसंमुखीभूतो मुक्तानाम कनिष्ठिको ॥ ऊर्ध्वसंयुक्त च कायान्यशेषांगुलि
हस्तानि ययोस्तो मीनो नाम मुद्रा ॥१८॥ अधोमुखावामकरस्ताद्दृशोदक्षिणेन तु ॥
ष्टहृशः समाकान्त ॥ कूर्मोनामाभिधीयते ॥ अधोमुखोन्युब्जो वाम करस्तादृ
शेन दक्षिणेन पृष्ठदेशे युक्ते ॥ कूर्मो नाम मुद्रा ॥१९॥ ऊर्ध्वे मध्यावामभुजः क
राभ्यासाश्रयकर ॥ वराहः कथ्यते ॥ वक्षस्समीयाश्रये करे स्वस्य लक्षण्यावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुजो [illegible] करे ॥ वराहो नाम मुद्रा ॥२०॥ सिंहाक्रान्तकर्णौ श्रितावा भ०दी०
न्तांगुलिकरौ सिंहाक्रान्त मुद्रा ॥२१॥ नाभेर्या कुंचितौ पोहस्तौ महाक्रान्तं नाम मु
॥२२॥ ऊर्ध्वं नु पृष्टौ तौ पाणी मुद्गरो नाम तर्जनीयस्ताद्दृढाद्दक्षिणहस्तेन किंचि
र्ध्वगतयोः पाण्योर्पृ वामतर्जनी दक्षिणहस्तास्तां मुद्गरो नाम मुद्रा ॥२३॥ पल्लु
वो दक्षिणकर ॥ अधोमुखस्थितौ मूर्ध्नि मुद्राणां मिलितलक्षणं मिलितं ॥ उन्मल
क्षिणो मूर्ध्नि निहितः पल्लवो नाम मुद्रा ॥२४॥ अत्र महासंहिता च महाविशेषः ॥
न जानु दर्शयेन्मुद्रा महाजनसमागमे ॥ स्तक्षुभ्यं ते निदं वतारतस्य च विफलं भवेदि
ति ॥ इति मुद्राप्रदर्श्य गायत्रीजपः कार्यः ॥ ततः षडंगानि कृत्वा विसर्जयेत् ॥
मित्रस्येति तृचस्य विश्वामित्र ऋषिः मित्रो देवता गायत्री छंदः ॥ मित्रोप ४८
स्थाने विनियोगः ॥ ॐ मित्रस्य चर्षणीधृतो वो देवस्य सानसिं ॥ द्युम्नं चित्र
श्रवस्तमं ॥ अभियो महिना दिवं मित्रो बभूव सप्रथाः ॥ अभिश्रवोभिः पृथि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि॥ मित्रायपंचयेमिरेजनाअभिष्टिन्त्ववसे॥ सदेवान्विश्वान्बिभर्ति॥ मित्रो
देवेष्वायुषुजनायवृक्तबर्हिषे॥ इषइष्टव्रताअकः॥ अथन्त्गसर्थजपः॥ जात
वेदसइसेकर्चस्यसूक्तस्यकश्यपऋषिः॥ दुर्गाजातवेदाग्निर्देवता त्रिष्टुपूछंदः॥
न्त्गंसर्थजपेविनियोगः॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवे
दः॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ त्र्यंबकमितिमंत्र
स्यवसिष्टऋषिः॥ मृत्युंजयोरुद्रोदेवता अनुष्टुपूछंदः॥ न्त्गंसर्थजपेविनि
योगः॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥ उर्वारुकमिवबंधनान्मृत्योर्मु
क्षीयमामृतात्॥ तछंयोरित्यस्यमंत्रस्यन्त्गंयुऋषिः॥ विश्वेदेवादेवता शक्करी
छंदः॥ न्त्गंसर्थजपेविनियोगः॥ ॐ तछंयोरवृणीमहेगातुंयज्ञायगातुंयज्ञ
पतये॥ देवीस्वस्तिरस्तुनःस्वस्तिमानुषेभ्यः॥ ऊर्ध्वंजिगातुभेषजं॥ न्त्गंनोअस्तु
द्विपदेन्त्गंचतुष्पदे॥ ॐ नमोब्रह्मणेत्यस्यमंत्रस्यवामदेवऋषिः॥ लिंगोक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्देवता॥ त्रिष्टुप्छंदः॥ शांत्यर्थजपे विनियोगः॥ ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नमः ओषधीभ्यः॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि॥ त्रिवारं जपेत्॥ भद्रं न इत्यस्य विमद ऋषिरग्निर्देवता एकपदा विराट् छंदः॥ शांत्यर्थे जपे विनियोगः॥ भद्रं नो अपि वातय मनो दक्षमुत क्रतुं॥ शांतिः शांतिः सु शांतिः॥ ति॥ प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसंति एताभ्यश्च नमो नमः इत्यनेन मंत्रेण दिशां नमस्कुर्यात्॥ नमो गंगायमुनयोर्मध्ये ये वसंति॥ ते मे प्रसन्नात्मानश्चिरंजीवितं वर्द्धयंतु॥ नमो गंगायमुनयोर्मुनिभ्यश्च नमः॥ संध्यायै नमः॥ सावित्र्यै नमः॥ गायत्र्यै नमः॥ सरस्वत्यै नमः॥ सर्वाभ्यो देवताभ्यो नमः कामोऽकार्षीन्मन्युरकार्षीत्॥ ॐ नमो भगवते संध्यायै आयुः प्रजावान्॥ आरोग्यो भवा मि सस्य सदा सर्वभूतानि स्थावराणि चराणि च॥ सायं प्रातर्नमस्यामि सा मा संध्या अभिरक्षतु॥ सा मा संध्या अभिरक्षत्वां नमो नमः॥ शिवाय विष्णुरू

वा

४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाय शिवरूपाय विष्णवे ॥ शिवस्य हृदयं विष्णुर्विष्णुश्च हृदयं शिवः ॥ यथा शि
वमयो विष्णुरेवं विष्णुमयः शिवः ॥ यथांतरं न पश्यामि तथा मे स्वस्तिरायुषः ॥
मो मे स्वस्तिरायुषो नमोनमः ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ ज
गद्धिताय कृष्णाय गोविंदाय नमोनमः ॥ ब्रह्मण्यदेव कीपुत्रो ब्रह्मण्यो मधुसूद
नः ॥ ब्रह्मण्यः पुंडरीकाक्षो ब्रह्मण्यो विष्णुरर्चितः ॥ क्षीरेण स्नापिते देवी चं
दनेन विलेपिते ॥ बिल्वपत्रार्चिते दिव्ये दुर्गेऽहं शरणागतः ॥ अहं दुर्गे श
रणागतो नमोनमः ॥ आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ सर्वदेव
नमस्कारं केशवं प्रतिगच्छति ॥ श्रीकेशवं प्रतिगच्छ सो नमोनमः ॥ सर्ववे
देषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनं ॥
नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने
पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ उत्तमे शिखरे जाते भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यां पर्वतमूर्द्धनि ॥ ब्राह्मणेभ्यो ऽभ्यनुज्ञाता गच्छ देवि यथासुखं ॥ स्तारं भागी
रथीतोयं सारं जाप्यं च वैदिकं ॥ ब्रह्मचर्यं तपःसारं सारं साधवसेवनं ॥ इदं
द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वां ॥ भूतं देवानामवमे अवो
भिः ॥ विद्यामेषं वृजिनं जीरदानुं शरदः ॥ आत्मपादोदकया भूमिं संध्याका
लेऽभिवादयेत् ॥ आयुर्विद्याधनारोग्यप्राप्नोति पुरुषः सदेति ॥ अथ ब्राह्मणा
नाभिवादयेत् ॥ अथ प्रातर्होमः ॥ प्रत्यवरोह इत्यस्य हिरण्यगर्भऋषिः ॥
अग्निर्देवता त्रिष्टुप्छंदः ॥ अग्निप्रत्यवरोहणे विनियोगः ॥ ॐ प्रत्यवरोह
जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः प्रजानन् ॥ प्रजां पुष्टिं रयिमस्मासु धे
ह्यथा भव यजमानाय शंयोः ॥ परिसमूहनं ॥ ततः प्राणायामः ॥ उपात्त
दुरितक्षयार्थं श्री अग्निरूपी पुरुषप्रीत्यर्थं प्रातरुपासनहोमं अहं करिष्ये ॥ ८६
इति संकल्प्य ॥ चत्वारि शृंग इत्यस्य वामदेव ऋषिः अग्निर्देवता त्रिष्टुप्छंदः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निमूर्त्तिध्याने विनियोगः ॥ ॐ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त
हस्तासो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥ इत्यग्नि
मूर्त्तिध्यात्वा ॥ विश्वानि न इति तिसृणां आत्रेयो वसुश्रुत ऋषिः अग्निर्देवता
त्रिष्टुप् छंदः ॥ अग्न्यर्चने विनियोगः ॥ ॐ विश्वानि नो दुर्गहा जातवेदः सिंधुं न
नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्नमसा गृणानो ऽस्माकं बोध्यविता तनूनां ॥
यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु धेहि
प्रजाभिरग्ने अमृतत्वमश्यां ॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ॥
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥ इत्यर्चनं ॥ ततो होमः ॥ सूर्या
य स्वाहा सूर्याय इदं न मम ॥ प्रजापतये स्वाहा प्रजापतय इदं ॥ इति प्रातः ॥ अग्नये
स्वाहा अग्नय इदं ॥ प्रजापतये स्वाहा प्रजापतय इदं ॥ इति सायं ॥ ततोपस्थानं ॥
अग्ने त्वन्न इति च तसृणां गोपायनो लोपायनो वा बंधुः श्रुतबंधुर्विप्रबंधुश्चैवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्चा ऋषयः॥ अग्निर्देवता द्विपदा विराट् छन्दः॥ अग्न्युपस्थाने विनियोगः॥ ॐ
अग्ने त्वन्नो अंतम उत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा न
क्षि द्युमत्तमं रयिं दाः॥ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥ तं त्वा
शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥ इत्युपस्थानं॥ मा नस्तोक इत्यस्य
कुत्स ऋषिः॥ रुद्रो देवता जगती छंदः॥ विभूतिधारणे विनियोगः॥ ॐ मा नस्तोके
इत्यादि पूर्ववत्॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥ अगस्त्यस्य त्र्यायुषं यद्देवा
नां तन्मे अस्तु॥ त्र्यायुषं॥ ॐ च मे स्वरश्च मे यज्ञोपचतनमश्च यत्तेन्यूनं॥ त
स्मै त उपयन्त अतिरिक्तं तस्मै ते नमः॥ अग्नये नमः॥ स्वस्ति श्रद्धां मेधां यशः प्र
ज्ञां विद्यां बुद्धिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनं॥ गोत्राभिचा
र॥ कुर्यात्॥ अपोसनं सादगुण्यार्थं त्रिपदं १० जपेत्॥ ततः समित्समारोपणे
विनियोगः॥ ॐ अयं ते योनिरिति मंत्रस्य गाथिपुत्रो विश्वामित्र ऋषिः॥ अग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्निर्देवता अनुष्टुप् छंदः ॥ समित्समारोपणे विनियोगः ॥ ॐ अयंते योनिर्ऋ
त्वियो यतो जातो अरोचथाः ॥ न जानन्नग्न आसीदथा नो वर्द्धया गिरः ॥ द्रुसु
पासन विधिः ॥ सैं यासः ॥ उपयादीश्वरं चैव योगक्षमार्थसिद्धये ॥ ततो माध्याह्नि
की संध्या ॥ मुपासीत विचक्षणः ॥ अथ मुद्रा निगद्यन्ते ॥ हृद्या ध्याः समासनः ॥
यत्प्रदर्शनतः क्षिप्रं विश्वेशानः प्रसीदति ॥ ज्ञेया हन्मूर्ध्नि विन्यासगुल्फांगुष्ट
विवर्जिताः ॥ उच्छ्रितांगुष्ठ त्रिशिखायं न्यासः कार्यो अधोमुखः सर्वांगुलिभिः कवचे
करयोरुभयोरपि ॥ तथांगुल्पोक्ष विन्यासे कनिष्टांगुष्ठ वर्जिताः ॥ तर्जन्याभ्यां च
यदस्त्रे अंगुष्टाभ्यां सन्नाष्टकं ॥ पद्माकारौ करौ कृत्वा तन्मध्ये ंगुष्ठ कद्वयं ॥ विधा
य कर्णिकारं विन्यसेत्पद्ममुद्रिका ॥ हस्ताभ्यां मुकुली कृत्वानामिकामूलपर्वणाः ॥
अंगुष्टेनु क्षिपेदुक्ता मुद्रेषावाहिनी बुधेः ॥ अधोमुखी इयं चेत्स्या स्थापनी मुद्रि
का स्मृता ॥ सन्निधायोच्छ्रितांगुष्ठो मुष्ट्यासंयोजना भवेत् ॥ अंतः प्रवेशितांगुष्ठा से

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बसासंरोधिनी मता ॥ नमस्कारभिधा मुद्रा ज्ञेया पाणी तु संहतौ ॥ अंगुष्ठावु
वुन्नतौ कृत्वा मुष्ट्योः सलग्नयोर्द्वयोः ॥ नाचास्माभिमुखो कुर्यान्मुद्रेषा काल
कर्णिका ॥ प्रसार्य दक्षिणं हस्तं वामस्योपरि चक्रमात् ॥ कनिष्ठाद्यंगुलि
नां च समानयेत् ॥ अंगुष्ठामूलपर्यंत संहराद्व्ययमीरिता ॥ वामांगुष्ठ
मधो चुक्रपाम्यांगुष्ठौ निवेशयेत् ॥ निछिष्टं दक्षिणांगुष्ठं कृत्वा मुष्टिं
च वेष्टयेत् ॥ याम्यसव्यांगुलिभिः श्रिवलिंगमुद्राः प्रकीर्तिताः ॥ कुंभवद्दक्षि
णां मुष्टिं कृत्वांगुष्ठेन वेष्टयेत् ॥ निक्षिप्य सव्यमंगुष्ठं मुष्टिन वेष्टयेत् दृढे ॥
वामांगुलिभिरुक्तेयं कुंभमुद्रा मनिषिभिः ॥ अधोमुखाभ्यां हस्ताभ्यामा
पादलेते मस्तकं ॥ प्रसारितस्या सस्य न्यूय महामुद्रेयमुत्तमं ॥ हस्तयोरुभ
योः सम्यग्गुंफितामंगुलीषु च ॥ मध्यमा तर्जनी योगात्कनिष्ठा पकनिष्ठयोः
संश्लेषाद्वंदनमुद्रेयं गोस्तना चेस्वरप्रिया ॥ आवाहनादिमुद्रास्ता यथालिंगं
प्रयोजयेत् ॥ कुंभमुद्राभिषेकस्यासद्मनमुद्रासने मता ॥ कालकर्णी प्रयोक्तृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यायिष्यन्नाशादि कर्मणि ॥ लिंगाख्यामं ऽसंधानेदर्पदाशानुपुष्टिदा ॥ नैवेद्य
जलपुष्पादौ धेनुमुद्रां प्रदर्शयेत् ॥ दर्शनायाम हामुद्रा पुजारंभावसान योः ॥
संहारमुद्राकर्तव्यापरिपूर्णेर्चनादिके ॥ इति मुद्रालक्षण ॥ अन्यग्रंथात्प्रसंगे
न लिखितं ॥ तथैव गायत्रीतर्पणे ॥ तथाच गायत्री मंत्रार्थः ॥ अन्यग्रंथा
ल्लिख्यते ॥ अथ गायत्रीतर्पणमुच्यते ॥ आचारदीपात् ॥ प्राणायाम्य अथ संक
ल्प ऋषिछंदस्तथैव च ॥ देवताषडंगन्यासं आवाहनमतः परं ॥ प्राणायाममदेशका
लौ स्मृत्वा अस्मिन्काले सवितृप्रीतये गायत्रीतर्पणमहं करिष्ये ॥ तत्स
वितुरिति विश्वामित्र ऋषिः गायत्री छंदः ॥ सविता देवता ॥ गायत्रीतर्पणवि
नियोगः ॥ ॐ भूः हृदयाय नमः ॥ ॐ भुवः शिरसे स्वाहा ॥ स्वाहा ॥ शिये वषट् ॥
ॐ तत्सवितुर्वरेण्यं ब्रह्मात्मने हृ ॥ भर्गो देवस्य धीमहि विष्णवात्मने ॥ ॐ २
वेसय्द्धान्सत्मक ॐ धियो यो नः प्रचोदयात् ॥ अस्त्राय फट् ॥ ॐ भूर्भुवः स्वः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषं ऋग्यजुःसाममंत्रं ज्योतिर्गतं सवितारमात्मानमावाहयिष्ये ॥ ॐ भूः पुरुषऋ भट्टी०
ग्वेदायनमस्तर्पयामि ॥ ॐ भुवः पुरुषयजुर्वेदायनमस्त० ॥ ॐ स्वः पुरुषसाम
वेदायनेयमस्त० ॥ ॐ महः पुरुषअथर्ववेदायनमस्त० ॥ ॐ जनः पुरुषइतिहा
सपुराणायनमस्तर्पयामि ॥ ॐ तपः पुरुषसर्वांगमायनमस्त० ॥ ॐ सत्यं सर्व
लोकायनमस्त० ॥ ॐ भूर्भुवस्वः पुरुषमंत्रज्योतिर्गतायनमः सवितारंतर्प० ॥
ॐ भूः एकपादगायत्र्येनमस्त० ॥ ॐ भुवः द्विपदागायत्रीनमस्त० ॥ ॐ स्वः त्रि
पदागायत्र्येनमस्त० ॥ ॐ भूर्भुवः स्वः अनुष्टुपदागायत्र्येनमस्तर्पयामि ॥ ॐ उ
षसेनमस्त० ॐ गायत्र्येनमस्तर्प० ॥ ॐ सावित्र्येनमस्तर्पयामि ॥ ॐ सरस्वत्येन
मस्तर्पयामि ॥ ॐ सांकृत्येनमस्त० ॥ ॐ सरस्वत्येनमस्तर्पयामि ॥ ॐ कौशि ४९
क्येनमस्त० ॐ सर्वायुराजितायेनमस्त० ॥ ॐ सहस्रमूर्त्येनमस्तर्प० ॥ ॐ अनं
तभूत्येनमस्त० ॥ मंत्रैरेतैस्त्रयानित्यं चतुर्विंशतिसमित्तैः ॥ गायत्रींतर्पये
द्येनतर्पितं सचराचरं ॥ अथ गायत्रीमंत्रार्थः ॥ देवस्य योत्तमानस्य सवि नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुरादिसत्यस्य संबंधिभूतेन तद्रूपेण तेजोरूपं ॥ वरेण्यं वरणीयं ॥ धिमही ध्यायेम
महि गर्भ तिसंबंधः ॥ तच्छब्दस्य प्रक्रमे पश्चाच्च यत्तनुः ॥ तद्ब्रह्म गर्भ हीलारूपं ॥ ॐ न
धिदिति निर्देशात् ब्रह्मणा स्वित्सिंधुविधस्मृतः ॥ एवं विधः परमात्मा सोऽस्माकं धि
यो बुद्धीदृष्टफलेषु कर्मस्य प्रचोदयात् ॥ प्रेरयेदिति एवं सविस्तरं मंत्रं जपेत् रुच्छे
हिरण्मयं पुरुषं ध्यायेदित्युक्तं भवति ॥ एतदक्षरमेतां च जपन् व्याहृतिपूर्वकं ॥
संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ एतदक्षरमेणवं एता गायत्रीं प्रणवव्या
हृतियुतां गायत्रीं तु जपेत् नमः ॥ प्रणवाद्याप्य त्रैमं त्राह्मो दृष्टव्यः ॥ प्राधान्येन तु संध्या
यां जपेद्व्याहृतिभिः सह इति ॥ सोंकारा व्याहृतयः विज्ञेयाः सा तु ॥ नाक्षरा ॥ समा
वर्तत सर्वं वरद फलं लभेत ॥ सोंकारा सनेन व्याहृतीनां संख्यानं तु प्रतेरामाह ॥
एवं सोंकारेणा सह पंचविंशत्यक्षराचतुरारत्यां विंशतिनाक्षराणां पंचपद्यते ॥ प्रति
ग्रहादन्नदोषात्सातकाद्युपपातकात् ॥ गायत्री प्रोच्यते तस्मात् गायंतं त्रायते यतः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवितृद्योतनात्सैव सावित्री परिकीर्तिता जगतः प्रसवित्रीं व वाग्रूपत्वात्स
रस्वती ॥ ध्यात्वार्कमंडलगतां सावित्रीं यो जपेद्बुधः ॥ धर्माधर्मविनिर्मुक्तः स
याति परमां गतिं ॥ ब्रह्मणोपासिता संध्या विष्णुना शंकरेण च ॥ कस्तेनोपा
सयेद्देवीं सिद्धिकामो द्विजोत्तमः ॥ या संध्या सा जगत्सूतिर्मायातीता हि निष्कला ॥
ईश्वरी केवला शक्तिस्तत्त्वत्रयसमुद्भवा ॥ योऽन्यत्र कुरुते यत्नं धर्मकार्ये द्विजोत्त
मः ॥ विहाय संध्याप्रणतिं स याति नरकायुतं ॥ गायत्रीं चैव वेदांश्च तुलयाऽतो
लयत्प्रभुः एकतश्चतुरो वेदाः सांगाश्च सपदक्रमाः ॥ एकतश्चैव गायत्री तुल्यरू
पा तु सा स्मृता ॥ सप्तावर्त्ता पुनाति दश अभिः प्राप्नुयाद्दिवं ॥ अष्टाविंशतिसाभ्य
स्ता नयेत ईश्वरालयं ॥ अष्टोत्तरशतं जप्ता तारयेत्सप्त सागरान् ॥ दशभिर्ज
न्मजनितं तिंशता तु पुराकृतं ॥ त्रिजन्मजं सहस्रेण गायत्र्याः शुद्धिर्ब्रह्मवधाद
ते ॥ सर्वेषां चैव पापानां संकरे समुपस्थिते दशसाहस्रिकोऽभ्यासो गायत्र्याः सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनं परं ॥ गोघ्नः पितृघ्नो मातृघ्नो भ्रूणहा गुरुतल्पगः ॥ ब्रह्मस्वदाराहाराचय
श्च विप्रस्करां पिबेन्नु ॥ गायत्र्याः शतसहस्रेण पूतो भवति मानवः ॥ योधीते
हन्यहन्येतांस्त्रीणि वर्षाणि मानवः ॥ स ब्रह्म परमभ्येति वायुभूतः स्वमूर्तिमा
न् ॥ अथ प्रातःकृतं ॥ ॥ अथ माध्यान्हसंध्याप्रातःसंध्या प्रातःसंध्यावत्कार्या तत्र
विशेषः उच्यते ॥ आपःपुनंत्विति मंत्रस्य नारायण ऋषिः आपो देवता अष्टी
छंदः आचमने विनियोगः ॥ ॐ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां ॥
पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ॥
सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा ॥ इत्युदकं पीत्वा द्विराचम्य ॥ हंसः
शुचिषदित्यस्य वामदेव ऋषिः सूर्यो देवता जगती छंदः ॥ सूर्यायार्घ्यदाने
विनियोगः ॥ ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणस
त् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं ॥ इति मंत्रेणार्घ्यं दत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वामेन ॥ ततोस्त्रोपसंहरणं पूर्ववत्कृत्वा कार्यं ॥ ततस्तर्पणं ॥ मध्यान्हकाल भट्टी०
सावित्र्यास्तर्पणं करिष्ये ॥ कश्यपऋषिः ॥ रुद्रो देवता ॥ अनुष्टुप्छंदः ॥ भुवः
पुरुषतर्पणे विनियोगः ॥ भुवः पुरुषं तर्पयामि ॥ यजुर्वेदं तं० ॥ मंडलांतं० ॥ रु
द्ररूपिणी० अंतरात्मानं० ॥ सावित्री० ॥ चंद्रमानरं० ॥ संकृतिं० संध्यां० युव
ती० रौद्री० ततः उपस्थाय ॥ सूर्याभिमुखं प्रसारितकरः सन् ॥ उदुत्येनेति सूर्यो
पस्थानं कुर्यात् ॥ स्कांदे ॥ उदुत्यं चित्रं चेत्येन स्वक्षकर उपस्थाय ॥ त्रिभिः सदा सं
ध्ययोरंभयाः सूर्यं गायत्रीजपमारभेत् ॥ मदनपारिजातके ॥ ऊर्ध्वबाहुः सू
र्यमुद्वीक्ष्यमाण उपतिष्ठेत् ॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य ॥ कण्वःपु
त्रः प्रस्कण्व ऋषिः ॥ सूर्यो देवता ॥ नवाद्या गायत्र्यः ॥ अंत्याश्चतस्रोनुष्टुभः ॥ ८१
सूर्योपस्थाने विनियोगः ॥ ॐ उदुत्यं जातवेदसं देवं वहंति केतवः ॥ दृशे वि
श्वाय सूर्यं ॥ अप त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः ॥ सूराय विश्वचक्षसे ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॥ अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु॥ भ्राजंतो अग्नयो यथा॥ तरणिर्वि
श्वदर्शतो ज्योतिष्कृदसि सूर्य॥ विश्वमाभासि रोचनं॥ प्रत्यङ् देवानां विशः प्र
त्यङ्ङुदेषि मानुषान्॥ प्रत्यङ् विश्वं स्वर्दृशे॥ येना पावक चक्षसा भुरण्यंतं जनाँ अ
नु॥ त्वं वरुण पश्यसि॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः॥ पश्यंजन्मा
नि सूर्य॥ सप्त त्वा हरितो रथे वहंति देव सूर्य॥ शोचिष्केशं विचक्षण॥ अयुक्त स
प्त शुंध्युवः सूरो रथस्य नप्त्यः॥ ताभिर्याति स्वयुक्तिभिः॥ उद्वयं तमसस्परि
ज्योतिष्पश्यंत उत्तरं॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं॥ उद्यन्नद्य मित्र
मह आरोहन्नुत्तरां दिवं॥ हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ शुकेषु मे हरि
माणं रोपणाकासु दध्मसि॥ अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥ उदगा
दयमादित्यो विश्वेन सहसा सह॥ द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं॥ अ
भि त्यं मेषं पुरुहूतमृग्मियं॥ चित्रं देवानामिति षडृचस्य सूक्तस्यांगिरसः कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स ऋषिः ॥ सूर्यो देवता ॥ त्रिष्टुप् छंदः ॥ सूर्य उपस्थाने जपे विनियोगः ॥ ॐ चि भट्टी०
त्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी अंत
रिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ सूर्यो देवीमुषसं रोचमानां मर्यो न योषा
मभ्येति पश्चात् ॥ यत्रा नरो देवयंतो युगानि वितन्वते प्रति भद्राय भद्रं ॥ भद्रा
अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ॥ नमस्यंतो दिव आ पृष्ठ
मस्थुः परि द्यावापृथिवी यंति सद्यः ॥ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वित
तं सं जभार ॥ यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ तन्मित्र
स्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ॥ अनंतमन्यद्रुशदस्य पाजः
कृष्णमन्यद्धरितः संभरंति ॥ अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता नि
रवद्यात् ॥ तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ तच्च ५२
क्षुरित्यस्य वसिष्ठ ऋषिः ॥ सूर्यो उष्णिक् सूर्योपस्थाने विनियोगः ॥ ॐ तच्चक्षु
रध्यायस्यादित्यं कनकभूषितं ॥ स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ गोत्रो राम
व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यारणं ॥ मध्यान्हिकसंध्यांसुवतींरक्तांगींरक्तकुंचस्त्राभरणभूषितां ॥ रुद्राणी
रुद्रदेवसांदवृषभस्कंधसमारूढां त्रिशूलहस्तंउाक्षसूत्रश्वेतकमंडलुहस्ताआल
नुत्यांभिश्चतुर्दशविद्याभिःपरिवृत्तांयजुर्वेदमुदाहरंतिकैलासात्सूर्यमंडलान्म
मध्येसुमच्चक्षुषीचक्षुषोर्वल्लेवस्त्राप्राणप्राणादेन्तर्यामिनमाविरीतीसावि
श्रीश्रीरुद्राणीमावाहयामि ॥ आयातिसादिप्रालःसंध्यावत्समापयेत् ॥ ॥ अ
थसायंसंध्या ॥ प्रातःसंध्यावत्कार्यातत्रविशेष ॥ सायंसंध्यामुपासिषेउलि
संकल्पः ॥ अग्निश्चेतिसूर्यऋषिः ॥ अग्निमामन्युपत्तयादेनाप्रकृतिष्ठंदः ॥ आ
चमनेविनियोगः ॥ ॐ अग्निश्चमामन्युश्चमन्युपत्तयश्चमन्युकृतेभ्यः ॥ पाप
भ्योरक्षंतांयदन्हापापमकारिषंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्न्या ॥
अहस्तदवलुंपतुयत्किंचदुरितंमयि ॥ इदमहमाममृतयोनौसत्येज्योतिषि ॥
उत्साहे ॥ सायंकालेसरस्वत्यांस्तर्पणंकृविष्य ॥ वसिष्ठऋषिः ॥ विष्णुर्देवता ॥
जगतीछंदः ॥ स्वःपुरुषंतर्पणेविनियोगः ॥ स्वःपुरुषंतर्पयामि ॥ सामवेदं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मउत्न॰॥॥वेदस्वरूपिणी॰॥परमात्मानं॰॥सरस्वती॰॥वेदमातरं॰॥साकृती॰॥
संध्यां॰रुद्रचिरां॰॥वेदमयी॰उषर्ज्ञी॰॥निर्मक्षी॰सर्वार्थसिद्धिकरी॰॥सर्वमंत्रा भट्टी॰
धिपतिं॰ॐभूर्भुवःस्वःपुरुषंतर्पयामि॥ ॥अथध्यानं॥सायेसंध्यांकृष्णारु
क्माङ्गीकृष्णवस्त्राभरणभूषिता॥वैष्णवीविष्णुदेवसागरुडस्कंधसमारूढान
रुद्राक्षसूत्रनीलकमलहस्ताआत्मतुल्याभिश्चतुर्दशविद्याभिःपरिवृता॥सा
मवेदमुदाहरंति॥बदरीकाश्रमात्सूर्यमंडलात्द्रुमध्येभ्रूमध्याच्चक्षुषेर्वलेव
लाप्राणंप्राणादंतर्यामिनमाविर्भूतीसरस्वतीनाम्नीवैष्णवीमावाहयामि॥
व्यासः॥प्रसन्नुरेवोपविष्टस्त्रकुशवृत्यांसमाहितः॥प्रणव्याहृतियुगांगायत्री
चजपेत्ततः॥ऋषीणामासनंदृष्टीत्यमरः॥ततायामीत्यस्यमंत्रस्यरुतनःशो
पोवरुणस्त्रिष्टुप्॥वरुणोपुरस्थाने॥ॐतत्वायामिब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः॥अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ ५७
जातवेदसइत्यादिपूर्ववत्॥रकांदा॥नचावन्द्यककर्माणिकार्याणिप्रतिवासरं॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नाने संध्या जपो होमः स्वाध्यायो देवतार्चनं ॥ वैश्वदेवं तथातिथ्यं नवमं पितृतर्प
णं ॥ नच गोप्यानि यान्यत्र मुनेतानि निरामय ॥ जन्मर्क्षं मैथुनं मंत्रो गृहच्छिद्रं च वं
चनं ॥ आयुर्द्धनापमानस्त्री सप्रकाश्यानि सर्वथा ॥ पैशुन्यं परदाराश्च द्रोहः क्रो
धानृताप्रियाः ॥ द्वेषो दंभश्च माया च स्वर्गमार्गार्गलानि हि ॥ अथाभिवादनविधिः ॥
हारीतः ॥ जपयज्ञजलस्थं च समित्पुष्पकुशानलान् ॥ उदपात्रं च भैक्ष्यान्यं वहन्तं ना
भिवादयेत् ॥ याज्ञवल्क्यः ॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि ॥ ततोभि
वादयेद्वृद्धानसावहमिति ब्रुवन् ॥ आयुष्मान्भव सौम्येति प्रसकृत् ॥ अत्र पादग्रह
णं नास्ति ॥ संग्रहे यस्य दज्ञानजानाति स्वानं त्रिपुरुषं कुलं ॥ कन्यादानेन मस्कारं
श्राद्धं तस्य न दापयेत् ॥ स्मृत्यर्थसारे ॥ ज्येष्ठं चाथ कनिष्ठं वा संध्यांते वाभिवाद
येत् ॥ वर्जयेत्स्नूतं शिष्यदोहि नंदहितुः पतिं ॥ त्रिवर्षपूर्वः श्रोत्रियोभिवा
द्यः अत्रिवर्षाः संबंधिनश्च ॥ अन्यवर्णोनरदा ॥ श्रोत्रियाः सदाचाराश्चाभि
वाद्याः ॥ मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं वनरमंतं जंभमाणं च कुर्वन्तं दंतधावनं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभ्यक्तशिरसं स्नातं कुर्वंतं नाभिवादयेत् ॥ देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदं भट्टी॰
डिनं ॥ नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ॥ इत्यभिवादनविधिः ॥ अथ द्रव्यशु
द्धिः ॥ पाराशरः ॥ काकश्वानावलीढं तु गवाघ्रातं खरेण वा ॥ स्वल्पमन्नं त्यजेद्वि
प्रः शुद्धिर्द्रोणाढके भवेत् ॥ मार्जारमक्षिकाकीटपतंगकृमिदर्दुरः ॥ मेध्यामेध्यं
स्पृशंतोपि नोच्छिष्टं मनुरब्रवीत् ॥ तांबूले क्षुफले चैव भुक्तस्नेहानुलेपने ॥ मधु
पर्के च सोमे च नोच्छिष्टं धर्मतो विदुः ॥ याज्ञवल्क्यः ॥ गोघ्रातेन्ने तथा केशमक्षिका ने
कीटदूषिते ॥ सलिलं भस्म मृद्वापि प्रक्षिप्तव्यं विशुद्धये ॥ शाटाः ॥ पिपीलिकादयु ॥
उ स्वच्छं गुंजकाकासे पात्रं तु रक्तमं तेलकं घृतं ॥ चाडालो ये रक्तसंस्पृष्टं प्रोक्षणं
शुद्धिरिष्यते ॥ मनुः ॥ उच्छिष्टेन च संस्पृष्टं धान्यं वस्त्रं तथापि वा ॥ प्रोक्षणादेव शु
द्धिः स्यात्सुनः पाकेन मृन्मयं ॥ याज्ञवल्क्यः ॥ सौवर्णरजताम्राणामूर्ध्वपात्रं ग्रहाश्म ५४
नां ॥ शाकरज्जुमूलफलवासोविदलचर्मणां पात्राणां चमसानां वारिणा शुद्धिरिष्यते ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्तस्य मस्य च सस्नेहपात्रण्युष्णेन वारिणा निर्लेपकांचनं भांडमद्भिरेव विशु
ध्यति ॥ माधवीये ॥ महीस्पृष्टागतं तोयं याश्चाप्यन्या हि विप्रुषः ॥ भुक्तोच्छिष्टं त
थाप्येहं नोच्छिष्टं मनुरब्रवीत् ॥ अस्यार्थः ॥ उच्छिष्टतोयं महीस्पृष्टां विप्रुंस्पृश
न्ति तदुष्टं न भवन्ति मुखं निःसृताः बिंदवः अन्यअन्यस्य गात्रे तु तदुच्छिष्टं न भव
न्ति ॥ गंडूषं पादशौचं च कृत्वा वै कांस्यभाजने ॥ षण्मासं भुवि निक्षिप्योद्धृत्य
पुनराहरेत्तु ॥ मनुः ॥ कारस्पृष्टानि वस्त्राणि प्रोक्षितानाशुचीन वै ॥ तैलेन चर्म
शुद्धिः स्याद्दाज्यमाज्येन शुध्यन्ति ॥ प्रोक्षणाद्भूमिशुद्धिः स्याद्भस्मना मपि सर्व
दा ॥ योगी ॥ पुत्रासि सलकपात्राणां क्षाराम्लोदकवारिभिः ॥ भस्मभिः कांस्यलो
हानां शुचिः शाद्रवस्य तु ॥ क्षारोदकेन अम्लोदकेन वारिणा चेत्ति ॥ ग्रावाग्रा
नामिकां स्यानि ग्रहोच्छिष्टानि यानि च ॥ शुध्यंति दशभिः क्षारैः श्वकाकोपहता
नि च ॥ प्रोक्षणेनैव शुद्धिः स्यात् हकूलं चैव कंबुले ॥ प्रक्षालनेन वस्त्रस्य संपर्केस्य
तन्के रजेनीलपटे जलतत्के गावश्चांडालमंदिरे ॥ पंचगव्येन ॥ भिक्षान्नेप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भट्टी०

वित्राणां दनाइनुः ॥ द्रव्यत्नरगतानि स्त्रीनदुष्यन्ति करा च न ॥ कें वल्ले ५ हस्तस्रेचु
नील्लदोषेन विधुते ॥ ७ अद्भिरल्लप्रोक्षणे शौचं बहूनां धान्यवाससां ॥ प्रक्षालये
स्वल्पानां ७ अद्भिः शौचं विधीयते ॥ ८ तेस्पृष्टं राचस्पृष्टस्पृष्टं मूत्रपुरीषयोः ॥ ८
जस्वलादिसंस्पृष्टं अविकं तु सदा ऽशुचिः ॥ घृतस्य नवनीतस्य वा ७ आढकप्रमा
णस्य च काकादिदुष्टस्य दुष्टांशमुद्धृत्य तज्जातीयेनान्येनांशं पूरयित्वा ५ नीशाना
ध्यवस्त्रेण परिशोध्य गायत्र्याभिमंत्रितजलाभ्युक्षणाच्छुद्धिः ॥ तत्कृते तु क्षीर
दध्यादेर्द्रोणप्रमाणानां काकाद्युपहतौ घृतवच्छुद्धिः ॥ नवनीतघृततैलं शौद्रसा
दिभांडस्थं चेत्प्लाव्य विप्रभांडे ॥ क्षिप्तं बहु शुद्ध्येत् ॥ नवनीतं घृतं चां ७ अल्पेन प्र
मादेन पृष्ठं जल्लं क्षिप्त्वा उद्धृत्य शुध्येत् ॥ द्रोणप्रमाणं अन्यून नवनील घृतादीनां द्रो ५५
णप्रमाणन्यूनत्व आदीनां च शूद्रोच्छिष्टापहतौ परित्यागो नापदि ॥ आपदि तु पू
र्वोक्तविधिभिः शुद्धिः ॥ मुखकेशकीटकादिदर्शनो निष्ठ्य व्यंजनं प्रक्षिप्येष
तं प्राश्या श्नीयात् ॥ ८ स्पर्शकालं तथा स्नानं द्रव्येद्रव्यप्रयोजनं ॥ ७ प्रपत्निमव

राम

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थानं च ज्ञात्वा शौचं प्रकल्पयेत् ॥ द्रव्याणां केवलं सर्वेषां शुद्धिरस्य वचनं स्मृतं ॥
उत्सवनं चात्रैव स्यात् नरिल पात्रे रेचनं मधः ॥ स्नेहवद्रसानां शुद्धि ॥ उरस्थानां
त्यागः ॥ अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधापकर्षणात् ॥ अमेधा शरीरजाः मला
च सा शुक्लादयः ॥ च सा शुक्रमसृक् मज्जा मूत्रं विट्कर्णविण्मुखात् ॥ श्लेष्माश्रुदू
षिका स्वेदो द्वादशैते नराणां मलाः ॥ लेपाकगंधापकर्षपर्यं शौचममेध्यं लिप्तस्य
ति ॥ गौतमः ॥ अमेध्यत्वं चैषां देहात् ॥ येते मलाच्युताः इति वचनात् ॥ देहाच्यु
त इति वचनात् ॥ देहाच्युतानामेव न तु स्थानावस्थितानां पुरुषस्य नाभेरूर्ध्वं क
रच्युतिरिक्तांगानाममेध्यस्पर्शे स्नानं ॥ स्कंदे ॥ मनुष्यास्थि शवं विष्टामार्तवं मू
त्रं रेतः सीमज्जकं शोणितं स्पृष्ट्वा परस्परं स्नानमाचरेत् ॥ तान्येव स्वानि संस्पृश्य
प्रक्षाल्याचम्य शुध्यति ॥ तथोर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते ॥ तत्र स्थानम
तु स्नात्वा प्रक्षाल्याचम्य शुध्यति ॥ वाक्शास्त्रमबुनिर्णिक्तमज्ञातं च सदा शुचि ॥
याकशास्त्रं ब्राह्मणवचनं ब्राह्मणवचनेन यत्किंचित् शुक्लभयनीयमर्थं ॥ अवनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्यक्प्रक्षालनं॥प्रक्षालनेनैयत्किंचिछुद्धंभवतीत्यर्थः॥भुक्तानं॥काकाधुपह
तंकदाचिदपित्तेनस्नायतेतछुद्धिः॥तेः॥शातातपः॥असेरपिहतेकूपेरवानो भट्टी०
व्यादिकेतथा॥तत्रस्नात्वाचपीत्वाचप्रायश्चित्तंनविद्यते॥श्वकाकोष्ट्रखरोलूक
रग्राम्यपक्षिणां॥अजादिरेणुसंस्पर्शादायुर्लक्ष्म्याभ्यहीयते॥चर्वणेसाचमेन्नि
त्यंमुक्त्वातांबूलंचचर्वणं॥तांबूलग्रहणंकुर्यात्पल्लक्षणार्थं॥तथाहशातातपः॥
तांबूलेचफलेचैवभुक्तस्नेहावशिष्टके॥दन्तलग्नस्यसंस्पर्शेनोच्छिष्टोभवेत्ति
द्विजः॥स्मृतिरथ्याकर्दमयतोयेनष्ठीवनाद्येनवायुना॥नाभेरूर्ध्वंनरःस्पृष्टःसद्यः
स्नानेनशुध्यति॥अथभूशुद्धिः॥भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा॥
शोषात्खननाच्छुपादृहंमार्जनंलेपनात्॥मार्जन्यांपांसुतृणादिनामुत्सार
णमार्जनं॥दाहस्तृणकाष्ठाद्यैः॥कालोयावताकालेनलेपादिक्षयोभवेत्तावत्कालं॥ ५६
गोक्रमणंगवांपादपरिघटनं सेकः क्षारगोमूत्रगोमयवारिभिः॥उल्लेखनंत
क्षणंखननंलेपोगोमयवारिभिः॥एतैर्मार्जनादिभिः॥समस्तैर्व्यस्तैर्वा॥अ

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेध्या दुष्टा मलिनाश्च भूमिः ॥ शुध्यन्ति ॥ देवलः ॥ यत्र प्रसूयते नारी म्रियते
दह्यते पि वा ॥ चांडालाध्युषितं यत्र यत्र विष्ठादिसंगतिः ॥ एवं कश्मलभूयिष्ठा
श्व भूरमेध्या प्रकीर्तिता ॥ श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत् ॥ अंगारतुषके
शास्थिभस्माद्यैर्मलिनो भवेत् ॥ अमेध्या दुष्टमलिनेति त्रेधा पंचधा चतुर्धा मु
च भूरमेध्या च शुध्यति ॥ दुष्टाश्चिला त्रेधा द्वेधा शुध्यते मलिन एकया ॥ यत्र मनु
ष्या दह्यन्ते यत्र चांडालैरध्युषितं तयोः पंचभिर्दहनकालगोक्रमणसेकोल्लेख
नैः शुद्धिः ॥ यत्र मनुष्या जायंते यत्र च म्रियंते यत्र चासंतं विष्ठादिसंगतिस्तासां
दाहवर्जितैरेतैश्चतुर्भिः शुद्धिः ॥ श्वखरसूकरखरैश्चिरकालमध्युषितायाः ॥ क्र
मेण दोकोल्लेखनैस्त्रिभिः उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमध्युषितायाः ॥
सेकोल्लेखनाभ्यां शुद्धिः ॥ अंगारतुषादिभिश्चिरकालमधिवासितायाः उल्ले
खनेन शुद्धिः ॥ मार्जनानुलेपनेन तु सर्वत्र समुच्चीयते ॥ गृहे मार्जनानुलेपनाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुध्यति ॥ गृहस्य पृथगुपादानमार्जनानुलेपयोः ॥ प्रतिदिवसमाप्स्यर्थं ॥ भद्दी०
॥ ॥ अथ तीर्थविधिः ॥ स्कंदे ॥ चित्तमंतर्गतं शुद्धं तीर्थस्नानेन तस्य किं ॥ दानं शो
प्यथ जलैर्धौतं सुराभांडमिवाशुचिः ॥ दानमिज्या तपः शौचं तीर्थसेवा श्रुतं त
था ॥ सर्वाण्येतानि तीर्थानि यदि भावो हि निर्मलः ॥ ज्ञानह्रदे ध्यानजले रागदो
षमलापहे ॥ यः स्नाति मानसे तीर्थे स याति परमां गतिं ॥ तस्मान्दोमेषु तीर्थे
षु मानसेषु च निःसृताः ॥ उभयेष्वपि यः स्नाति स याति परमां गतिं ॥ इति ग
हदुपारवृत्तः ॥ संतुष्टो येन केनचित् ॥ अहंकारविमुक्तश्च स तीर्थफलभुक् ते ॥
अकोपनो मलमतिः सत्यवादी दृढव्रतः ॥ आत्मोपमश्च भूतेषु स तीर्थफलम
श्नुते ॥ अश्रद्दधानाः पापात्मा नास्तिकोच्छिन्नसंशयः ॥ हेतुनिष्ठश्च मलिनः ५८
पंचैते तीर्थफलभागिनः ॥ तीर्थान्यनुसरन्धीरः श्रद्दधानः समाहितः ॥ कृतपा
पो विशुध्येत किं पुनः शुद्धकर्मकृत् ॥ न परीक्षो द्विजस्तीर्थेषु नार्थी भोज्य एव च ॥

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सक्तुभिः पिंडदानं च चरुणा पायसेन वा ॥ कर्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडे
न च ॥ तिलकल्केन चैपण्याक इस्मरः ॥ श्राद्धं तत्र तु कर्तव्यमर्घ्यावाहनवर्जि
तं ॥ अकालेप्यथवा काले तीर्थे श्राद्धं च तर्पणं ॥ अविलंबेन कर्तव्यं नैव विघ्नंस
माचरेत् ॥ तीर्थं प्राप्य प्रसंगेन स्नानं तीर्थे समाचरेत् ॥ स्नानजं फलमाप्नोति ती
र्थयात्राश्रितं न तु ॥ नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् ॥ यथोक्तफलदं ती
र्थं भवेच्छुद्धात्मनां नृणां ॥ षोडशांशं स लभते यः परार्थेन गच्छति ॥ अथ तीर्थफ
लेन स्त्री - - - - नाभिगच्छति ॥ कुशप्रतिकृतिं कृत्वा तीर्थवारिणि मज्जयेत् ॥ म
मज्जयेच्च यमुद्दिश्य सोऽष्टभागं लभेत वै ॥ तीर्थोपवासः कर्तव्यः शिरसो मुंडनं त
था ॥ शिरोगतानि पापानि यांति मुंडनतो यतः ॥ अक्षारयित्वा वपनं प्रायश्चित्त
न निर्दिशेत् ॥ केशसंरक्षणार्थाय द्विगुणं व्रतमाचरेत् ॥ यदान्हि तीर्थप्राप्तिः स्या
त्तदान्हि पूर्ववासरे ॥ उपवासस्तु कर्तव्यः प्राप्तान्हि श्राद्धदो भवेत् ॥ एतत्काशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयं ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ केशेषु तानि तिष्ठन्ति भ०टी०
तस्मात्केशान्वपाम्यहं ॥ महापापोपपापाभ्यां केशलोमनखादिजाः ॥ क्षुरा
दिच्छिन्नेस्सर्वांगारखे दोषाः पतन्ति च वपने मन्त्रे ॥ अग्न्यागारे गवां गोष्ठे देवब्रा
ह्मणसन्निधौ ॥ स्वाध्याये भोजने चैव पादुकाः परिवर्जयेत् ॥ मनुः ॥ तीर्थेषु ब्रा
ह्मणं चैव न परिक्षेत्कदाचन ॥ अन्नार्थिनमनुप्राप्तं भोजयेन्मनुरब्रवीत् ॥ गत्वा
प्रायश्चित्तं यथाशास्त्रं यथाद्दोदशाद्वाद्वैमर्हके ॥ आदौ गोमिथुनं दद्यात्प्रायश्चित्तं च
तुर्विधं ॥ कारयेघृततः श्राद्धं चित्तशाठ्येन कारयेत् ॥ दरिद्रो जपतार्थत्वाछुद्रा
दीनां जपं चिना ॥ ततः स्नानं प्रकुर्वीत मृत्तिकागोमयादिभिः ॥ भस्मनाचततः ५८
कुर्याज्जकायविशुद्धये ॥ महापापोपपापाभ्यां नानायोनिषु यत्कृतं ॥ बाल्यभावा
दियसापं नानावस्थास्वयत्कृतं ॥ हिंसानिंदादिजं पापं परद्रोहादिकं मया ॥ द
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हाभिमानजंपापंसर्वदायन्मयोकृतं ॥ भूतंभव्यंचयत्पापंभाविष्यंचैवगोत
मी ॥ शुश्रूमाईचयत्पापंज्ञानताज्ञानतोकृतं ॥ मनसाकर्मणावाचायत्पापंतुम
याकृतं ॥ तस्मादशेषपापेभ्यस्त्राहिगोतमिसर्वदा ॥ निष्पापोस्म्यधुनादेवित्वत्प्र
सादान्नचनान्यथा ॥ प्रायश्चित्तंकृतंगंगे गांप्रार्थ्यस्नात्वाहियत्नतः ॥ इतितीर्थवि
धिः ॥ अथदेवतार्चनविधिः ॥ तत्रभूतशुद्धिः ॥ धर्मकंदज्ञाननालैश्वर्याष्ट
दलेवैराग्यकर्णिकाढ्यहृदयांभोजंमुकुलीतंनध्यात्वाप्रणवेनविकसितंकृत्वा
तत्कर्णिकास्थेचैतन्यात्मकंजीवंमूलप्रणवोच्चारणेनसुषुम्नानाडीमार्गतो
निर्गमंतंजीवंद्वादशांतेऽखिलसहस्रदलकमलेनिविष्टपरमात्मनासहैकीकृ त्म
त्यस्वशरीरकल्मषंजातंपुरुषाकारंवामकुक्षौविचिंत्य ॥ शोषणदाहनप्लावना
नीत्थंकुर्यात् ॥ तत्रब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदा
युक्तंगुरुतल्पकटिद्वयं ॥ तत्संयोगीपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊह्म॰ माणं रक्तश्मश्रुविलोचनं गरुडं चर्मधरं कृष्णं कुक्षौ पापं विचिंतयेत् ॥ एवं पा भद्दी॰
पपुरुषं कुक्षौ ध्यात्वा पापपुरुषं नाभिप्रदेशस्थितषट्कोणषड्विंदुलांछितवह्नित्रि
५९ कोणं स्वस्तिकलांछिताग्निमंडलांतःस्थितरमित्यग्निबीजं तत्स्थिताग्निना
दाहयित्वा तत्र दक्षिणनासापुटान्निःसार्य भ्रूमध्यस्थायर्द्धचंद्राकारपद्मलांछि
तशुक्लवर्णामलमंडलांतःस्थितवमिति वीजोत्थितामृतधारया निष्कल्मषं स्व
शरीरमाप्लाव्य शुद्धं कृत्वा द्वादशांतःस्थितपरमात्मा नासहस्थितपरमात्मानं
तेन सह सुषुम्नामार्गेण पूर्वोक्तहृदयकमले प्रणवेन स्थापयेत् ॥ एवं प्रकारेललरे
णान्याभूतशुद्धिरुच्यते ॥ वायुनासापुटसमीपे वायुमंडलस्थं वायुं ध्यात्वा तं
वामनासया आकृष्य यंवीजोच्चारणे शरीरस्थदोषजातं संशोष्य दक्षिणना ५९
सया निर्गमय्य दक्षिणनासापुटसमीपे अग्निमंडलस्थं अग्निं ध्यात्वा तम
ग्निं दक्षिणनासया आकृष्य अग्निवीजोच्चारणेन शरीर[illegible]दोषजातं द
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्ध्वा वामरंध्रनासापुटात् निर्गम्य ॥ ब्रह्मरंध्रस्थितं पूर्णचंद्रमंडलं स्वच्छामृतधारा
कारेण सुषुम्नामार्गाच्छरीरांतः प्रविश्य शरीरं प्लावयेत् ॥ तिष्ठ मंत्र बीजोच्चार
णं कृत्वा प्रणवेन यावच्छक्ति निरोधः प्राणायामत्रयं प्रणवार्थं चिंतनं कुर्यात् ॥ एवं भूत
शुद्धिं कृत्वा प्राणप्रतिष्ठां कुर्यात् ॥ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋष
यः ॥ ऋग्यजुःसामानि छंदांसि चैतन्यभूता परा प्राणशक्तिर्देवता ॥ ॐ मिति बी
जं ॥ स्वाहेति शक्तिः ॥ आमिति बीजं क्रोमिति शक्तिः ह्रमिति बीजं ईमिति शक्तिः ॥
चैतन्यप्रसादार्थं जपे विनियोगः ॥ ॐ अं कं खं गं घं ङं आकाशवायुअग्निजल
पृथ्वितत्त्वात्मने आं अंगुष्ठाभ्यां नमः ॥ ॐ इं चं छं जं झं यं शब्दस्पर्शरूपरसगंधा
त्मने इं तर्जनीभ्यां नमः ॥ ॐ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने उं मंम
ध्यमाभ्यां नमः ॥ ॐ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां
नमः ॥ ॐ ऋं पं फं बं भं मं वचनादानगमनविसर्गानंदात्मने ऋं कनिष्ठिकाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम्. नमः ॥ ॐ अं कं खं गं घं ङं आकाशवायवग्निजलपृथ्वीतत्वात्मने आं हृदयाय भ.टी०
नमः ॥ ॐ ईं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा ॥ ॐ टं ठं
६० डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् ॥ ॐ एं तं थं दं धं नं वा
क्पाणिपादपायुपस्थात्मने ऐं कवचाय हुं ॥ ॐ ओं पं फं बं भं मं वचनादानगमनविस
र्गानंदात्मने औं नेत्रत्रयाय वौषट् ॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुध्यहं
कारचित्तविज्ञानात्मने अः अस्त्राय फट् ॥ ध्यानं ॥ रक्ताम्बोधिस्थपोतोल्लसदरुण
सरोजाधिरूढा कराब्जैः ॥ पाशं कोदण्डमिक्षूद्भवगुणमथ मप्यंकुशं पंचबाणान्
नु ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा
भवतु सुखकरी प्राणशक्तिः परा नः ॥ एवं ध्यात्वा जपेत् ॥ ॐ आं ह्रीं क्रों अं यं रं लं ६०
वं शं षं सं हं सोहं हंसः ॥ मम प्राणा इह प्राणाः ॥ मम जीव इह स्थितः ॥ मम सर्वेंद्रिया
णि आकाशवायुअग्निजलपृथिवीशब्दस्पर्शरूपरसगंधश्रोत्रत्वक्चक्षुर्जि
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्वाघ्राणवाक्पाणिपादत्वंपायूपस्थवचनादानगमनविसर्गानंदमनोबुध्यहं
कारचित्तविज्ञानात्मनेअस्त्रायफट् ॥ ध्यानं ॥ रक्ताब्धिस्थपोतोल्लसदरुणस
रोजाधिरूढाकराग्रै ॥ पाशंकोदंडमिक्षूद्भवमथमप्यंकुशंपंचबाणान् ॥ विभ्रा
णासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखक
रीप्राणशक्तिःपरानः ॥ एवंध्यात्वाजपेत् ॥ ॐआंह्रींक्रौंयंरंलंवंशंषंसंहोहं
सः ॥ ममप्राणइहप्राणाममजीवइहस्थितः ममसर्वेंद्रियाणिआकाशवायुःअ
ग्निजलपृथिवीशब्दस्पर्शरूपरसगंधतत्वज्ञानानिइहैवागत्यसुखंचिरंतिष्ठं
तुस्वाहा ॥ सोहंहंसंषंशंवंलंरंयंक्रौंह्रींआं ॥ ॐ ॥ इतिप्राणप्रतिष्ठामंत्रः ॥ १ ॥
ऊसेवंभूतशुद्धिंकृत्वादेवतार्चनमारभेत् ॥ तत्रदेवताक्रमः ॥ संग्रहे ॥ शांभोमध्यग
तेहरिहरभूदेव्योहरेशंकरभास्यनागरक्तारयोहरगणेशाजांबिकास्थापिताः ॥
देव्यांविष्णुहरैकदंततरवयोल्बोदरेजेश्वरे ॥ नार्याशिंकरभागतस्त्वशुभदाव्यस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्म॰ स्त्कले हानिदः ॥ ग्रंथांतरे ॥ सूर्ये मंदेताच्युत शार्ङ्गिरुद्राश्चिघ्नेशांशाक्षीश्वरा विष्णु भ॰टी॰
सूर्याः ॥ श्रीनाथविघ्नेशभवांबिकेशाः श्रीखंडीशाहरं चपलेगहस्ताः ॥ श्रीशंभुसूर्या
६१ च्युतयांबुजस्ताः प्रदक्षिणं मध्यविदिक्षु पूज्याः ॥ स्वस्थानगः सर्वमनोरथान्यः
सर्वविनिघ्नं परत्र सोस्थाः ॥ अथ प्रयोगः ॥ आचम्य प्राणानायम्य तिथ्यादि सं
कीर्त्य चतुर्विधपुरुषार्थसिध्यर्थं निसभूलंदेयार्चनमहं करिष्ये ॥ स्वस्य पुरतः
शंखं संस्थापयेत् ॥ दक्षिणभागे गंधतुलस्यादि पात्राणि संस्थापयेत् ॥ वामभागे
जलपूर्णकलशं तत्ददीपश्च दक्षिणतः तेलदीपो वामतः प्रयोगः ॥ पुरस्तात्केश
वः पातु चक्री जांबूनदप्रभः पश्चान्नारायणः पातु शंखी जीमूतसन्निभ ॥ ऊर्ध्वे पा
तु गदाधारी माधवो नीलपमप्रभः ॥ दक्षिणे पातु गोविंदो धन्वी चंद्रसमप्रभः ॥
वामे पातु हली विष्णुः पद्मकिंजल्कसन्निभ ॥ अरविंदाभ आग्नेयां मुशली मधुसू ६१
दनः ॥ त्रिविक्रमोथ नैर्ऋत्यां खड्गी जलस्यावकसन्निभ ॥ वायव्यां वामनो वज्री नैर
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्या द्विसहस्रीमिमान्॥ ईशान्यां पुंडरीकाक्षः श्रीधरः पद्मिनायुधः॥ विघ्नसभोद्ध
षीकेशो घधरस्ताद्विविमुद्दरी॥ हस्तमे पद्मनाभो मे सहस्रार्कसमप्रभः॥ सर्वायु
धः सर्वशक्तिः सर्वज्ञः सर्वतोमुखी॥ इंद्रगोपकसंकाशपाशहस्तोपराजितः॥ स्व
वोस्याभ्यंतरे देवो व्याप्य दामोदरः स्थितः॥ इदं सर्वत्र निश्छिद्रं नामद्वादशपंजरं॥
प्रविष्टोहं न मे किंचिद्भयमस्ति कदाचन॥ अथ कलशाभिमंत्रणं॥ सर्वे समुद्राः स
रितः तीर्थानि जलदा नदाः॥ आयांतु देवपूजार्थं दुरितक्षयकारकाः॥ गंगे च य
मुने चैव गोदावरि सरस्वती॥ नर्मदे सिंधु कावेरी जलेस्मिन्सन्निधिं कुरु॥ गंधपु
ष्पं निक्षिप्य॥ सुरभिमुद्रां प्रदर्श्य प्रणवेन शंखमापूर्य॥ शंखं चंद्रार्कदैवत्यं वरु
णं चाधिदैवतं॥ पृष्टे प्रजापतिस्तत्र अग्रे गंगासरस्वती॥ त्वं पुरा सागरोत्पन्नो
विष्णुना विधृतः करे॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते॥ पांचजन्यानि
जन्मध्यानमधस्तपातकसंचयं॥ त्राहि मां नरकं घोरं संसारार्णवपतितं॥ शंखमुद्रा

रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुध्म॰ प्रदर्श्यगंधपुष्पंनिक्षिप्यशंखोदकेनपुष्पाणांस्नानंचप्रोक्ष्य॥पीठार्चनंकुर्यात्॥ मही॰
आधारशक्त्यादिभ्यःपीठदेवताभ्योनमः॥इंद्रादिभ्योलोकपालेकपालेभ्योनमः॥
६२ दुर्गादिगणपतिक्षेत्रपालेभ्योनमः॥आदित्यादिनवग्रहदेवताभ्योनमः॥अथ
सूक्तन्यासः॥ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृ
त्वात्यतिष्ठद्दशांगुलं॥१॥इतिवामहस्ते॥पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं॥उतामृत
त्वस्येशानोयदन्नेनातिरोहति॥२॥इतिदक्षिणहस्ते॥एतावानस्यमहिमातोज्या
यांश्चपूरुषः॥पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि॥३॥इतिवामपादे॥ॐ
त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साशनानश
नेअभि॥इतिदक्षिपादे॥४॥तस्माद्विराळजायतविराजोअधिपूरुषः॥स
जातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥इतिवामजानवेनमः॥५॥यत्पुरुषे ६२
णहविषादेवायज्ञमतन्वत॥वसंतोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः॥६॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्ति दक्षिणजानुनि ॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अय
जंत साध्या ऋषयश्च ये ॥ इति वामकट्यां ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदा
ज्यं ॥ पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ इति दक्षिणकट्यां ॥ ८ ॥ तस्मा
द्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
इति नाभौ ॥ ९ ॥ तस्माद्यज्ञादश्वा अजायंत ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मा
त्तस्माज्जाता अजावयः ॥ इति हृदये ॥ १० ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ इति कंठे ॥ ११ ॥ ब्राह्मणोऽस्य मुखमा
सीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ इति वामबाहौ
॥ १२ ॥ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चाग्निश्च प्रा
णाद्वायुरजायत ॥ इति दक्षिणबाहौ ॥ १३ ॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः
समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ इति मुखे ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ६म॰ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञं तन्वाना अबध्नन्पुरु भ॰दी॰
षं पशुं ॥ इति सक्थ्नी ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह
६३ नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ इति मूर्ध्नि ॥ अथ षडंगन्या
सः ॥ अतो देवा इति षडर्चस्य मेधातिथिऋषिः ॥ विष्णुर्देवता गायत्री छंदः ॥ ष
डंगन्यासे विनियोगः ॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधा
श्रे मभिः ॥ इति हृदये ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढमस्य पांसुरे ॥ इति
शिरसि ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ इति
शिखायां ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥ इति
कवचं ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ इति नेत्रयोः ॥
तद्विप्रासो विपन्यवो जागृवांसः समिंधते ॥ विष्णोर्यत्परमं पदं ॥ इत्यस्त्रं ॥ इति ष
डंगन्यासः ॥ देवेपि न्यासं कुर्यात् ॥ तथा च ॥ यथात्मनि तथा देवे न्यासं कुर्यात्समा ६३
हितः ॥ आरामाउत्तमा पूजा वनपूजा च मध्यमा ॥ अधमा याचिता पूजा ग्रीक्रिता राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्क ओं भवेत् ॥ अथ षोडशोपचाराः ॥ आवाहनं ॥ आसनं पाद्यमर्घ्यमाचम
नं तथा ॥ स्नानं वस्त्रोपवीतानि गंधपुष्पं च धूपकं दीपं नैवेद्यं ताम्बूलं प्रदक्षिण
विसर्जनं ॥ स्वर्णराजतताम्राणां सर्वेषामर्घ्यभाजनं ॥ शिवसूर्यौ परित्यज्य न्यनारवो
न्यत्र प्रशस्यते ॥ ततः षोडशोपचारैः पूजयेत् ॥ सहस्रशीर्षेत्यावाहनं ॥ पुरुष
एवेदंस्यासनं ॥२॥ एतावानस्येति पाद्यं ॥३॥ त्रिपादूर्ध्वस्यार्घ्यं ॥ तस्माद्विराडित्या
चमनं ॥ यत्पुरुषेणेति स्नानं ॥ तं यज्ञमिति वस्त्रं ॥ गायत्र्याचमनीयं ॥ तस्माद्य
ज्ञात्सर्वहुतः संभृतमित्युपवीतं ॥ तस्माद्यज्ञात्सर्वहुत ऋचः ॥ इति गंधं ॥ तस्माद
श्वा अजायंतेति पुष्पं ॥ यत्पुरुषमिति धूपं ॥ ब्राह्मणोस्येति दीपं ॥ चंद्रमा मनसेति
नैवेद्यं ॥ गायत्र्याचमनीयं ॥ नाभ्या आसीदिति तांबूलं ॥ सप्तास्यासन्निति प्रदक्षि
णा ॥ यज्ञेन यज्ञमिति विसर्जनं ॥ शालिग्रामे स्थावरे च नावाहनविसर्जने ॥ शा
लिग्रामशिलायां च नित्यं संनिहितो हरिः ॥ स्नापयित्वार्चयेद्देवं यदिच्छेत्पुण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु.स. मात्मनं ॥ नेष्टिकायां न पाषाणे नायसे नापि चर्मणि ॥ भंगलग्ने च जीर्णे च व भ.टी.
स्त्रे देवेन दापयेत् ॥ प्राप्नोति नरकान् घोरान् कृत्वा मूढो नराधम ॥ स्नाने वस्त्रे
६४ चैनैवेद्ये दद्यादाचमनीयकं ॥ मन्मये भिन्नपात्रे च पाषाणे लोहकाष्टजे ॥ पुष्ठे
चैकरभूमौ स्कन्ने नैवेद्यं नैव दापयेत् ॥ सौवर्णं राजतं ताम्रं कांस्यं पाद्मपत्रकं ॥ श्री
नैवेद्याज्यपात्रं च पात्रं विद्धि मारतिप्रियं ॥ अथ पूजाक्रमं ॥ मुखे पुष्पांजलिं
दत्वा गणेशा[illegible]र्चनं भवेत् ॥ गणेशं च मुख्यश्चात्तन्ने स्कंदं क्रमाच्चैव त ॥ अग्नि
धाने ॥ गणेशाद्यास्समभ्यर्च्य शिवो वा विष्णुं प्रपूजयेत् ॥ अर्चयेच्च शिवः पश्चा
च्छिवमाद्यं तु वैष्णवः ॥ अतो विष्णुं न तो दुर्गां ये ये चैवं स्यादर्चनं क्रिया ॥ बुद्धं च
परित्तिष्ठ ॥ नांगुष्ठेर्मर्दयेदेवं नाधः पुष्पैः समर्चयेत् ॥ करायेन निक्षिपेत्तोयं ६५
वज्रपात समं भवेत् ॥ पवित्रं च विष्णुनैवेद्यं स्कंदरसिद्धर्षिभिः स्मृतं ॥ अन्यदेव
स्यनैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शालग्रामस्य संप्राप्ताः सर्वे यांति पचिन्नतां ॥ यो र्चयेद्विधिवद्भक्त्या परान्नीतं
अवसाधनैः ॥ पूजाफलार्थमेतस्य न समग्रफलं भवेत् ॥ एकं विनायके कुर्याद्द्वे रव
येत्रीणि शंकरे ॥ चत्वारि केशवे दद्यात्समाश्वत्थप्रदक्षिणात् ॥ अथ पराधा गुधा
राहं ॥ द्वात्रिंशत्तत्र मुक्त्वा वराहं विष्णुनादिता ॥ तिर्यक्पुंड्रधरो मर्त्यो स्पृष्टस्तादेव
तार्चनं ॥ याचितैः पुष्पैः पूर्वार्घं यः करोति ममार्चनं ॥ अप्रक्षालितपादो यः प्र
वेशन्मम मंदिरे ॥ मेम दृष्टे रात्रिमिसुरव्यनातांबूलं चर्वयेत् यः ॥ कोरुभस्त्री
कमत्स्यो भक्षयेन्मनसेवकः ॥ उच्चैः कंपको नारात्रे पुष्पकार्ये ममार्चनं ॥
मम्चार्चामास्फुरे कोल्ये यः करोति विमूढधीः ॥ अवहेम वस्य प काल्यो मत्यं चिनि
वेदयेत् ॥ अवेक्षमपुष्पपत्रैर्मम पूजां विधातियः ॥ वातमूत्रनिरोधेन मत्स
ज्ञोकुरुते नरः ॥ नखवादकरत्सपन्नं कुरुते मम मानवः ॥ कृत्वा वालमनाचम्य तथा
प्रारतकेन ॥ पीठासनोपरि तिष्ठन् पूजयेद्वारासनः ॥ मन्मये धूपदहनं दीप
यः कुरुतेर्चने ॥ मत्पूजकोनकुरुते तत्तुपूजां दायिनी ॥ मत्पूजकः सौचद्वेषीमन्दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्म· कनराधमाः॥भूताष्टम्योर्नकुर्वन्तेनक्तंनहरिवासरं॥परस्परिधानंयसद्वरि भद्री·
धायार्चयन्तेमां॥अपूजयित्वाविघ्नेशंभाप्यवकपालिनं॥क्रुद्धोयत्कर्मकुरुते
९५ त्रिकालार्चनविभ्रष्टस्तु॥अंधकारस्मशानमायः संभाष्यचरजस्वलां॥याम
हस्तेनैवमांकृत्वास्तपनंयदिमूढधीः॥महापराधान्जानीहिद्वात्रिंशन्तस्समाप्ति
तान्॥अन्येप्युगालिनाउक्ताः॥यानेनेशणपादुकेर्वापिगमनंभगवद्गृहे॥
देवास्ताग्रगर्भसेवाच॥अप्रमाणस्तदग्रन॥उच्छिष्टेनैववंदनंचभगवद्वंदनादि
कं॥एकहस्तप्रमाणश्च पुरस्तात्प्रदक्षिणा॥पादप्रसारणंचाग्रेतथापर्यंक
कंधनं॥शयनंभक्षणंचैवमिथ्याभाषणमेवच॥उच्चैर्भाषितोजल्पोवारोगद
नानिग्रहः॥अनुग्रहावग्रहौचैवस्त्रीषुचक्रूरभाषणं॥कंबलावरणंचैवपरनिंदा
परस्तुतिः॥अश्लीलभाषणंचैवअधोवायुविमोक्षणं॥शक्तौगौणोपचार ९५
श्चअनिवेदितभक्षणं॥तत्तत्कालोद्भवानांचफलादीनामतर्पणं॥विनियुक्ता
वसिष्टस्यप्रदानंव्यंजनादिकं॥पृष्टीकृत्यासनंचैवपरेषामभिवादनं॥गुरौ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोनं त्रिजे स्तोत्रं देवतानिंदनं तथा ॥ अपराधास्तथा विस्माद्वात्रिंशत्सरिकी
र्तिताः ॥ शालिग्रामशिलातोयं मपीत्वा यस्तु मस्तके ॥ प्रक्षेपणं प्रकुर्वीत ब्रह्म
हा स निगद्यते ॥ अथ शिवपूजाप्रकारो वक्ष्यते ॥ तत्र पूजा पंचविधा ॥ अभिगम
नमुपादानमिज्या स्वाध्यायो योग इति पंचरात्रेभिहितं ॥ तत्राभिगमनं नाम देव
तास्थापनं मार्गस्य संमार्जनोपलेपनादि निर्माल्यनिर्हणादिकं नपादानं गंधपुष्पा
दिपूजासंपादनं ॥ इज्या नाम पीठपूजा प्रधानदेवतापूजनं ॥ स्वाध्यायो नामा
र्थानुसंधानपूर्वको मंत्रजपः स्तोत्रपाठो नामकीर्तनं ॥ तत्त्वप्रतिपादकशास्त्राभ्या
सश्च ॥ योगो नाम देवतास्वरूपस्य स्वस्वरूपस्य स्वमूर्तिर्देवतामूर्तिरिति भावना ॥
एवं पंचप्रकारपूजायां सालोक्यसारूप्यसामीप्यसार्ष्टिसायुज्यरूपाणि पंच
फलानि यथाक्रमं भवंति ॥ एतच्च पंचरात्रेभिहितं ॥ एवंविधपूजाउनुष्ठानं
प्रकारोभिधीयते ॥ तत्र ब्राह्मे मुहूर्ते उत्थाप्य कृतावश्यकस्य सकृत्क्रिया ॥ शुद्धस्व
च्छदेवगृहमार्गस्य संमार्जनोपलेपनादिकं कृत्वा देवस्य निर्माल्यमपसार्य पूर्वेद्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्र० नावशिष्टपात्रादिनाभ्यर्च्य नमस्कृत्य यथोक्तासने उपविश्य गुरुं नमस्कृत्य भू भट्टी०
६६ तशुद्धिं कृत्वा अभीष्टदेवतां संचिंत्य सगुरुदेवतैक्यस्वरूपं सच्चिदानंदाद्वयलक्ष
णं परिपूर्णं परब्रह्माहमस्मीति समाधिं कृत्वाग्रे नानुमेहार्थं दिव्यमूर्तिं गृही
त्वा स्वहृदये तिष्ठतीति ध्यात्वा तन्नमस्कृत्य गुणनामानि कीर्तयेत् तीर्थं गत्वा
स्वशाखोक्तविधिना स्नानं कृत्वा ऋष्यादिस्मरणपूर्वकं मूलमंत्रेण देवतां संचिं
त्य तत्तीर्थोदकं चमसस्य मलबीजेन प्रणवादिकेन मूलमंत्रेण व्यावर्तयन् शंखमुद्रं
शिरसि अभिषिच्य तीर्थजलेन संमज्ज्य त्रिवारमष्टवारं वा ससीपुटं विधाय ।
आचम्य गोपीचंदनेनोर्ध्वपुंड्रधारणं भस्मना त्रिपुंड्रधारणं वा स्वविधानेन कुर्या
त् । ततः संध्यावंदनादिनित्यकर्माणि कृत्वा मूलमंत्रेण त्रिवारं मार्जनं अष्टा ६६
विंशतिवारं तर्पणं सूर्यमंडलस्थदेवाय द्वादशवारार्थं प्रदानं दशवाराभिः
मंत्रितजलपानं च कृत्वा सूर्यादिनमस्कारं च कृत्वा पूजाद्रव्याणि संपादयेत् ॥
राम

ततो यागमंदिरं गत्वा प्रक्षालित पाणिपादनयना चम्य द्वारि स्थित्वा द्वारद
क्षिणवामपार्श्वयोः ॥ क्रमेण माया महालक्ष्मी संपूज्य तथा गंगायमुने धा
तृधात्तारोपमनिधिद्वारं वनिधी ॥ संपूज्य ऊर्ध्वद्वारवास्तापार श्रियमधः द्वारवा
यां यास्त्रपुरुषमर्चयेत् ॥ एवं पूर्वदक्षिणपश्चिमोत्तरद्वारपूजां कृत्वा चतुर्द्वा
रे पार्श्वयुक्क्रमेण अष्टद्वारपालपूजां कुर्यात् ॥ नंदि महाकाल गणेश्वर वृषभ भृं
गि रिटि स्कंद पार्वती चंडेश्वराः शैवद्वारपालाः ॥ एवं द्वारपालपूजां कृत्वा
प्रणवमुच्चारयन् दक्षिणपादेनीतः प्रविश्य विघ्नकर्तारो भूतसंघाता भवदा
ज्ञया निःसरंत्वस्त्रमुच्चारयन् पार्ष्णिघातत्रयं कृत्वा ॥ तीक्ष्णदंष्ट्र महाकाय कल्पां
तदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ इति क्षेत्रपालानु
ज्ञां लब्ध्वा घोरेणास्त्रेण अष्टदिक्षु रक्षां बध्नीयात् ॥ अघोरेभ्योऽथ घोरेभ्यो घोरघो
रतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ॥ इति रक्षां ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहस्य· ध्यायथोक्तासनेउपविश्य॥गायत्र्याप्राणायाममत्रयंकृत्वागुरुपंक्तीनमस्का भ·दी·
रपूर्वकंप्रणवमातृकाभुवनेश्वरीमूलमंत्रन्यासंकृत्वामेअर्थभूतंगुरुंसर्वेभ्य
६७ रंसर्वात्मकंसत्यज्ञानानंतानंदलक्षणंदेवतात्वंपरंब्रह्मात्वानुग्रहार्थंली
लयापरमेमंगलाकृतिकांसर्वावयवसंपूर्णांसर्वाभरणभूषितां॥समस्तप
रिवारसहितांसकलपुरुषार्थदात्रींतेजोमयीं॥दिव्यमूर्तिंधारयित्वाहृदय
कमलेमध्यितिष्ठंतींविभावयित्वामानसैःसर्वोपचारसहितैःसर्वावरण
सहितांदेवतांआराध्यस्वमूर्तिमपिदेवतामूर्तित्वेनगंधपुष्पादिभिरभ्य
र्च्यअष्टाविंशतिवारंजप्त्वावास्याराधनोपक्रमंकुर्यात्॥तत्रदेवस्ययामभा
गेःप्रक्षालितमूलमंत्रपूरितार्घ्योदककलशंतत्सरि[illegible]रेसंस्थांनिधायदेव क ६७
स्यदक्षिणभागेपत्रपुष्पाक्षतपात्रेगंधादिकंपुरतोविन्यस्यसंरक्षणंसम
र्चयेत्॥जलगतदोषमस्त्रमंत्रादिनिनाददेग्ध्वामनवीजेनयमित्यादि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाराचकरभिमुद्रयाम्रनीकृत्यानमः गंधं स्वाहा पुष्पं वौषट् जोमयं ध्यात्वाहुं व्या
पयित्वा वौषट् ज्ञानदृष्ट्या निरीक्ष्य फट् रक्षीकृत्वा मूलमंत्रेण प्रणवगायत्र्या
ष्टवारमभिमंत्रयेत् ततः छंरवरच्छिद्रं किंचिज्जलं कृत्वा राजलेन मिश्रयित्वा तत्कल
राजलं पूर्वं संरक्ष्य साभिमंत्र्य शंखस्य जलेन पूजासाधनादि पूजलेन प्रणवे
न प्रोक्षयित्वा पूजामूर्तेर्मलापकर्षेण स्नपनं कृत्वा पीठे स्थापयित्वा तत्र पुष्पा
दिकं प्रक्षिप्य पीठपूजां कुर्यात् ततः आदौ देवस्य दक्षिणभागे सर्वदेवतामयं
स्वगुरुं गंधादिभिरभ्यर्च्य तत्स्थाने समस्तगुरुपंक्तिमालापितरौ पूजयित्वा देव
स्य वामभागे गणपतिं यथावदभ्यर्च्य सरस्वतीं दुर्गां क्षेत्रपालाश्चाभ्यर्च्य तत्र
पीठाधोभागे पातालकुद्दालराभयहस्ताय आधारशक्त्यै नमः ततदुपरि महा
कालाय हेमवर्णाय कूर्माय नमः ततदुपरि सहस्रशिरसे शेषाय तवर्णाय नीलां
बरधराय — अनंताय नमः ततदुपरि नीलवर्णाय शंखचक्रगदापद्महस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा°म· पल्लवभिरणभूषितायवराहायनमः॥दंष्ट्रोपरिस्थितायमऊंगेयैत्रीस्वयथशुभ्राभ भही°

५८ यवरहस्तायैपृथ्व्यैनमः॥तदुपरिविचित्रायदिव्यमंडलायनमः॥तत्रस्वर्णवे
दिकायैनमः॥तत्ररत्नसिंहासनायनमः॥तदुग्रावर्त्तिदक्षिणपादरक्तवर्णा
यरषभाकारायधर्मायनमः॥पश्चिमयामवर्णायसिंहाकारायज्ञानायनमः॥
कोणस्तरपीतवर्णायभूतायवैराग्यायनमः॥कृष्णवर्णायगजाकारायैश्व
र्यायनमः॥विचित्रगा~~त्र्यै~~त्रालीकृत्वेनपुरोवर्त्तिदेशमारभ्यप्रादक्षिण्ये
न॥अधर्मायअज्ञानायअवैराग्यायअनैश्वर्यायनमः॥सिंहासनस्योपरि
तल्पकारायअनंतायनमः॥तन्मध्यपद्मायनमः॥पद्मस्यदलकेसरकर्णि
कासुसत्त्वायनमः॥रंरजसेनमः॥तंतमसेनमः॥सूर्यमंडलायनमः॥ ५८
सोममंडलायनमः॥वन्हिमंडलायनमः॥ब्रह्मणेनमः॥विष्णवेनमः॥म
हेश्वरायनमः॥आत्मनेनमः॥अंतरात्मनेपरमात्मनेनमः॥अंनमः॥ॐनमः॥

नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानात्मने नमः इति सर्वं पूर्वं पूजयेत्॥ अनंतरं पूर्वाद्यष्टदलेषु कर्णिकायां च न
वशक्तिः पूजयेत्॥ वामायै ज्येष्ठायै रौद्र्यै काल्यै कलविकरण्यै बलप्रम
थन्यै सर्वभूतदमन्यै मनोन्मन्यै नमः इति पूजयेत्॥ ॐ नमो भगवते सकलगुणा
त्मशक्तियुक्तायानंताय योगपीठात्मने नमः इति मंत्रेण पीठमंत्रः॥ एवं पीठं गं
धादिभिः पूजयेत्॥ एवं पूजिते पीठे स्वहृदयस्थितां मूलमंत्रमूर्तिधारणीं
गुरुस्वरूपां ज्योतिर्मयीं सपरिवारां देवतां ध्यात्वा दीपात् दीपमिव मूर्तिः॥ सकला
ज्ञान्निर्गतां देवतामूर्तिं सुषुम्नानाड्या निर्गमपथेन पुष्पाक्षतसहितेन तन्नामंज
लावानीय मूलमंत्रपूर्वकं सर्वात्मानं सर्वानंतरयामिनं॥ स्वगुरुरूपां भक्तानु
गृहीतविग्रहं ज्योतिर्मयं सर्वमंगलात्मकं सपरिवारं भगवन्तमाराधयामि॥ ग
चिन्हहस्ताभिः कुठारमृगाभयवरांस्कृप्रसन्नो महेश्वरः सर्वात्मकारदीप्तः॥ स
रसिजनिलया व्याघ्रचर्मोत्तरवासः॥ ध्येयो मुक्तापरागामृतरसकलितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रप० द्रिः प्रभः पंचवक्त्रस्त्र्यक्षः स्फारस्फाटाघटित तुहानरोनख्खुलानुगमाल्लः ॥ प १३८।०
६९ चवक्त्रं दशभुजं शुद्धस्फटिकसंनिभं सर्वाभरणसंयुक्तं चित्रांबरविभूषणं ॥
एवं ध्यात्वा आवाहयेत् ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिं
विश्वतो वृत्वात्यतिष्ठद्दशांगुलं ॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो
नमः ॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ सावित्र्या प्रणवेन मू
लमंत्रेण तथा ॥ ॐ भूः महादेवमावाहयामि ॥ ॐ भुवः महादेवमावाहया
मि ॥ स्वः महादेवमावाहयामि ॥ ॐ भूर्भुवः स्वः महादेवमावाहयामि ॥ ॐ
आयातु भगवान्महादेवरुद्रस्सांगानेयं नाभिनंदयन्ति ॥ स्वागतमनुवाम
नी ॥ इत्यावाहनं भगवन्महादेव आयाहि तो भवे सावाहनमुद्रां प्रदर्शयेत् ॥ ६९
ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं ॥ उतामृतत्वस्येशानो यदन्नेनो
त्तिरोहति ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो
मनोन्मनाय नमः ॥ सावित्र्या प्रणवेन मूलेन तथा ॥ भगवते महादेवाय एतदा
सनमकुत्तमंत्रास्तो भगवते महादेवायेन त्रकूर्चं दशानि ॥ भगवायं कूर्चो दर्भस्त्विर
दुरितः सुवर्णरत्नं गुप्तस्वे सत्रस्थानानि कल्पयन्ति अग्रतो ब्रह्मणे कल्पयामि का
लाप कल्पयामि विष्णवे कल्पयामि ॥ दक्षिणस्कंदाय कल्पयामि ॥ विनायकाय ॥
पश्चिमतः भूताय ॥ महाकालाय ॥ उत्तरतः ॥ उमायै ॥ नंदिकेश्वराय ॥ इ
ति कल्पयित्वा आसनं स्थापनं ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो र
रुद्रः प्रचोदयात् ॥ सावित्र्या प्रणवेन मूलेन सान्निध्यं ॥ अघोरेभ्योऽथ घोरेभ्यो
घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ सावित्र्या
प्रणवेन मूलेन रत्नं निरुद्धनं ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधि
पतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवों ॥ सावित्र्या प्रणवेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ०म० मूलेन पूजनं ॥ देवतामूर्तेः पुरस्यास्तं कर्जयित्वा मूलमंत्रपुंजं कृत्वा तद्देवता १२दी०
त्रा मुद्राश्च दर्शयित्वा अर्घ्यपाद्युपकल्पयेत् ॥ तदा चर्घ्यपाद्याचमनमधुपर्कार्थं
७० चत्वारि पात्राण्यानीयास्त्रमंत्रेण प्रक्षालितद्रव्याणि तेषु तेषु पात्रेषु मूलमं
त्रेण प्रक्षिप्य पूर्वोक्ततीर्थजलगंधादिभिः संस्कृत्याभिमंत्रयेत् ॥ तत्र गंधा
क्षतपुष्पं भजिलयवकुशाग्रबिल्वसर्षपदूर्वाश्चाष्टद्रव्याणि अर्घ्यपात्रजले
निक्षिपेत् ॥ दूर्वाविष्णुक्रांताश्यामाकपद्मानि पाद्यपात्रे जातीफलकंकोललवंगा
न्याचमनपात्रे दधिमधु च मधुपर्कपात्रे निक्षिपेत् ॥ एवं चत्वारि पात्राण्यासा
द्यांबोधायनः ॥ सोताविद्यापात्रमभिमंत्र प्रक्षाल्य तिरः पवित्रमप आनीय स
ह पवित्रेणादित्यं दर्शयेदाभिनरस्तां सालरिलरद्रेण पाद्यं दद्यात् ॥ ॐ एतावा ७०
नस्य महिमातो ज्यायांश्च पूरुषः ॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दि
दिवि ॥ ॐ या कुरुद्रा अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवे
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्न० दिविस्टृण्वन्ति भक्षयां। अन्तरिक्षे बहुधा भवन्ति ॥ याः पृथिव्यां पयसोदनुशुक्ता अष्ट०
स्तान आपः शꣳ स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृ
शत त्वचं मे ॥ सर्वाꣳ अग्नीꣳरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥ पवमा
७१ नः सुवर्जनः ॥ पवित्रेण विचर्षणिः ॥ यः पोता स पुनातु मा ॥ पुनन्तु मा देवज
नाः ॥ पुनन्तु वसवो धिया ॥ पुनन्तु विश्व आयवः ॥ जातवेदः पवित्रवत् ॥ पवित्रे
ण पुनाहि मा ॥ शुक्रेण देव दीद्यत् ॥ अग्ने क्रत्वा क्रतूꣳरनु ॥ यत्ते पवित्रमर्चिषि ॥
अग्ने विततमन्तरा ॥ ब्रह्म तेन पुनीमहे ॥ उभाभ्यां देव सवितः ॥ पवित्रेण स
वेन च ॥ इदं ब्रह्म पुनीमहे ॥ वैश्वदेवी पुनती देव्यागात् ॥ यस्यै बह्वीस्तनुवो वी
तपृष्ठाः ॥ तया मदन्तः सधमाद्येषु ॥ वयꣳ स्याम पतयो रयीणां ॥ वैश्वानरो ७१
रश्मिभिर्मा पुनातु ॥ वातः प्राणेनेषिरो मयोभूः ॥ द्यावापृथिवी पयसा पयो
भिः ॥ ऋतावरी यज्ञिये मा पुनीतां ॥ बृहद्भिः सवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्ने दक्षैः पुनाहि मा ॥ येन देवा अपुनत ॥ येनापो दिव्यं कशः ॥ तेन दिव्येन ब्रह्म
णा ॥ इदं ब्रह्म पुनीमहे ॥ यः पावमानीरध्येति ॥ ऋषिभिः संभृतं रसं ॥ सर्वं स पू
तमश्नाति ॥ स्वदितं मातरिश्वना ॥ पावमानीर्यो अध्येति ॥ ऋषिभिः संभृतं
रसं ॥ तस्मै सरस्वती दुहे ॥ क्षीरं सर्पिर्मधूदकं ॥ पावमानीः स्वस्त्ययनीः ॥ सु
दुघा हि पयस्वतीः ॥ ऋषिभिः संभृतो रसः ॥ ब्राह्मणेष्वमृतं हितं ॥ पावमानी
र्दिशंतु नः ॥ इमं लोकमथो अमुं ॥ कामान्समर्द्धयंतु नः ॥ देवीर्देवैः समाभृताः ॥
पावमानीः स्वस्त्ययनीः ॥ सुदुघा हि घृतश्चुतः ॥ ऋषिभिः संभृतो रसः ॥ ब्रा
ह्मणेष्वमृतं हितं ॥ येन देवाः पवित्रेण ॥ आत्मानं पुनते सदा ॥ तेन सहस्रधा
रेण ॥ पावमान्यः पुनातु मां ॥ प्राजापत्यं पवित्रं ॥ शतोद्यामं हिरण्मयं ॥ ते
न ब्रह्मविदो वयं ॥ पूतं ब्रह्म पुनीमहे ॥ इंद्रः सुनीती सह मा पुनातु ॥ सोमः
स्वस्त्या वरुणः समीच्या ॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मर्ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्र० यं स्वा पुनातु ॥ सावित्र्या प्रणवेन मूलेन देवस्नापयित्वा मूलेनाचमनं ॥ बोधाय भद्री०
न ॥ स्नापयित्वा भिक्षितर्पयति ॥ ॐ भवं देवं तर्पयामि ॥ शर्वं देवं तर्पयामि ॥ ई
७२ शानं देवं तर्पयामि ॥ पशुपतिं देवं तर्पयामि ॥ रुद्रं देवं तर्पयामि ॥ उग्रं देवं त
र्पयामि ॥ भीमं देवं तर्पयामि ॥ महान्तं देवं तर्पयामि ॥ तर्पयित्वाथेत्तानि ॥ मू
लेनाचमनं ॥ ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अयजन्त
साध्या ऋषयश्च ये ॥ सावित्र्या प्रणवेन मूलेन वस्त्रं ॥ मूलेनाचमनीयं ॥ ॐ त
स्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्या
श्च ये ॥ सावित्र्या प्रणवेन मूलेन यज्ञोपवीतं ॥ बोधायनः ॥ वस्त्रयज्ञोपवीता
चमनीयानि ॥ उदकेन व्याहृतिभिर्दत्वा ॥ मूलेनाचमनं ॥ मूलेनाभरणानि ७२
सर्वांस्तेन भगवते कल्पयामि ॥ मूलमंत्रपूर्वकं कल्पयित्वा पुनः पादुकां सम
र्पणं ॥ प्रार्थनापूर्वकं यागमंडपं देवमानीय सिंहासनरच्छपमे समुपवेश्य
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छत्रचामरव्यजनंगीतवाद्यनृत्यादीनिकल्पयित्वा॥बोधायनंव्याहृति
भिः॥प्रदक्षिणमुदकंपरिषिच्य॥तस्माद्यज्ञात्सर्वहुतऋचःसामानिज
ज्ञिरे॥छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत॥नमस्तेरुद्रमन्यवउतो
तइषवेनमः॥नमस्तेअस्तुधन्वनेबाहुभ्यामुततेनमः॥सावित्र्यामूलप्र
णवेगंधं॥ईशानंत्वाभुवनानामभिश्रियं॥स्तोऊरवृतरस्पचीरं॥हविघृषा
णस्पत्नीऽअभिभूरसि॥जहिरात्रूंऽरपमृधोनुदस्व॥इत्यक्षतंदधातु॥
तस्मादश्वाअजायंतयेकेचोभयादतः॥गावोहजज्ञिरेतस्मात्तस्माज्जा
ताअजावयः॥सहस्राणिसहस्रशोयेरुद्राअधिभूम्यां॥तेषांऽसहस्र
योजनेवधन्वानितन्मसि॥इतिपुष्पंदधातु॥सावित्र्याप्रणवेनबिल्वं
अमृतोद्भवं॥श्रीवृक्षोमहादेवप्रियांसदा॥स्वामिप्रसीदपरमेश्वर॥
प्रकाशिकायांचंदनागरकर्पूरपंचकात्मकंगंधंपूर्ववत्कल्पयित्वातुल्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्प० व सीबिल्वपत्रपद्मपत्रजातीरक्तोत्पलनीलोत्पलचंपकमल्लिकायूथिकाक भट्टी०
रवीरादिसुगंधपुष्पादिविनिर्मितोनिमाल्यांकल्पयित्वाचरणपूजांकुर्यात्॥
७३ तत्रदेवस्यदक्षिणपश्चिमोत्तरदिक्षुपरमलोमध्यदेशेच्चतसुरपोघास्तनघो
आनवामेशानान्यजेत्॥इदमाद्यावरणं॥तत्रांगावरणं॥पुरोवर्त्तिदक्षि
णकोणेहृदयंवामकोणेशिरः॥दक्षिणकोणेकोणांतरेशिखावामकोणां
तरेकवचं॥पुरस्तान्नेत्रंचतुर्दिक्षुअस्त्रंपूजयेत्॥एवंसर्वांगदेवतास्त्री
रूपाःप्रध्यानदेवतापरिवारत्वेनपूजयेत्॥हरिलस्फटिकातसीपुष्पांजन
पिंगलचान्हिवर्णाःषडंगदेवताः॥एवंमंगावरणं॥द्वितीयं॥ततोष्टदले
षुप्रागादिक्रमेण॥अनंतायसूक्ष्मायशिवोत्तमायएकनेत्रायएकरुद्रा ७३
यत्रिमूर्तयेश्रीकंठायशिखंडिनेनमइतिपूजयेत्॥एततृतीयं॥उमायै
चंडेश्वरायनंदिनेमहाकालायगणेश्वरायवृषायभृंगिरिटयेस्कंदा राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनमः इति चतुर्थं ॥ देवस्य पुरोभागमारभ्य ॥ इंद्र अग्नियम निर्ऋति वरुण
वायु कुबेर ईशाना अष्ट दिक्षु क्रमेणाभ्यर्च्याधस्तात् ऊर्ध्वी वानां लं हिरण्यगर्भं यजे
त् ॥ इंद्राय पीतवर्णाय ऐरावतनाय वज्रहस्ताय सुराधिपतये नमः ॥ अ
ग्नये रक्तवर्णाय मेषवाहनाय शक्तिहस्ताय तेजोधिपतये नमः ॥ यमाय नील
वर्णाय महिषवाहनाय दंडहस्ताय प्रेताधिपतये नमः ॥ नैर्ऋतये कृष्णवर्णा
य नरवाहनाय खड्गहस्ताय रक्षोधिपतये नमः ॥ वरुणाय श्वेतवर्णाय मक
रवाहनाय पाशहस्ताय वार्याधिपतये नमः ॥ वायवे धूम्रवर्णाय मृगवाहना
य ध्वजहस्ताय प्राणाधिपतये नमः ॥ कुबेराय शुभ्रवर्णाय अश्ववाहनाय
गदाहस्ताय यक्षाधिपतये नमः ॥ ईशानाय स्फटिकवर्णाय वृषवाहनाय
त्रिशूलहस्ताय भूताधिपतये नमः ॥ अनंताय शुभ्रवर्णाय कूर्मवाहनाय
चक्रहस्ताय नागाधिपतये नमः ॥ एवं प्रत्नान्लोकपालान् पूजयित्वा इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फल

७४

पंचमं ॥ कल्याय रात्मेयै दंडाय चरखड्गाय पाशाय अंकुशाय गदाय त्रिशूलाय भद्दी०
पमायपनमः इति षष्ठं ॥ आवारणभूतायुधमूर्तये स्त्रायुधस्त्रों ॥ छिन्नमुण्डधरा
स्त्रायुधहस्तायपुरुषाकाराज्ञेया ॥ यसुरषव्यदधुः कृतिधाय्यकल्प्यतन्न ॥ मु
खं किमस्य कौ बाहू काउरू पादाउच्येते ॥ सावित्र्याधूपं ॥ ब्राह्मणोस्य मुखमा
सीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ उद्दीप्यस्व
जातवेदोपघ्नं निर्ऋतिं मम ॥ पशूंश्च मह्यमावह जीवनं च दिशो दिश ॥
इति दीपं ॥ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चाग्निश्च
प्राणाद्वायुरजायत ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
कदलीफल शर्करा घृतसंयुक्तपायसादि भक्ष्यभोज्यद्धानि कामनोत्मकने ७४
वेद्यानि सपरिवाराय भगवते महादेवाय कल्पयामीति कल्पयित्वा भगव
न्देवाज्ञनपर्यंतं अखंड सुखसंविद्रूपेण निजस्वरूपबोधक महादेवा नामाव राम

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततं ॥ छत्रं चामरं व्यंजनं नरस्य ॥ गीतवाद्यानि वैदिकं पौराणिकं प्राकृतस्तोत्र
पाठं च कृत्वा ॥ स्थित्वा प्रदक्षिणा नमस्कारांश्च कृत्वा गायत्र्या मूलेनाचमनं ॥ चा
णा रावण्य चंडीशनंदी भृंगिरिटाद्यः ॥ सदाशिवप्रसादेन सर्वं गृह्णंतु ॥ भवा
दिनित्यं उभागं दद्यात् ॥ मूलेन कौटिल्ये ॥ चरुत्वोषण्ण नामधेयैरष्टाहुतीर्जु
होति ॥ भवाय देवाय देवाय स्वाहा ॥ सर्वाय देवाय ॥ ईशानाय ॥ पशुपतये ॥
देवाय ॥ रुद्राय देवाय ॥ उग्राय देवाय ॥ भीमाय देवाय ॥ महते देवाय ॥
मूलेन पौराणिकेन पुष्पं ॥ नीराजनं प्रदक्षिणा ॥ अष्टाभिर्नामधेयैरष्टौ पुष्पा
णि दद्यात् ॥ भवाय देवाय नमः ॥ शर्वाय देवाय ॥ ईशानाय ॥ पशुपतये देवाय ॥
रुद्राय देवाय ॥ उग्राय देवाय ॥ भीमाय देवाय ॥ महते देवाय ॥ ब्रह्मणे न
मः ॥ विष्णवे नमः ॥ स्कंदाय नमः ॥ विनायकाय ॥ भूतनाथाय नमः ॥ महाकाल्या
य ॥ उमायै ॥ नंदिकेश्वराय ॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु.ध्म. तः॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकां अकल्पयन् ॥२१॥ इति नाभ्यूलं ॥ मूर्ध्नेन भट्टी.
श्रोत्रेनेनीराजनं ॥ चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्ये
७५ जोंसि आर्तिक्यं प्रतिगृह्यतां ॥ सप्तास्यासन्परिधयः त्रिःसप्त समिधः कृताः ॥
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं ॥२२॥ इति दक्षिणा ॥ यज्ञेन यज्ञमयजंत
देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे सा
ध्याः संति देवाः ॥२३॥ इति विसर्जनं ॥ अत्र च शिष्टैर्गंधमाल्यैर्ब्राह्मणान् संपूज्य
शिष्टैर्गंधमाल्यैरात्मानमलंकृत्याथ ऋग्यजुःसामाथर्वणभिः स्तुवंति ॥
भगवत्प्रसादसिध्यर्थं मूलमंत्रमष्टोत्तरशतमष्टोत्तरसहस्रं वा जप्त्वा स्तुत्वा
तेन मानुष्टानमुपसंहारमुद्रया उपसंहरेत् ॥ ॐ सहस्राणि सहस्रशो ये
रुद्रा अधिभूम्यां ॥ तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ अस्मिन्म
हत्यर्णवेंतरिक्षे भवा अधि ॥ तेषां ॥ नीलग्रीवाः शितिकंठाः शर्वा अधः ७५
राम

क्षमाचराः ।। तेषा ।। नीलग्रीवाः शितिकंठा दिवं २ रुद्रा उपश्रिताः ।। ते षा १० ।।
ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ।। ते ०।। ये भूतानामधिपतयो विशि
खासः कपर्दिनः ।। ते ०।। ये अन्नेषु विविध्यंति पात्रेषु पिबतो जनान् ।। ते ०।।
ये पथां पथिरक्षय ऐलबृदा यव्युधः ।। ते ०।। ये तीर्थानि प्रचरंति सृकावंतो नि
षंगिणः ।। ये वनान्युपसर्पंति तेभ्यो वृष्टिर दाय ले ।। ते ०।। ये ग्राम्यानुपसर्पंति
तेभ्यो वृष्टिमुपासते ।। ते ०।। य एतावंतश्च भूयांसश्च दिशो रुद्रा वितस्थि
रे ।। तेषां २ ।। नमो रुद्रेभ्यो ये पृथिव्यां येंतरिक्षे ये दिवि येषामन्नं वातो वर्षमि
षवस्तेभ्यो दश प्राचीः ।। ०।। इत्यनुवाकं जप्त्वा उत्तरान्यांश्च रौद्रान्मंत्रान्जप्यात् रौ
द्रीसूक्तं ।। ॐ भूर्भुवः स्वर्महरों नमो भगवते महादेवाय चरुद्वासयामि नीच मुद्वास
न कालेनाः ॐ भूर्महादेवमुद्वासयामि ।। ॐ भुवः महादेवमुद्वासयामि ।। ॐ स्व
रों महादेवमुद्वासयामि ।। उद्वास्य प्रयातु भगवानीशः सर्वलोकपरायणः ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुस्म॰ अनेनहविषानुष्टः पुनः पुनः तेदर्शनायचोनि ॥ प्रतिमास्थानेष्वस्वावा महा॰
७६ हनविसर्जनंवर्जेत्सर्वसमानंमहत्वस्यनमिसाचदर्शने ॥ महत्वस्यन
मिसाचक्षत्तद्‌स्याहवोधायनः ॥ साधुवासाधुवा कर्मयघुदाचरितंमया ॥
ततसर्वंभगवञ्चंभोगृहाणाराधनंपरं ॥ इतिभगवन्तेसमर्पयेत् ॥ मूलमंत्रेण
सर्वात्मनेपरिवारायभगवतेनमः ॥ इतिपुष्पांजलिंकृत्वामुहुर्मुहुः ॥ प्रवरस्य
मूलमंत्रमुच्चार्यसर्वांतर्यामि भगवन्ममहृदयंप्रविश्य देवमानसेरूप
चारैरभ्यर्च्यतदनुज्ञयातत्प्रसादंलब्ध्वासर्वेलोकेप्रेरितमितिसर्वविक्रियेप्रव
र्तयेत् ॥ एवंप्रवर्तमानायभगवान्सर्वान्पुरुषार्थान्ददाति ॥ शिवार्चनेप्रशंसं
तिगुनंदिकेश्वरः ॥ यःप्रदद्यात्गवांलक्षंदोग्ध्रीणांवेदपारगे ॥ एकाहमर्चयेत् ७६
ल्लिंगंतस्यपुण्यंततोधिकं ॥ स्कंदे स्कंजयेत्येयस्तुभगवंतमुमापतिं ॥ अस्य
श्वमेधाधिकंफलंभवन्तिभूस्फुराः ॥ देवार्चनाकरणेदोषः ॥ कूर्मपुराणे ॥ यो
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोहादथवालस्याद्दत्वा देवतार्चनं ॥ भुंक्ते स याति नरकं श्वकेषु पिशाय
ते ऽ नि ॥ इति शिवार्चनप्रकरणं ॥ अथ पुष्पाध्यायः ॥ मदनपारिजाते नारसिं
हपुराणे ॥ पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैः
प्रोक्षितैर्जंतुवर्जितैः ॥ आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं ॥ माधवीया
च दंकुरस्तं च रक्षामि नस्यागमांकुर ॥ देवतापूजनार्थाय प्रार्थये त्वां वनस्पते ॥ इति
पुष्पग्रहणमंत्रः ॥ हरिरित्युपलक्षणं ॥ पुष्पग्रहणे ऽभोक्तं ॥ शमीपुष्पं बिल्वं च
पुष्पं चंपकं नागरं तथा ॥ करवीरं तथाश्वेतं पालाशं कुशपुष्पकं ॥ वनमालाप्य
शोकं च सेवंती कुब्जमालती ॥ अग्निस्तंभ्य च तथाश्वेतं कुमुदं शतपत्रकं ॥ मल्लि
कां चैव जातीं च सर्वपुष्पाद्विशिष्यते ॥ जातिपुष्पसहस्रेषु यस्मिन्नाम्नुभरा
भितात् ॥ चिह्नमेवविधियन्रत्यानरस्य पुण्यफलं शृणु ॥ कल्पकोटिसहस्राणि
कल्पकोटिशतानि च ॥ वसेत् द्विष्णुपुरे श्रीमान्विष्णुतुल्यपराक्रमः ॥ अपामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्ण० गंभिंगराजं द्रामीपत्रंचरत्यादिर॥दूर्वांकुशादातपत्रं द्रामामरत्नकंतथा॥नतः अ०१०
श्रेष्टंबिल्वपत्रंततश्चतुलसीचरे॥संक्रांत्यापक्षयोरंते द्वादश्यांनिशिसंध्य
७७ योः॥तुलसीयविचिन्वंतितेचिन्वंतिहरेःशिरः॥एतेषांचयथालाभंपत्रैर्यश्चा
र्चयेद्धरिं॥सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते॥येषांनसंतिपुष्पाणिप्र
शस्तान्यर्चयनेहरेः॥पल्लवान्यपितेषांस्युःशस्तान्यर्चाविधौहरेः॥वीरुधा
नामभावेतुबर्हिषाचार्चयेद्धरिं॥अपराधसहस्राणिअपराधशतानिच॥
पभनेकेनदेवशाक्षमतेहेत्नयार्चितः॥अगस्तीवृक्षसंभवैः कुसुमैरसि
तेःसितैः॥येर्चयंतिचदेवेशंतेप्राप्ताःपरमंपदं॥स्वर्णकेतकीपत्रेयोददाति
जनार्दने॥कोटिजन्मार्जितंपापंदहतेगरुडध्वज॥सहस्रकुंदपुष्पैर्हेलं ७७
याहरेर्चितः॥सप्तजन्मानिदेवर्षेतस्यलक्ष्मीर्नहिंस्यति॥वस्त्राणीतत्करान्नी
तंस्वयंपतितमेवच॥ ...पत्रैराणीतंतस्यपूजाचनिष्फला॥स्मृतिसारे॥
राम

कुंभीपुष्पंतुदेवेशेवर्षंयःप्रयच्छतिकेशवे॥सुवर्णपलमात्रंतुपुष्पात्पुष्पेभवेन्नृणां॥
अपामार्गंशमीदूर्वाचतुर्थंभृंगिराजकं॥नदद्यात्केशवेसूत्तसनिद्राभृंगोहिआ
यतः॥ स्कंदपुराणे॥धात्रीफलेनयत्पुण्यंजपेस्यात्समुपोषणे॥स्वर्गंदुरेवेद्य
भत्तेनमस्यंतुलसीपूजने॥यथाकथंचिदात्तैस्यपुष्पैःसंपूजयेद्धरिं॥नाके
पृष्ठमथाघ्रातिनात्रकार्याविचारणा॥अन्यायतनजातानिकंटकानितथैव
च॥रक्तान्यकालजातानिचैत्यरक्षोम्नरानिच॥स्मशानजातपुष्पाणिदा
नेदेवेपिवर्जयेत्॥अर्कशाल्मलीशिरीषकपित्थविभीतकस्यंदनारकोरण्डका
दीनिहरेर्वर्जयेत्॥कुमुरारव्यस्यपुष्पाणिदानदेवेपिवर्जयेत्॥अर्कंतथा
धत्तूरकस्यच॥कुसुंचकुंदजंचार्कंनैवदेयंजनार्दने॥कूकुरःकरवीरः॥
गृहेजातंयत्करवीरंतंनदेयमित्यर्थः॥उक्तंचवाराहे॥बंधूकंकरवीरंचन
गृहेरोपयेत्क्वचित्॥ ॥इति॥अथशिववर्ज्यानि॥प्रासाददीपिकायां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्ण॰ जपाबद्धुकस्तिहूरं तथा नैरसंधिकौभे ॥ मालूतीकेनकायूथीमालूतीकुंजर १४टी०
७८ जातिच ॥ बवरीशतपत्री च तथा चक्षुमुदह्वये ॥ आनीतं नार्पयेद्धि भोप्रसा
दादपि दोषकृन्न ॥ देवीपुराणे ॥ शिवे स्वर्जयेत्कुंदं मुन्मत्तं च हरे स्सदा ॥ दे वी
नां चार्कमंदारा आदित्ये नगरं तथा ॥ विष्णुपुराणे ॥ नशुष्कैः पूजयेद्वि
ष्णुं कुसुमैर्न महीगतैः ॥ ना विशीर्णदलेर्मुक्तैर्न चैवाकुकाश्रितैः ॥ बेला
द्विकाश्रितानीत्यर्थः ॥ जलं पृथु बिल्वस्याज्यं पात्राणि कुसुमानि च ॥ तु
लस्याः ग्रस्तिविच्छेदं न वर्ज्यं जान्हवीजलं ॥ स्नानं रु चानुये कश्चित्पुष्पं
श्चिन्वंति ये द्विजाः ॥ देवतास्तं न गृह्णंति भस्मी भवति दारवत् ॥ स्ना ७८
नेन विनाकर्मस्वनधिकारास्नानं कृत्वेति निषेधात् मध्यान्ह स्नानविषया
नतु प्रातःस्नानविषयः ॥ देवालये निमुक्तस्य हंति पुण्यं पुराकृतं ॥ तस्मा
त्सर्वप्रयत्नेन देवधानानि वर्जयेत् ॥ अक्षतैर्नार्चयेद्विष्णुं न तुलस्या ग राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेश्वरं ॥ दूर्वाभिर्नार्चयेद्दुर्गां नकेतक्या महेश्वरं ॥ कुंदं शंभोश्च नोदद्यान्नो
न्मत्तं गरुडध्वजे ॥ पीडजातीं च नादद्याद्देवीमर्केण नार्चयेत् ॥ बिल्वप
त्रं शमीपत्रं पत्रं भृंगारमेव च ॥ केतकीजातिपुत्रं च सद्यस्तुष्टिकरं ह
रेः ॥ सर्वेषां कलिकावर्ज्या ॥ तथा चोक्तं ॥ मुकुलैर्नार्चयेद्देवं विना कमल
कुड्मलैरिति ॥ कुमलो मुकुलोस्त्रियामित्यमरः ॥ कुंभिकापत्रमेकं तु तुलसी
दलमंजरी ॥ सकृद्दत्वा हरेर्मूर्ध्नि गोयुतस्य फलं लभेत् ॥ तुलसीजन्मानसी
संघातं केशवप्रिये ॥ केशवार्थे विचिन्वामि वरदा भव शोभने ॥ तुलसीग्रह
णमंत्रः ॥ या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुःपावनी रोगाणामभि
वंदिता निरसनी सिक्तांतकत्रासिनी ॥ प्रत्यासत्तिविधायिनी भगवतः
कृष्णस्य संरोपिता ॥ न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥
पूजामंत्रः ॥ संग्रहे ॥ शिविषु धत्तूरकं कांचनाह्वयं द्रोणस्तथा शाल्मली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रम॰ कर्णिकोरे ॥ अर्कमन्त्रेनेगिरिमल्लिकाभिर्नं पूजनीयः कमलनाभिनाथ ॥ भट्टी॰
अथ पर्युषितत्वविधिः ॥ अगस्तिबिल्वपत्राणां जलंभास्रानां तथैव च ॥
७० न पर्युषितदोषास्ति वेथछेदो च बिल्वजे ॥ अथ दिनसंख्या ॥ बिल्वापामा
र्गजातीतुलसीशमीशलाकेतकीभृंगदूर्वा ॥ मंदांभोजाहि दर्भा मुनितिलं
तरवन्तसप्तस्कल्हार मत्स्यः ॥ चंपाश्वारोलिकुंभी मदन मरुबका बिल्वतोहा
निशास्त्राञ्जिशास्येकाशिरीशादधिनिधिवरकभूः भूयमाभ्य एव ॥ अन्ये
षां ग्रंथानरेज्ञातव्या ॥ ॥ इति पुष्पाध्याय ॥ अथासनविधिः ॥ कृष्णाष्ट
म्यां विथथासंभवमुक्तमासनं ग्राह्यं ॥ स्मृतिः ॥ वस्त्रासने यशा प्राप्तिर्दौ ७०
भार्ग्यं भिन्नदारुजे ॥ कृष्णाजिने ज्ञानसिद्धि मोक्षश्री व्याघ्रचर्मणि ॥ व्या
घ्राजिने केवलं भ मोन रक्षापयन्नु ॥ अगस्त्य ॥ वंशारनसदारधुरणीतृण
पल्लवनिर्मितं ॥ आसनं वर्जयेद्धीमानदारिद्र्यं व्याधिदुःखदं ॥ श्राद्धविशेरो राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षुउत्कः ॥ हेमाद्रौ ॥ क्षोमं दुकूलं नेपालं आविकं दारुजं नयाः ॥ नालं वालं च पं
चैव विष्टरास्त्र प्रकाविन्यसेत् ॥ इत्यासन विधिः ॥ ॥ अथ दर्भ विधिः ॥ हरीतः ॥
नभो मासस्य चतुर्दश्यां दर्भास्तत्र समाहरेत् ॥ अयातयामास्ते दर्भा नियो
ज्यास्युः पुनः पुनः ॥ चिद्मुरपि ॥ दर्भाः श्रावणमासस्य सम त्रोस्युः तिलाः
कुशाः ॥ अयातयामास्ते दर्भा नियाज्यास्युः पुनः पुनः ॥ अयातयामाः कु
र्माहाः ॥ अयातयामगानुरसभिस्सपरः ॥ कुशाः काशाः पवादूर्वाउशीराश्च
सकुंदराः ॥ गोधूमा व्रीहयो मुंजा दश दर्भाः स बल्वजाः ॥ कृष्णपक्षे चतुर्द
श्यां मानेनव्या कुशा द्विजे ॥ अकाण्डिकास्तथा स्युष्टा ऊर्ध्वं चिग हिताः ॥
स्नात्वा सुचोदद्वादे शौ कृत्वा चिर्भूत्वा दर्भ देशं गत्वा पादौ प्रक्षाल्याचम्य श्रा
णानायम्य तिथ्यादि संकीर्त्य सर्वानुष्ठान सिद्ध्यर्थं भो दर्भोत्साटनं करिष्ये ॥
इति संकल्प्य ॥ चतुर्दिक्षु ननरं दत्त्वा मंत्रे दर्भान्विसृज्य ॥ ॐ विरिंचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह० भ०॥ नास्सहोसन्नपरमेष्ठीनिसर्गजः॥नुदस्वर्वाणिपापानिममस्वास्तिकरोभ
वा॥ॐफट्इतिमंत्रेणोत्पाट्यहुंफट्कारेणसंछिद्यासमुद्धरेत्॥अछिन्ना भ० टी०
८० ग्राअभुग्नाग्रायाःपितृत्वहरितोःकुशाः॥उक्तमंत्रेणप्रथमंसंप्रार्थ्यईशा
न्याभिमुखोभूत्वाहुंफट्कारेणमंत्रेणउत्पाटयेत्॥इत्संगिराः॥अहन्य
हनिकर्मार्थंकुशोत्पाटःप्रशस्यते॥नश्वर्वेंपूर्वंतिकुशायोग्याश्चैवोत्तमेव
चेत्ति॥चिंतामणिस्तु॥मासिमास्यधृतःकुशामासिमास्येवचोदिताः॥
नोत्तरोत्तरमारोषुधर्माविशिष्टरसगता॥आचार्य॥प्राञ्जासात्संभृता
नूदर्भान्वर्जयेत्श्राद्धकर्मणि॥स्मृत्यः समाहृतानश्चरत्ताःकुशास्तुश्राद्ध
कर्मणि॥मासेनभस्यतत्स्यात्दर्भाश्चयामल॥अयातयामास्तेदर्भावि ८०
नियोज्याःपुनःपुनः॥अयातयामानकात्रोनरेमत्र्यनाइस्यर्थः॥अ
ननाभिप्रायेणशेखापिदर्भा॥कृष्णाजिनंमंत्राश्रामणाश्चविशेष
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेः अपालयामासन्यैतानि नियोज्यानि पुनः पुनः ॥ अपालयामासनि पुन
र्वियोगयोग्यानि ॥ हेमाद्रौ ॥ कुशाभावे द्विजश्रेष्ठ काशैः कुर्वीत यत्नतः ॥
तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृताः ॥ यज्ञपार्श्वे ॥ कुशाभावे
तु काशाः स्युः काशाः कुशसमाः स्मृताः ॥ काशाभावे गृहीतव्या अन्या र्भीप ६
योचितं ॥ इत्सनश्राद्धेपि काशायास्त्याज्यत्वमुक्तं ॥ तदुक्तं हेमाद्रौ ॥ हेमात्मकपवि
त्रस्य कृत्वाऽन्नार्हति षोडशीं ॥ इति नष्टशस्य मात्रमेव ॥ तस्माद्यथालाभं ॥
दर्भैरेव कर्मशस्तं भवति ॥ तत्र वर्ज्या नाह शंखः ॥ ये त्वंतर्गर्भिता दर्भा ये
च छिन्नाननखैस्तथा ॥ पथिन ऽग्निदग्धाश्च कुशा न्यत्नेन वर्जयेत् ॥ सं
ग्रहे ॥ चितौ तु ये च ये दर्भा ये दर्भा यज्ञभूमिषु ॥ स्तरणासनपिंडेषु सद्
भिश्च विसृज्जयेत् ॥ स्मृत्यर्थसारे ॥ यैः कृतः पिंडनिर्वापः श्राद्धे वा पितृ
तर्पणे ॥ विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते ॥ नीवीमध्ये स्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ॰ ताम्याज्यायज्ञभोमोक्षितास्तथा॥ प्रयोगसारे॥ ब्रह्मयज्ञे च ये दर्भा ये भट्टी॰
दर्भाः पितृकर्मणि॥ चतुर्भिश्चाभिचारार्थं कुर्वन्कुर्यात्पवित्रकं॥ हस्तेमू
८१ त्रपुरीषाभ्यां लेपास्यागाः विधीयते॥ प्रचेताः॥ उपमायां तु न चाच्छिद्याः कु
शाश्च बलिमिधस्तथा॥ सर्वत्रावस्तिनेस्सामे हिंसया ब्रह्मदाभवेत्॥ अ
र्थनिषिद्धं कुशादन्यज्जातीयात्॥ तथा च जाबालिः॥ कुशाः काशाश्च पु
ष्पाणि गवार्थं च तृणादिकं॥ निषिद्धेपि च गृह्णीयात् दमायास्याहनि द्वि
जेतृ॥ स्मृत्यर्थसारे॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ एकैकं न्यू
नमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥ सर्वेषां वा द्वाभ्यां पवित्रं ग्रथितं नवा॥ त्रि ८१
भिस्तु शांतिके कार्यं पौष्टिके पंचभिस्तथा॥ चतुर्भिश्चाभिचारस्याच्छिन्नं
कामं रितिं के च न॥ द्वौ दर्भौ दक्षिणे हस्ते सव्ये त्रीनासनं कल्पितं॥ सपवि
त्रः सदर्भो वा कर्माचमनं चरेत्॥ नोच्छिष्टंतत्सदर्भेषु श्चभुक्तोच्छि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टं तु वर्जयेत्॥ अत्र यज्ञे जपे होमे अत्र ग्रंथिर्विधीयते॥ भोजने वर्तुलं प्रो
क्तं मध्ये धर्मोपि विधीयते॥ न ब्रह्मग्रंथिना चामेन्न दूर्वाभिः कदाचन॥ संग्रहे॥
ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्॥ आचमे घस्कमाहाद्वा यथा विष्ट
तथैव सः॥ ग्रंथियुक्ते पवित्रेण समाचामति यो द्विजः॥ पितरस्तस्य तस्य वि
त्रं तु पुनराचम्य शुध्यति॥ शंख॥ सन्निसु प्रकुर्वाण्यं तु ब्राह्मणाः स्वय
माहरेत्॥ अप्रदानीतैः कृतैः क्रीतैः कर्म कुर्वन्व्रजस्य ध्रुवं॥ स्मृतिसार॥
कुशा हस्ते अयतेन कुर्यादाचमनक्रिया॥ कुशहस्तेन यो भुंक्ते तस्य संख्या
न विद्यते॥ वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु॥ ततः श्राद्धदिने कर्त्ता
दिशां गच्छेच्च दक्षिणं॥ उत्तीर्य जीर्ण दक्षिणाग्रेण चानु दर्भान्समूलांतो हरेच्छु
चिः॥ ततः स्पष्टधा विभक्तस्यो द्वितीय भागे॥ इति स्मृति संग्रहे पि॥
द्वितीयं हस्तथा भागं तु ग्रहीश्व समाचरेदिति॥ मनुः॥ पवित्रं त्रितीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ० पर्वाणि विभृयात् ॥ होमे तर्पणकाले च पित्र्याहे यज्ञकर्मणि ॥ अगर्भिणस्तु भ० टी०
ये दर्भाः पुत्रदानैर्धनक्षयं ॥ कुर्वंती विशेष ॥ हरिलः ॥ ग्रामहस्ते कुशान्कृ
८२ त्वा समाचामति यो द्विजः ॥ उपस्पृष्टं भवेत्तेन रुधिरेण मलेन चेति ॥ गोभि
लः ॥ उभयत्रास्थितैर्दर्भैः समाचामति यो द्विजः ॥ सोमपानफलं तस्य
भुक्त्वा यज्ञफलं भवेत् ॥ हारीतः ॥ सव्यापसव्ये कुर्वीत सपवित्रो करो यतः ॥
ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत् ॥ इति दर्भविधिः ॥ दर्भाभावे सु
वर्णं रजतं वा विभृयात् ॥ तथा च मनुः ॥ अनामिकां तु करं कुर्यात्सुवर्णरजतैः
कुशैरिति ॥ अत्र सुवर्णावयवेष्वपि सुवर्णत्वाद्रजतावयवेष्वपि च रजत
त्वात्सुवर्णरजतैरिति बहुवचनं स्येकावयविनां गृह्णीयादेद्धरिणोपपत्ति ॥ ८२
किंच ॥ सुवर्णहिरण्ये वर्णास्य भ्रात्यामवतीति विहितं सुवर्णधारस्य
स्ववाच्याच्चगतफलसंबंधादीनां पुरुषार्थत्वावगमादन्यदापि सुवर्ण राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारणं कर्तव्यमित्यवगम्यते ॥ किं च स्रुव(?)र्णधारणे प्रस्वायोपि मनुनाद
धारणं कर्तव्यमित्यवगम्यते ॥ किंच स्रुवर्णधारणे प्रत्यवायोपि मनुनाद
र्शितः ॥ अमोदमस्रुवर्णो गुरुस्वाध्यायमतीर्थकं ॥ चिमुह्याद्दशाभिर्मासैः प
चित्रं मनुरब्रवीत् ॥ दाक्षायणीभ्रमस्त्रीचेणुमान्सकमज्जनुरित्ति च गृहस्थ
प्रकर्णप्रयोगयाज्ञवल्क्येनापि ॥ स्रुवर्णधारणं विहितं दाक्षायणं स्रुवर्णं ॥
गृहस्थस्यनुचित्राभुस्मसंतरेदर्शितं ॥ वेणुं वी धीरयष्टिं उभे रुक्मे च
कुंडले ॥ इति रोप्यं चस्रुवर्णं ॥ अथ परिभाषा ॥ ॥ आज्यं कद्रव्यकेहोमे
स्यात्स्वेदाज्यपरिग्रहः ॥ स्यात्परिस्तरणं नचह्रुतादुतमितिस्थितिः ॥ य
धानेषां पुरस्ता च्च आज्याहुतीर्जुहुयादित्यादौ ॥ अथ नित्यपरिस्तरणादा
हरणं ॥ आनः प्रजां जनयतु प्रजापतिरित्यनेनस्र भिरित्यादौ स्वर्वत्स्विमनी
कयज्ञेस्त आज्यभागौ हुताहुतौ ॥ अत्र पाकेन यज्ञः पाकयज्ञ इति व्युत्पत्ति
नाश्रयणीया ॥ किंतर्हि पाकयज्ञा ॥ प्रशस्तयज्ञाः ॥ अल्पयज्ञो वा ॥ तेन न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्स्म० पाकयज्ञ नामैतत्तं ग्रामिस्फक्के पाकेनाग्निनायज्ञाः ॥ संज्ञितस्यमपीदं तंत्रं स्या
त् ॥ तंत्रं प्रधाने सिद्धांते सूत्रवायेपरिच्छदइत्यमरः ॥ तस्य न भिधानेह वि भट्टो०
रक्ति ॥ सर्वेषु पाकयज्ञेषु भवेद्वा स्मार्तकर्ता कर्ता ॥ धन्वंतरिमखवेश्मानि
त्यः शूलगवस्तथा ॥ ३ ॥ चेहोमं क्वचिन्नास्ता क्वचिन्मंत्रेण सूत्रकृत् ॥ नाभ
सियत्र यत्रेष्टं हवनं नामधेयतः ॥ नैके कांचन पक्षीय चौलादाव्याश्रि
ता यथा ॥ तदाग्निरिंद्रइत्याघाहोत व्याहृतिहृतिकृत् ॥ नैकेकांचनं ॥ तत्ता
वता अक्षरसमुदाययुः ॥ प्रतिपादितः ॥ पक्षः यदा चौलादावाश्रितस्य
र्यः ॥ काम्यं नित्यस्य बाधकं ॥ वशिष्ठः ॥ स्वशाखाविधिमुत्सृज्य अन्यस्य
विधिमाचरन् ॥ अप्रमाणमृषिं कृत्वा अंधे तमसि मज्जति ॥ स्वकं कर्म प
रित्यज्य यदन्यत्कुरुते नरः ॥ अज्ञानादथवालोभात्संतेन पतितो भवेत् ॥
यत्र स्वशाखायां केवलप्रधानमात्रमेवोक्तं भवति ॥ तत्र प्रधानभूतस्य राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणः सांगेति कर्तव्यतासंपादनार्थाय शाखांतरोक्तं च ग्राह्यं ॥ अत एव
स्मर्यते ॥ यन्नाम्नातं च शाखायां परोक्तमविरोधि यत् ॥ विद्वद्भिस्तदनुष्ठे
यमग्निहोत्रादिधर्मवत् ॥ स्वशाखायादुर्लभा यत्र कृत्स्नं शाखांतरोक्तं समाचरेत् ॥
अन्यथा कर्महानिः स्यादिति शालातपोऽब्रवीत् ॥ संग्रहे ॥ अंगलोपेतु ना
वृत्तिः कर्मणः शिष्यते बुधैरिति ॥ स्मृत्यर्थसारे ॥ प्रधानस्याक्रिया तु सांगं
तत्क्रियते पुनः ॥ तदंगानां तु कुर्यात्प्रायश्चित्तं न कर्मकृदिति ॥ कारिकायां ॥
प्रायश्चित्तविशेषस्य यत्र नोक्तो हविर्भवेत् ॥ होतव्याज्याहुतिस्तत्र भूर्भुवः
स्वरिती हुतः ॥ श्रौते प्रायश्चित्तानंतरमुक्त परिभाषायां स यपरिभाषायां ॥ य
ज्ञस्य साधूनादपघातो देवा अवंतु नोऽइलिजपेत् ॥ अपि वान्यां वृत्तस्व वी
मिति ॥ संग्रहे ॥ यद्दिवाग्यमलोपस्यो ज्जपहोमार्चनादिषु ॥ व्याहरेद्वैष्ण
वं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ वृत्तस्यं वा स्वगृह्योक्तं यस्य कर्मत्रवादितं ॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्य स्यत्तावत्तिरणस्वार्थे कृते सर्वं कृतं भवेदिति ॥ अस्यार्थः ॥ कश्चिच्छास्त्रोन भद्दी०
रेवह्वायासबहुद्रव्यसाध्यमहासंभाररमणीयं बहुकर्मास्ति तदेयस्वनगा
८४ स्तायां प्रयासव्यापाररहितमल्पमेवकर्मास्ति ॥ तत्राल्पकर्मापेक्षया म
हाकर्मणा फलाधिक्यं भविष्यतीति मत्वा शास्त्रोक्तरदृष्टमहाकर्मण्यवगू
त्तिस्यात्तत्र स्वशाखाकृत्यस्त्राणामानर्थक्यापत्ते स्वशाखोक्तमेव कार्यं ॥
अत्र प्रातराग्निमातिथ्यं चिथाहेवास्तुकर्म च ॥ रात्रावहनि वा कुर्याद्विषाण्ये
हाग्निकारयेत् ॥ संग्रहे भत्तृद्रुकेकर्ममंत्रस्य कार्यपूर्वकृत नियमात् ॥ कर
त्रं णभूतं मंत्रपठित्वा पश्चात्कर्म कर्तव्यमिति भावः ॥ एतच्च अनुमंत्रणाभि
मंत्रणोपस्थानव्यतिरेकेण द्रष्टव्यं ॥ कारिका ॥ अनेकपाकयज्ञास्य कृत्के ८४
स्मिन्काल एव चेत् ॥ समानमंत्रकाः कार्याः नतंत्राद्भिरिष्यते ॥ अस्या
दाहरणं ॥ यदाग्रयण्याश्वयुजी कर्मणी आश्वयुज्यां पौर्णमास्यां क्रीयते
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदानयोरेककालत्वं ॥ यदा पर्वणि कामुत्सयेन ॥ तदा काम्येष्टियागयो
रेककालत्वं यदाग्रायणिस्तेन पथिकृद्धोमं कुर्वीत ॥ तदा पथिकृदिष्टिया
गयोरेककालत्वमिति दिक्त्रिकृता तुल्यकालेऽस्मिन् प्रसङ्गे नैस्साधितमस्ति ॥
पात्रासादनमिध्मात् आज्याधिश्रयणात् स्रुक्चादिमार्जनं चेध्मरज्जुग्रह
रणं तथा ॥ द्रव्यानादेशात् आज्यं स्यादनुक्तसाधनं स्रुवः ॥ पूर्णपात्रं भवे
न्निसंमाज्यस्यासवनं तथेति ॥ जपानुमंत्रणमंत्रोपस्थाभिमंत्रणे ॥
मंत्राय: कर्मकरणे गृह्यकर्मण्युपांशु षट् ॥ अस्यार्थः ॥ जपमुच्चारणं
विधात्तदर्थमपि यस्त्वेन ॥ मंत्रमुच्चारयन्नेवा क्रियते चानुमंत्रणा ॥
एतदेवाभिमंत्रस्य लक्षणं प्रोक्षणादिके ॥ तिष्ठता पुरस्तात् यद्देवतामा
र्थनं तद्देवोपस्थानं ॥ अथ केवलमंत्रलक्षणं ॥ इदं कार्यमनेनेति न क
चिद्दृश्यते विधिः ॥ लिंगादेवेदमर्थत्वं यस्यासौ मंत्रसंज्ञितः ॥ इति ॥ येः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छन्द· क्रमाङ्कयुक्ततत्क्रमकरणमन्त्रः॥अथोदाहरणं॥उत्तरापारमाभसु ॥२८॥
८५ रवोलष्टमदेहारख।वित्रीजपेदिति॥शान्तोदेवीरभिष्टयइत्यनुमंत्रित
क्षित्यनुमंत्रिणोदाहरणं॥केवलमंत्रोदाहरणं॥ब्रह्मकस्यब्रह्मचार्यसी
तिअत्रप्रज्ञापलयेब्रह्मचारीतिमंत्रलिंगादेवंप्रतीयते॥येनस्त्रयंज्यो
तिषावाधसेतमइ।तिपंचभिरादित्यमुपतिष्ठेदित्यादि॥अथाभिमंत्र
णं॥अभिव्याप्यमंत्रणंअभिमंत्रणं॥यत्सत्यंनहृदयलोमिति।पिंजान
भिमंत्रत्यादौ॥अथकर्मकरणमंत्रः॥आनःप्रजांजनयतुप्रजापति
रितिचतस्रभिः॥प्रत्यंचंहुवेत्यादि॥अथोपांशुलक्षणं॥यन्नोनर ८५
चारयन्मंत्रमीषदोष्ठंचप्रचालयेत्॥किंचिच्छ्रवणयोग्यस्यादुपांशु
सजपस्मृतइति॥द्रव्यंहविः॥स्रुवेणैवकरणंकठिनंहविः॥मंत्रो
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेव कर्म कर्तव्यं सर्वत्र करणं ततः॥ कर्मादौ तौ न मंत्रस्याप्यादौ त्रिर्गृह्य
कर्मणि॥ अविज्ञातस्वरो मंत्रः सर्वत्रैकश्रुतिर्भवेत्॥ आसीन ऊर्ध्व प्र
ह्वो वा नियमो यत्र नेदृशः॥ तदासीनेन कर्तव्यं न प्रह्वेन न चास्थिता॥ सह
वः प्रपयेदन्नं नास्ति व्युद्धरणं तथा॥ आदिष्टमंत्रहोमेषु सर्वत्रैवं प्रति
पत्तिः स्पष्टा प्रकरण॥ उक्तं॥ येनकः॥ कृतनाकलं वर्तमवरणं ब्रह्मा
वाप्याज्यसंस्थितिं॥ संस्कृष्टिश्च स्वकं वंजु ह्वो राज्यभागोपरिस्तृतिः॥
श्री ही णामवहनिश्चतं रक्षेषु कलाकता॥ द्वीभूतघलस्याविविज्ञान
विधिस्तथा॥ यज्ञतंत्रमिदं प्रोक्तमेकाग्नेगृह्यकर्मणि॥ अनंतगर्भित
सायं कौ रां द्वि दलमेव च॥ पवित्रं तादृग्ज्ञानीयात्सर्वकर्मस्वपावनं॥ प
वित्रं कुशपूतया रिस्यमरः॥ कारिका॥ अनंतगर्भितौ साग्रौ तौ पवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुघन॰ त्राभिधायकाविति ॥ एकांगत्वेनैन दक्षिणं प्रतीयात् इति सूत्रं ॥ अस्यार्थः ॥ भट्टी॰
श्रोतव्यत्तो ॥ एकशब्दः केवलवचनः ॥ एकं च तत्तु ॥ अंगं च ॥ सव्यदक्षि
८५
णभेदेन द्वित्वयोगी पदंगृहस्थादि ॥ तस्य द्वित्वेनाविनाव च नेदक्षिण
मेवांगसाधनं भवेन ॥ द्वित्वे योगे द्वाभ्यां कुर्यात् ॥ अनादेशाइति सूत्रं ॥
अस्यार्थः ॥ द्वित्वयोगिनोंगस्यानादेशक्रियामात्रविधानइत्यर्थः ॥ न
त्रापि दक्षिणं प्रतीयात् ॥ ऋचं पादग्रहणं पादशब्दोत्र मूलवाची ॥ ऋचो
मूलग्रहणे ॥ ऋचं विद्यात् ॥ प्रवोवाजा अभिद्यव ॥ अग्निर्नेता त्वं सो
म क्रतुभिरित्याद्युदाहरणं ॥ सूक्तं सूक्तादौ हीनपादे ॥ सूक्तादौ हीनपादे
गृह्यमाणे सूक्तं विंद्यात् ॥ अधिके तत्त्वं सर्वत्रा अधिके पादे गृह्यमाणे ८५
तत्त्वं विंद्यात् ॥ सूत्रं ॥ स्वाहाकारांतेमंत्रांते स्वाहाकारांतं कुर्यादित्यर्थः ॥
न चेन्मंत्रे यत्र क्वापि स्वाहाकारः पठितः तदा अंते कर्तव्यः न्यत्र का राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।पिपतितश्चेत्तस्यैव प्रदानोऽर्थो भवति॥ सर्वकर्मणि द्विवाससः पवित्रा
दिकरश्चनं तर्जन्यनुकरो बद्धशिखा सदा स्यात् ॥ मध्यमेन पाणिना शापले
न जुहुयात् ॥ स्रुवाभावे पाणिना शर्पणं सर्वत्र ग्राह्यं ॥ प्रजापतिं मनसा ध्या
यन् तूष्णीं होमेषु सर्वत्र निरुक्तं ॥ एवंभूदेवेति प्रजापतिपदस्यान्ते र
ङ्काकारश्रायां ॥ प्रजापतिपदस्यान्ते चेभ्य देवेति स्मृतिरिति ॥ एका
शीतिकुशो बर्हिः षड्विंशत्संख्याके ॥ पञ्चाशत्कुशात्कुशाके ब्रह्मानन्दं वि
ष्टरः स्मृतः ॥ अन्यद्वापि शतचंडीविधाने विष्टरलक्षणमुक्तं ॥ ससपि
शतिर्भार्गवेण्यग्रंथिभूषिता ॥ विष्टरं सर्वयज्ञेषु लक्षणं परिका
र्तितं ॥ आत्मतंत्रेषु यन्नोक्तं तत्र ग्राह्यं पारतंत्रिकं विशेषः खलु सामा
न्यात्सत्याद्याय विशेषका ॥ तस्य नित्यं प्राचश्रेष्ठाऽधकं धारणाच्च यज्ञो
पवीतद्वयौ चेच्च विहारादिस्यादुत्तरीयश्चनिरुक्तं ॥ अरं कधारणादुरधार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०भ० णासा नित्येत्यर्थः ॥ उपवेशनकालादारभ्य परिसमाप्तेरविशेषेण का
र्येत्यर्थः ॥ स्थालीपाके ॥ अग्निमग्निषोमाविति पौर्णमास्यामग्नी भट्टी०
८७ षोमयोः स्थाने इंद्राग्नी अमावास्यायामिति ॥ यज्ञोपवीतेनेति ॥ अस्या
र्थः ॥ मानुषपैत्र्यकर्मणोः स्मार्तत्वे प्राप्ते ॥ सत्यां नियमार्थमिदमुच्यत
इति ॥ यत्र नीवीती नावीतीति तत्रैव तेभगवतः ॥ तेन मानुषपैत्र्यका
र्मणोर्विध्यभावे तु यज्ञोपवीतमेवेति नियम्यते ॥ शौचशब्दस्य व्या
ने विहारेष्वशुचिरेव नित्यं स्यादिति ॥ तत्त्वर्थमशुचित्वं संपादयन्तद्वहि
र्विहारं कुर्यात् ॥ अथ स्रुक्स्रुवलक्षणं ॥ भगवन् ॥ खादिरेण स्रुचः कार्यः
पात्रेण न जुहुयाद्यत्र ॥ तत्र खदिरो विलंस्यात्तदा मन्यैरपि यज्ञियवृक्षैः ॥
तदभावे पलाशस्य पर्णाभ्यां हूयते हविः ॥ पलाशस्य पर्णाभावे लुप ८७
र्णैरपि प्यन्नामेव ॥ पलाशपर्णाभ्यामित्यत्र मध्यमपर्णेनेति श्रूयते ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवान् ॥ चमसं वा प्रणीतायाः कांस्यपात्रमथापि वेति ॥ ॥इति परिभा
षा ॥ ॥अथ स्थंडिलविधिः ॥ तत्रेदं गृह्यसूत्रं ॥ अथ खलु यत्र क्व च होष्य
न्स्यादिषुमात्रावरं सर्वतः स्थंडिलमुपलिप्योल्लिख्य षट्रेखा उदगाय
ताः पश्चात्प्रागायते नाना तयोस्तिस्रो मध्य इति ॥ अस्यार्थः अथ इत्यानंत
र्ये यत्र क्व च होष्यन्स्यात्तत्रैव वक्ष्यमाणविधिः स्यात् ॥ इषुमात्रमधिकं वा
ईशानीचारभ्योदक्संस्थं चतुरस्रं स्थंडिलं कुर्यात् ॥ इषुर्नाम रत्नित्रयं ॥
त्रिरत्निषुस्मृत इत्यभिधानात् ॥ संग्रहे ॥ स्थंडिलस्य प्रमाणं तु कथ्यापि
ब्याम्यग्रौषतः ॥ प्रमाणं बाहुमात्रं तु जंघामात्रं द्विरत्निकं ॥ चतुरस्रं च
तुः कोणं तुल्यसूत्रेण धारयेदिति ॥ स्थंडिलं गोमयेनोपलिप्य षट्रे
खामुल्लिखेत् ॥ अत्र षट्ग्रहणमनर्थकं सत्तिं चिन्त्यापयति ॥ उक्ते षट्
पुनः षड्ग्रहणं प्रतिष्ठार्थं यथो भवेत् ॥ षण्णामुपरिलेखानां मितिविदो विदु
रिति ॥ कारिका ॥ यज्ञियं शाकलं किंचित्प्रादेशोत्ततनः परं ॥ यस्तके माहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थम यज्ञियं ॥ यज्ञर्त्विग्भ्यां घखञौ चेति घप्रत्ययः ॥ तत्कर्मार्हं तु यज्ञियमित्य भट्टी०
८८ मरः ॥ अथ प्रयोगः ॥ द्विराचम्य प्राणानायम्य तिथ्यादि संकीर्त्य अमुक
कर्माङ्गभूतं स्थण्डिलादि करिष्ये ॥ इति संकल्प्य तत्प्रकारेण स्थण्डिलं
कृत्वा गोमयेनोपलिप्य षड्रेखा उल्लिखेत् ॥ तेन क्रमः ॥ याम्यामष्टांगुलं स
म्यक् सौम्यं चैकांगुलद्वयं ॥ प्राच्यामष्टांगुलं सत्काक्षेत्रमुल्लिखेद्बुधः ॥
अग्निस्थापनदेशस्य पश्चात्प्रादेशमात्रामुदक्संस्थां लेखामुल्लिख्य
तदंतयोर्द्वे रेखे असंसृष्टे प्रागायते चोल्लिख्य मध्ये तिस्र उदक्संस्थाः
प्रागायता उल्लिख्य तच्छकलं तत्र निधाय स्थण्डिलं प्रोक्ष्य शकलं प्राच्यां
निरस्य हस्तं प्रक्षाल्येत् ॥ येन केनापि ॥ निरस्य शकलं प्राच्यां पाणिं प्रक्षा ८८
ल्य वाग्यतः स्यादिति ॥ अथ यज्ञियकाष्ठद्वयं निर्मथ्य श्रोत्रियगृहाद्वानीतमग्निं
तैजसेन पात्रयुग्मेन तदभावे मृन्मयेन पाच्छादितं षड्रेखासु जुष्टोद
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुना॥ एह्यग्ने भूर्भुवस्वरित्ति त्रिभिर्मंत्रैरभ्यात्मरच्छापयेत्॥ येन केपि॥
~~निःस्वस्मिन्केलंग्राष्यांषाषिंस्वस्थाच्च~~ निर्मथ्य यज्ञियात्काष्ठादानीत श्रोत्रिया
लयानु॥ रच्छेज्जिलेग्निं व्याहृत्तिभिः प्रतिष्ठाप्य प्रदीपनं॥ उग्रे॥ पात्रांत
रेण पिहिते ताम्रपात्रादिकेषु सं॥ अग्निं प्रयायनं कुर्यात् शरावे भाद्रशोपि
चेति॥ यत्नु स्मृत्तिसारे॥ शरावे भिन्नपात्रे च भूपाले चोल्मुके पि वा॥ ना
ग्निप्रणयनं कुर्याद्व्याधिहानिर्भयावहं॥ अयं निषेधो मुख्यपात्रासंभ
वे शरावे ताद्दशोपि वेत्ति॥ उग्निस्मरणान॥ जुष्टो दमूनो इत्य एह्यग्न घृ
ॐ भूर्भुवस्वः इत्य त्रपत्रिभिर्मंत्रैरभ्यात्मरच्छापयेत् पिहितावुत्ते॥ जुष्टो
दमूना इस्तस्यात्रेयो वसुश्रुतोग्निस्त्रिष्टुप्॥ एह्यग्न इत्यस्य राहुगणो
गोतमोग्निस्त्रिष्टुप्॥ समस्तव्याहृतीनां प्रजापतिः प्रजापतिर्बृहस्प
त्ति॥ अग्निप्रतिष्ठापने विनियोगः॥ देवत्व॥ वस्त्रेण वाथ पर्णेन पाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ॰ नाश्रुपेदारभि॥ नकुर्यादग्नेर्धमनं नकुर्यान्मुखेन नाग्नेनाग्न॥ पर्णेनवस्त्र ।२६।०
वेद्यादिः शूर्पेणधमनंनाशनं॥ पाणिनाप्यस्तमाप्नोति आयुः पुण्यं मुखेधमेः॥
८० धमनीमंतरे पृष्ठा ताडनं वा काष्ठमेव वा॥ मुखेनाग्निं समिंधीयान्मुखाद्दग्नि
र्विजायते॥ वेणोरग्निं प्रज्वलतो ह्यरग्नेस्य पावनः॥ तस्माद्वेणुधमन्येव
धमदग्निं विचक्षणः॥ ति॥ अथांतरगमने प्रायश्चित्तं॥ द्वौविप्रौब्राह्मणा
ग्नीवादंपती गोद्विजोत्तमौ॥ अंतरेण यदा गच्छेत्तत्कृच्छ्रं संतपनं चरेत्॥ कर्म
कालेतु विशेषः॥ होमकालेतथा दोहे स्वाध्याये दारसंग्रहे॥ अंतरेण यदा गु
च्छेद्द्विजश्चांद्रायणं चरेत्॥ इति अथाग्न्याधानं॥ आचार्यः॥ होष्यन्नग्ने
र्विजानीयात्स्वरूपं श्रुतिचोदितं॥ अजाननाहुतं कर्म नदस्यफलमश्नुते॥
सप्तहस्तश्चतुःशृंगः सप्तजिह्वोद्विशीर्षकः॥ त्रिपात्प्रसन्नवदनः सुखा ८०
सीनःशुचिःस्मितः॥ स्वाहांतु दक्षिणेपार्श्वे देवीवामे स्वधांतनः॥ बिभ्र
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणहस्तेस्तु शान्तिमन्त्रं स्रुचं स्रुवं ॥ तोमरं व्यजनं वामे घृतपात्रं तु धा
रयन् ॥ मेषारूढो जटाबद्धो गौरवर्णो महोजसः ॥ धूम्रध्वजो लोहिताक्षः
सप्तार्चिः सर्वकामदः ॥ आत्माभिमुखमासीन एवंरूपो हुताशनः ॥ च
त्वारि शृंगेत्यस्य मंत्रस्य वामदेवोग्निस्त्रिष्टुप् ॥ अग्निर्मूर्तिर्ध्याने विनि ॥
अथ समिद्धोमलक्षणं ॥ मूलतः कर्मनाशः स्यान्मध्यतः पुत्रनाशनं ॥ अ
ग्रेण मुच्यते व्याधिरेकपाणिर्धनक्षयः ॥ मूलमध्यममध्येन समिद्धोम
स्य लक्षणं ॥ अत्र सव्यपाण्यान्वारब्धदक्षिणपाणिना होमः ॥ अथ स्था
लीपाकारंभः ॥ कारिका ॥ गृहप्रवेशनीयहोमाद्या पौर्णमास्यां गमिष्यति ॥
तस्यां तु प्रारभेत ॥ सदा गृहप्रवेशनीयादर्वाक् पौर्णमास्यागता चेत्तदा
यागो न कर्तव्यः ॥ परिचरणहोमस्तु कार्य एव पाणिग्रहणादि गृह्यं परि
चरेदिति सूत्रवचनात् ॥ यदि गृहप्रवेशनीयादनंतरं चतुर्थदिनादर्वाक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रस्म· पौर्णमासामावास्येनस्यां यागः कार्यः ॥ यद्यमावास्यायामाधानं तां वर्जयित्वा भट्टी०
१० नंतरपौर्णमास्यां प्रारभेत ॥ तथैव स्मर्यते ॥ आधाने पुनराधाने स्यायेहो
ममुपक्रमेत् ॥ स्थालीपाकं पौर्णमास्यां मारभेत विचक्षणः ॥ संग्रहे ॥ ऊ
परागेऽधिमासे च यदि प्रथमं पर्वणि ॥ तथा मलिम्लुचे पौषे नान्यारंभण
मिष्यते ॥ गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे तथैव ॥ इति वचनेन ज्ञातमालरया
दिनास्वकालानुपक्रांतान्याधानादिप्रारंभकालविषयं ॥ तथा पराशरे गर्ग
ओह ॥ तस्मात्कालमासप्रथमान्याधानादिकमधिकमासादौ कर्तव्यमिति
रिस्द्वं ॥ इत्यारंभणकालः ॥ अथ स्थालीपाकः ॥ शालरोपासनं हुत्वा समि
धद्वयं च यथादायतिथ्यादि स्मृत्वा पदे तु ॥ तत्र्येषां दर्शपौर्णमासाभ्यां स्था १०
लीपाकाभ्यां यक्ष्ये ॥ तत्रान्वाधानं करिष्ये ॥ देवतापरिग्रहार्थं अस्मिन्नु
न्वाहिते अग्नौ अग्निं ॥ इतवेदसमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चाज्येन अग्नीषोमौ चक्षुषी आज्येन ॥ अग्नीषोमौ प्रधानदेवते चरुद्रव्ये
ण शेषेण । स्विष्टकृतमग्निमिध्मसंनहनेन रुद्रं अयासमग्निं देवान् ॥ विष्णुं
अग्निं वायुं सूर्यं प्रजापतिं च एताः प्रधानदेवताः सर्वाः सन्निहिताः संतु ॥
सांगोपांगेन कर्मणा सद्यो यक्ष्ये ॥ व्याहृतीनां परमेष्ठी प्रजापतिः ऋषिः ॥
अग्निप्रजापतिर्देवता बृहस्पती छंदः अन्वाधानहोमे विनियोगः ॥ ॐ भू
र्भुवः स्वः स्वाहा प्रजापतये इदं न मम ॥ अत्र पक्षद्वयमस्ति केचित्तूष्णीं स
मिधो जुह्वति ॥ केचिद्व्याहृतिमंत्रेण ॥ अत एवं स्मर्यते ॥ तूष्णीमादधत
केचिदग्निं व्याहृतिभिः परे इति ॥ सद्यः कालश्चेत्तदान्वाधानयागौ तद्दि
न एव ॥ संधिश्चेत्तु गवाहृश्चेत्प्राक्कुर्याचतेना द्रवे ॥ सा पौर्णमासी विज्ञे
यासद्यः कालतिथौ विधिरिति ॥ सद्यः काललक्षणं ॥ सद्यः कालपक्षश्च
इति वेदितव्यं ॥ अमावास्यां तु पूर्वसंध्यायां दर्शस्थाने स्थालीपाकेन यष्ट

रु.दम. इति स्वकल्पः ॥ अग्नीनामग्न्याधानदेवतानाञ्चशेषः ॥ यदि समारोपणं करो ११६।०
ति ॥ तदा तुभ्यं ता इत्यृचा हुत्वा समारोपयेत् ॥ तुभ्यं ता इत्यस्य वि रूपाग्नि
९१ र्गायत्री छं ता न्वाधानाग्नि समारोपणे धिकारार्थप्रायश्चित्ताज्याहुतिहोमे
विनियोगः ॥ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक् ॥ अग्ने का
माय येमिरे ॥ ८ ॥ अनेनाज्याहुतिं कुर्यात् ॥ कारिका ॥ अथ रज्जुं प्रकुर्वीत त्रि
संधिं त्रिवृतां कुशैः ॥ स्याद्रज्जुकरणे पूर्वं सव्यः पाणिरिहोत्तरः ॥ पश्चाद्द
क्षिण इत्याह ज्वलितः स्वनिबंधने ॥ पूर्वं रज्जुकरणे सव्यः पाणिरुत्तरस्या
त् त्रिवृत्करणे दक्षिणा पाणिरुत्तरस्यात् ॥ अथोदगग्रां रज्जुं निधाय ॥
तया बर्हिः द्विरावेष्ट्य रज्जुमूलं च द्विरावेष्ट्य पूर्वयावेष्टितां रज्जुं तस्या
धस्तात्तानयेत् ॥ अन्यां पूर्वं रज्जुं निधाय तत्र सकृदेव धर्मं बध्वा मूलं च स ९१
कृदावेष्ट्य अधस्तादग्रं निनयेत् ॥ इध्मं बर्हिः बीउपरि दध्यात् ॥ भूमेर
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यत्र निदध्यात् ॥ अथेध्मलक्षणं ॥ निदध्यादिति रत्निरुक्तः ॥ इष्टिचतुर्द्धं
धनं कार्यं मंत्रस्योप्यूहः ऊह्यत इत्यूहः ॥ मंत्रस्तु पलाश्मोरूपं कृत्वा प्रविश
स्त्वं वनस्पतीन् ॥ ततस्त्वां पंचदशधा संहरामि सत्संभृतं इति ॥ अत्रैकविं
शतिधा संहरामीत्यत्र पंचदशधेत्यूहः ॥ अनेन मंत्रेणाप्यूहः ॥ उक्तं च ॥
चिह्नादयस्तु नेच्छंति मंत्रं सन्नहने तयोरिति ॥ इच्छत्येव जयस्तु मंत्रमूहं
नेच्छंती सकृत्त्वात् यथाश्रुतमेव मंत्रं ब्रूयादिति ॥ एकविंशतिधेत्येतदे
व पंचदशधाधार्थ्योभिचिष्यति ॥ कन्याश्चित्रं इत्यस्य यथाप्रज्ञादिषु इडादयः ॥
शौद्रावग्निपरास्त इध्मापि ॥ भूषानेग्रंथिं ग्रथ्नातु सन्नमार्छान् ॥ इति
बर्हिर्बंधने द्विः प्रादेशः एकविंशतिदारुक इध्मः स्यात् ॥ पालाशः स्यादि
रोवोरस्यात् ॥ असंभवे शमीचटादिकं ग्राह्यं ॥ इति जयंतः ॥ अथ रत्नि
रः ॥ अरत्न्यानाम इध्मः स्यात्स पंचदशदारुक इति ॥ प्रकोष्ठोचितस्तु न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्न॰ करोहस्तो मुष्टिनालुबद्धया ॥ अरत्निः स्यादरत्निस्तु निःकनिष्ठेन मुष्टिनेस भट्टी॰
९२ मरः ॥ अथ यज्ञियतरवः ॥ पालाशः खादिरश्चेत्थवैकंकतशमीवटः ॥ वे
णूदुंबरबिल्वाद्या यज्ञियास्तरवाः स्मृताः ॥ ॥ अथ बर्हिर्लक्षणं ॥ शौनकः ॥
यज्ञियानां तृणानां तु अग्रप्रादेशमात्रतः ॥ प्रछिद्य परिगृह्णीयान्मुष्टि
मात्रं तु बर्हिषः ॥ अन्वाधानदिने कुर्यान्नि ॥ सांख्यायनः ॥ कलहं कीनवि
कीर्तं प्रहासं बहुभाषणं ॥ तीर्थत्रिकं तथा शय्यां यक्ष्यमाणो विवर्जये
त् ॥ तीर्थत्रिकं स्रगीतादि ॥ जाबालिरपि ॥ करभार्याश्चतुल्लिस्थास्नवर्ज
येत्कोद्रवांस्तथा ॥ अश्रुतं बहुभाषं च क्रयविक्रयमेव च ॥ दंतशोधनं
पूर्वेद्युर्यागस्येनाचि वर्जयेत् ॥ मसूरांश्च णंक्षाराश्चणकान्कोरदूषकौ ९२
न् ॥ माषान्मधु परान्नं च वर्जयेत्सर्वशो द्विजः ॥ इति ॥ क्षारद्रव्याण्युपनयन
प्रकरणे वक्ष्यंते ॥ यस्त्वन्वाधानदिने श्राद्धं कुर्यात्स तु माषाद्यं न भुंजीयात् ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाचं कार्यं ॥ निषिद्धं कुर्वतां दोषस्तद्वद्वै धर्मकुर्वतां ॥ माषासनस्यवे
धत्वान्नग्रलेच्युतिरश्नतो ॥ यत्तु मधुमांसानिषेन्नोनां श्राद्धकर्म कुर्वतां ॥ अ
न्नदोषं समाघ्राय पितॄणां मातॄणां भवेत् ॥ इति वचनं वृहस्पतिहासपुरा
णादावदृष्टत्वान्महाजने: ॥ अस्यार्थस्यानुष्ठानं निर्मूलत्वादुपेक्षणीयं ॥
तद्वत्सर्वणि सपिण्डविष्यं लघुभोजनं ॥ नसायं नोपवास: स्यात्तेनामिष
विवर्जितं ॥ कारिका ॥ भुंजीयातामहन्येवमासमाषादिवर्जितं ॥ निषेध
या श्चैवरात्रीतासंदपत्नीमैथुनंनच ॥ व्रतलोपप्रायश्चित्तं ॥ यस्यलोपेव्रतमा
हात्म्येसैर्वासंविज्ञातसह ॥ उपोष्यजुहुयादाज्यंतत्वमेवव्रतपाअसि ॥ कारि
का ॥ पर्वणिव्रतलोपेतुकुर्याहुतपतेचर ॥ समानतंत्रं कुर्वीत पार्वणेनतुक
र्मणिति ॥ अथपक्षांतरं ॥ प्रायाश्चित्तवरणस्थाने पूर्णाहुतिरिष्यते ॥
अथप्रतिपदिकर्तव्यता ॥ प्रातरोपासनंहुत्वापरिसमुस्यत्तच्येवं ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्म॰ ग्नेः सकाशाद्द्वादशांगुलिपरिमिते देशे ऐशानीं दिशमारभ्य प्रदक्षिणं समं भट्टी॰
तात् सोदकेन पाणिना त्रिः संमार्जनं तत्समूहनं ॥ ततः परिस्तीर्य ॥ तत्रैवं ॥
१३ तत्रैव प्राच्यामुदगग्रैर्दक्षिणस्यां प्रागग्रैः प्रतीच्यामुदगग्रैर्दर्भैः परिस्तरणी
यानु ॥ श्लोकः ॥ चतुर्दिक्ष्वथवादीर्घैः पूर्वपश्चिमयोर्दिशोः ॥ उदगग्रैरि
तरयोः प्रागग्रैर्यज्ञियैस्तृणैः ॥ तृणेभ्यस्तीर्यमाणेभ्यः पूर्वपश्चिमयोर्दि
शोः ॥ दक्षिणान्युत्तराणि स्युरधस्तादुत्तराणि तु ॥ एवं पूर्वपश्चिमास्परि
स्तरणमूलयोरधः ॥ २ परिदक्षिणं परिस्तरणं ॥ ३ उत्तरपरिस्तरणमुदगग्र
योः ॥ अथ स्तरव्याख्यानं ॥ अथ वा चतुर्दिक्षु दक्षसंरक्षे प्रागग्रं स्यात् ॥ उत्त
रतो दर्भानास्तीर्य पर्युक्षाद्द्वंद्वे पात्राणि न्यग्विधापयेत् ॥ स्थाली १ प्रोक्षणी २ १३
दर्वी ३ स्रुवं ४ प्रणीतापात्रं ५ आज्यपात्रं ६ इध्मं ७ बर्हिः ८ कृष्णाजिनादीनि
चस्तादयेत् ॥ प्रोक्षणपात्रमुत्तानं कृत्वा तत्र चान्तर्लक्षणे पवित्रे निधायाप आ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिच्यगंधपुष्पादिभिःस्वापवित्राभ्यांत्रिरुत्पूयपात्राण्युत्तानानिकृत्वाइध्मं
विस्रस्यत्रिःप्रोक्षयेत्॥तथाच॥कृत्वोत्तानानिपात्राणिइध्मंविस्रस्यबं
धनात्॥अद्भिरद्भिःसहप्रोक्षंत्रिरन्यैर्यज्ञसाधनैः॥कारिकायां॥उत्तानेप्रो
क्षणार्थंयोन्निनयेत्सपवित्रकं॥पवित्राभ्यांत्रिरुत्पूतेनत्रिःप्रोक्षेदुत्ता
नितु॥विस्रस्येध्मंचचमसंसपवित्रमलःपरिमितिं॥त्रिरुत्पूतैरद्भिरधो
मुखानित्रिःप्रोक्ष्याद्भिर्बिलानितु॥पुनःप्रोक्षयेदिति॥स्मृतौव्याख्यातारस्त्वानं
यत्कुर्वंति॥तदयुक्तमितिप्रतिभाति॥इतिहुन्नारायणवृत्तौनकाधोरनुक्तत्वा
त्॥ऊर्ध्वबिलान्येव॥अथेध्मंविस्रस्यसपवित्रंचमसंपूरयेत्॥कथमि
त्याह॥अग्नेःप्रत्यक्चमसंनिधायाद्भिःपूरयेदिति॥शौनकः॥प्रणीताभा
त्रमादाय[redacted]पश्चादग्नेस्तृणेषुतु॥अंतर्धायपवित्रेणसंपूर्यादत्तवा
रिणा॥इतिब्रह्मायचास्तिनहिवरणंकुर्याद्दक्षिणतोग्नेःकुशान्निधाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम० स्मिन्नारब्धे कर्मणि भयतं ब्रह्माणं रणेत्तिरत्वा गंधपुष्पादिकैरलंकुर्जयेत्॥ भट्टी०
ततो दक्षिणापश्चिमे ब्रह्मा रतोस्मीति प्रस्कृत्कास्वीयं कर्म कुर्यात्॥ ततो
९४ ब्रह्मा गेन्ह्यान्ये भागप्राधुप्रमुखउपविश्य कर्मांगमाचमनं कुर्यात्॥ ततउत्था
यसमस्तपाण्यंगुष्ठाग्नेः पूर्वदेशंगत्वा दक्षिणतः कुशासने देशादौ स्थित्वाऽत्र
हे देधिषव्यादनस्तिष्ठान्यस्य सदनसीदयोस्मत्पाकेतरइत्तिब्रह्मासनम
भिमंत्र्यांगुष्ठापुकनिष्ठिकाभ्यां तत्रैस्य मेकं कुशंगृहीत्वा निरस्तः परावसु
निरस्त्तविद्ति मंत्रेण नैर्ऋत्तिभागे तं निरस्य इदं चहमर्वावसोः सदने सी
दामि गइतिमंत्रेण तत्रासनकुशेषुप्राङ्मुखउपविश्य बृहस्पत्तिर्ब्रह्मा
ब्रह्मसदनआशिष्यते बृहस्पते यज्ञं गोपायेत्ति जपेत्॥ ततोयजमा ९४
नः॥ ब्रह्मन्नपः प्रणेष्यामीत्तिवदत्॥ अथब्रह्माभूर्भुवस्वर्बृहस्पत्तिप्रसू
तेत्ति जपेत्॥ उपांशु जपित्वा ॐ प्रणयेत्युच्चैर्जपेत्॥ अथ कर्ता पूर्णपात्रं राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाणिभ्यामादाय नासिकापर्यन्तं नीत्वोदगग्ने निधाय दर्भैः प्रछादयेत् ॥ च
मसस्थे पवित्रे शूर्पे रछाप्य तत्राग्ने तानुष्टं निर्वपामीति मंत्रेण प्रायोलर ॥ अथ पू
श्चादग्नेस्तृणेषु शूर्पे निधाय तत्र प्रागग्रे ॥ पवित्रे रछाप्य तत्राग्ने तानुष्टं निर्व
पामीति मंत्रेण व्रीहीणामर्चनाद्वा चतुरश्चतुरो मुष्टीन् निर्वपेत् ॥ तथाग्निषो
माभ्यामित्यादिना चतुरश्चतुरो मुष्टीन्निर्वपेत् ॥ व्रीही यन्य संभवन्त्य होम्य
द्रव्यस्य वा कारिका ॥ पवित्रान्तर्हितान्व्रीहीन्प्रोक्ष्य निराप्य संव्ययवन्ति ॥
पवित्रान्तर्हितान्परितिहित पवित्रकानीत्यर्थः ॥ निर्वपामी त्युत्प्रोक्ष्यामि
त्ति वदन्ति शेषः ॥ अथ पवित्रे आज्यपात्रे निधाय प्रसयी वोर्ध्वजोम्यजिनेउ
त्सरवत्त्वेकं कृत्वा तत्र व्रीहीन्प्रत्यवहन्यात् ॥ ततस्त्रीशुक्लीकृतं तंडुलान्स्थिरः प्र
क्षाल्य काष्ठैः पचेत् ॥ अथ रछाल्यामाज्यं निषिच्योदगग्नेरंगारान्पास्यते
ष्वाज्यमधिश्रित्य निरूठमेनो वाविलाप्या वज्रस्यांगुष्टपर्वमात्रे दर्भाग्रे निक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्म० प्यते नैव ज्वलतोल्मुकेनाग्नेः पर्यग्निकरणं भवतु ॥ निरूढज्ञात्वाथ ॥ स्म भ६।०
ति दीपिकायां ॥ निरूढः स्याद्विविक्तोग्निर्यः परिस्तरणाद्बहिः ॥ अग्नि
९५ रूढः स वन्हिर्यः परिस्तरणि रक्तमध्यगः स्मृत्यंतरे ॥ अग्नेरन्तेरतो ॥ रा
निरूढस्याज्यस्य सत्क्रियां ॥ कुर्यात्परिस्तरेच वह्निं परिस्तरणाद्बहिः ॥ ग्रोन
कोपि ॥ अथाज्यस्थालीमादाय आज्यान्तस्मान्निषिच्य तु ॥ उदगग्नेर्निरूढ
मुत्तंगारेषु संभस्मस्थ ॥ अधिश्रित्य विलाप्य तदवज्वल्यज्वलनेणेरिति ॥
प्रस्थलं ॥ कुशाग्नि वोद्दगुद्वास्यांगारानतिरस्त्य तत्रेख माज्यं अंगुष्ठोपकनि
ष्ठिकाभ्यां पवित्रेत्ते असंहते ॥ गृहीत्वोत्तानपाणिभ्यां सवितुष्टेतिमंत्रेणो
त्पवनं कुर्यात् ॥ स मंत्रेण द्विस्तूष्णीं ॥ सवितुष्टेत्यस्य वामदेव ऋषिः ॥ ९५
सविता देवता उष्णिक् छंदः ॥ आज्यस्योत्पवने विनियोगः ॥ सवितुष्ट्वा
प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ कृताज्यस्यो
राम

दूर्वेनेपवित्रे प्रोक्ष्याग्नौ प्रक्षिपेत् ॥ तथा चोक्तं कारिकायां ॥ कृताज्यस्योत्सवने
प्रोक्ष्य पवित्रेण प्रास्य चालन इति ॥ अरत्नक्षेपणइध्मस्य धानतो ॥ अथ पश्चा
दग्नेर्बर्हिः प्रस्तीर्य तत्राज्यं स्थापयेत् ॥ शौनकः ॥ सपरिस्तरणादग्नेः पश्चा
त्सम्प्रोक्षिते स्थले बर्हिः सन्नहनं ॥ रज्जुमुदगग्रां निधाय तां ॥ तस्यां बर्हिषि सं
स्तीर्णं प्रागग्रं निहितं भवेदिति ॥ प्रकृतं ॥ दक्षिणकरे दर्वीस्रुवौ गृहीत्वा च स
व्यहस्ते कांश्चित्कुशानादाय प्रोक्ष्य प्रताप्य दर्वीं निधाय कुशान्दक्षिणहस्तेन गृ
हीत्वा सव्यहस्ते स्रुवं गृहीत्वा स्रुवं मार्जयेत् ॥ अथ शौनकः ॥ अथादाय स्रु
वं दर्वीं दक्षिणेन करेण तौ ॥ सव्येन दर्भांश्चादाय संप्रोक्ष्याग्नौ प्रतापयेत् ॥
स्रुवस्य बिलमग्रैः त्रिः संमार्जयेत् ॥ तथैवाग्रैः पृष्ठमभ्यासं ॥ आ मूलाभि
मुखं त्रिः संमार्जयेत् ॥ आसन ॥ अभि अभ्यासं ॥ कुशमूलैर्दंडं पृष्ठत आ
रभ्य यावदुपरिष्टाद्बिलं भवति ॥ तथा कार्या एकैकसंमार्जने त्रिस्त्रिः कुर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्ण॰ तु॥ ततः श्रता प्यघृतादुत्तरत आस्ताय दर्वीं च तथा कृत्वा स्रुव स्योदगास्तायना भ॰टी॰
न्कुशान्प्रोक्ष्याग्नौ क्षिपेत्॥ अथ चरुमभिघार्योदगुद्वास्याग्न्याज्ययोर्मध्ये ननी
९६ ताज्याद्दक्षिणात्तः स्थाप्य प्रत्यभिघारयेत्॥ अथ पश्चौ नकेन विरोधः॥ उदगुद्वा
सितं तत्स्मासुनरप्यभिघारयेत्॥ ततः परिसमुह्यालंकृत्येध्मं त्रिषु स्थानेष्वा
भिघार्येध्मरज्जुं तत्रैव दर्भेषु निदध्यात्॥ अथ परिसमूहनं शौनकोक्तं॥ अग्निं
परिसमुह्यायं गंधपुष्पैरलंकृतं॥ आत्मानं चालंकृत्य सइध्ममादाय पाणिना॥
इध्मासन्नहनी रज्जु मनुयाजे निधाय तां॥ आदाज्यं स्रुचेणैव त्रिरिध्ममभि
धारयदिति॥ अनुयाजाभुवे दर्भेषु निदध्यात्॥ ततो यन्त इध्म इति मंत्रेध्मम
ग्नौ जुहुयात्॥ अयं त इध्मो सस्य वामदेवो जातवेदाग्निस्त्रिष्टुप्॥ इध्माहो ९७
मे विनियोगः॥ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय
चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा
राम
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाज्यं गृहीत्वाग्नेर्वायव्यां दिशं आरभ्याग्नेयीमन्तुमाज्यधारां हरेत् ॥ तथैव च
नैर्ऋती दिशामारभ्यैशानीं हरेत् ॥ ॐ प्रजापतये स्वाहेति ॥ मनसा ध्या
येत् ॥ एतावाघारौ ॥ ॐ अग्नेयमर दिग्भागे ॐ अग्नये स्वाहेत्याज्याहुतिं दक्षिण
भागे सोमाय स्वाहेति ॥ एतावत्ताज्यभागौ ॥ अनयोर्मध्ये प्रत्संत्कर वोहं ॥ वी
क्षिजुहुयात् ॥ चर्वाज्ययोर्मध्ये ॥ इतर पात्रं निधाय ॥ अथ चरोरूर्ध्वमद्दसा
भिमृश्येदमग्नय इति ॥ इदमग्नीषोमाभ्यामित्युत्तर दर्वीमभिघार्य दक्षि
णचरु मध्यादंगुष्ठपर्वमात्रं हविरादाय दर्व्यां मध्ये निक्षिप्य तत्स्रुवाद्धीन
थावदाय दर्व्याश्छिन्नमप्यभिघार्य अग्नये स्वाहेति ॥ दर्व्याः पार्श्वेणापि हु
थग्विद्य हुता उत्तरचरोः ॥ पूर्ववत्सायाग्नीषोमाभ्यां स्वाहेति प्रथमाहुत्य प
श्चयाप्राग्वोद ग्बोधाजुहुयात् ॥ पंचावत्ति तु मध्यात्स्रुवार्द्धोस्त्वर्धादप्यवद्य
ति ॥ जामदग्न्यावत्सविदा आर्ष्टिषेणा रतथैव च ॥ भार्गवच्यवनाओर्वाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छन्दः० पचावत्तेनइत्तीरिता ॥ दर्वीमभिघार्येद्ध्योरपिहविषोरुत्तरार्द्धात्सकृ भट्टा०
दवद्यतुओप्यद्विरभिघार्यपात्रस्थंनाभिघार्येत ॥ पंचावत्तीतुहविषकृत्न
१७ रार्द्धाद्राहीत्वांतत्स्यैवपुरस्ताद्वितीयंगृहीत्वारोप्यद्धत्र द्वितीयपात्रस्थंचाति
क्षिप्यायदस्यमत्रेणजुहुयात ॥ यदस्येति मंत्रस्य हिरण्यगर्भोग्निस्विष्ट
कृत्उरतिध्दतिः ॥ इत्यान्यजुहुयातु ॥ यदस्य कर्मणोत्यरिरिचं यद्वान्यू
नमिहाकरं ॥ अग्निस्विष्टकृद्विद्वात्सर्वंस्विष्टकृहुतं करोतुमे ॥ अग्नये
स्विष्टकृतेस्कृहुतहुतेसर्वप्रायश्चित्ताहुतीनां कामानांसमर्द्धयित्रेसर्वा
न्नःकामान्समर्द्धयस्वाहा ॥ कारिका ॥ अंगुष्टपर्वमात्रंस्यादवदानंतती
पिवा ॥ ज्यायस्विष्टकृदर्थंचतुरङ्गुलंसंमितं ॥ नतुसर्वेभ्यश्चंरेभ्यः १०
स्विष्टकृदवदानंचतुर्वर्तिनांनस्यादितिचेन्न ॥ मर्यंप्रधानदेवतांने
कवचन्द्रतुकर्मास्कृदेवताभेदेनहविषप्रथक्पिस्विष्टकृदर्थत्वाकार राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व णैःकृत्वासर्वेभ्योहविभ्यःपृथगवत्तमप्यक्रमेणेतिनतुवर्तेत्वभंगः॥रुद्राय
स्वाहेति॥इध्मरज्जुचिस्त्रस्यहुत्वास्रुवेणाज्यंगृहीत्वा॥अयाश्चाग्नेइत्यादि
मंत्रैर्जुहुयात्॥अत्रभगवान्॥आसीनोवाग्यतोधारयन्नग्नेरुत्तरपश्चि
म॥अयाश्चाग्नेसेकर्चातुअतोदेवचेतिद्वाभ्यांव्याहृतिभिर्हुत्वाचतुर्भिर्घृतं॥
त्म ततोब्रह्मणाप्रायश्चित्तंहोतव्यं॥आदौकर्ताहुत्वापश्चात्ब्राह्मणाहोतव्य
मितिभावः॥अयाश्चस्यस्यावामदेवायाग्निःपंक्तिःप्रायश्चित्तहोमेविनियो
गः॥अयाश्चा ग्नेस्यनभिशस्तीश्चसत्यमित्त्वमयाअसि॥अयासन्वय
साकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा॥अयसेइदं॥अतोदेवा
इतिमंत्रद्वयस्यमेधातिथिर्विष्णुर्गायत्री॥व्याहृतीनांविश्वामित्रजमदग्नि
भरद्वाजप्रजापतयऋषयः॥परमेष्ठीप्रजापतिऋषिः॥अग्निर्वायुःसूर्यः
प्रजापतिर्देवता॥दैवीगायत्रीदैव्युष्णिग्दैव्यनुष्टुप्दैवीबृहतीछंदांसि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्र॰ सर्वप्रायश्चित्ताहुतिहोमे विनियोगः ॥ आपस्तंबः ॥ आनाज्ञातमिति तिस्रो भद्दी॰
१८ अनाज्ञाते त्रिजुहुयादिति ॥ भूः स्वाहा अग्नये इदं न मम ॥ भुवः स्वाहा वाय
वे इदं न मम ॥ स्वः स्वाहा सूर्याय इदं ॥ भूर्भुवस्वः स्वाहा प्रजापतये इदं न मम ॥
अतो देवा अवंतु नो इदं विष्णुर्विचक्रमे पृथिव्याः सप्तधामभिः स्वाहा ॥ देवेभ्य
इ० ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढमस्य पांसुरे ॥ अनाज्ञातमि
ति मंत्रद्वयस्य वामदेवोग्निस्त्रिष्टुप् ॥ अनाज्ञातदोषपरिहारार्थं प्रायश्चित्ता
ज्याहुत्याहुतिहोमे विनियोगः ॥ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु ॥
अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा ॥ अग्नय इदं न मम ॥ पुरुषसं १८
मितो यज्ञो यज्ञः पुरुषसंमितः ॥ अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वा
३ हा ॥ अग्नय इदं ॥ यत्पाकत्रेत्यस्य त्रितोग्निस्त्रिष्टुप् ॥ ज्ञाताज्ञातदोषप
रिहारार्थं प्रायश्चित्ताज्याहुतिहोमे वि० ॥ यत्पाकत्रा मनसा दीनदक्षा नयज्ञ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमन्यन्नेमस्रास्ः ॥ अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवां ऋतुशो यजा
तिस्वाहा ॥ अग्नय इदं ॥ यद्वो देवा इत्यस्य वामदेवाग्निस्त्रिष्टुप् ॥ देवतादीना
व्यत्क्रमदोषपरिहारार्थं यद्वो देवा इति मंत्रेण होममहरिष्ये ॥ यद्वो देवा अति
पातयानि वाचा च प्रयती देवहेलनं ॥ अरायो अस्मां अभिदुच्छुनायते न्यत्रा
स्मिन्मरुतस्तन्निधेतन स्वाहा ॥ अग्नय इदं न मम ॥ तत्र कारिका ॥ व्युत्क्रमाद
चलानां तु संकल्पादि भवेद्यदि ॥ द्रव्याणां व्युत्क्रमस्याद्वेदव्यनिर्वापणादिषु ॥
मध्यापूर्वाहुतेः स्वेति व्युत्क्रमो यो भवेद्यदि ॥ यद्वो देवा तच्चाप्तमाजुहुयात्स्वैन
स्तत्वाहुतिमिति ॥ व्याहृतीनां परमेष्ठी प्रजापतिर्देवता बृहती छंदः ॥ स्वर
वर्णलोपजनितप्रत्यवायपरिहारार्थं आज्यहोमे विनियोगः ॥ अथ स्तत्रं ॥ ब
र्हिषि पूर्णपात्रं निनयेदिति निषिंचेत्यर्थः ॥ यत्पूर्णपात्रं निमनं ॥ एषपाकय
ज्ञानां मेतत्संहत्राय ज्ञानां मवभृत्तः ॥ भृत्त अवभ्रियं तेनन श्वनेन तस्यदर्थं ॥
दीक्षांतो चभृतो चभ्रतो यज्ञस्य मरः ॥ अवभृत शब्देन अवभृथधर्माभिधनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट· स्यनेन सर्वप्रायश्चित्तं भवत्यूर्ध्वं प्राक्संरक्षाज्जपश्च कर्त्ता कार्या णीत्युक्तं भवति॥ भट्टी०
निरस्तो ब्रह्मणाश्च वनीत्युक्तं॥ तत्रैव क्रमः॥ पूर्वं कर्त्ता प्रायश्चित्तानि जुहो
२१ तिगतत्तो ब्रह्माजुहोति॥ तथैवोक्तं॥ निरश्यापवशश्च तथा ब्रह्म जपो पिच॥
प्रायश्चित्ताहुतिः संरक्षा ब्रह्मणः कर्म पंचकं॥ इति नारायणः॥ अथ बर्हिषि
स्थितपूर्णपात्रं दक्षिणहस्तेन स्पृष्ट्वा पूर्णमसीति मंत्रं जपेत्॥ परिस्तरण
त्रि दर्भैः प्राच्यां दिशि मंत्रेण॥ प्रतिदिशमुदकं क्षिपेत्॥ ततः आपो अस्मानिति
दिभिस्त्रिभिर्मंत्रैर्मार्जनं कृत्वा दुर्मित्रियाइति नैर्ऋत्यामुदकं क्षिपेत्॥ अ
थ मत्यं जनो माहं प्रजामित्यनेन मंत्रेणोदकं क्षिपेत्॥ तदर्धे केन ब्रह्माऽऽत्मा
नं पजमानं च प्रोक्ष्य वायव्ये दिशि तो ब्रह्मा ॐ च मइत्यग्निमुपतिष्ठेत्॥ त ११
तः स्वस्ति श्रद्धां मित्यग्निं प्रार्थयेत्॥ अथ कर्ता परिस्तरमुस्थाप्य पर्युक्ष्य होमद्रव्यं
सदक्षिणं ब्राह्मणो दद्यात्॥ अत एव शौनकः॥ वामपार्श्वे तथा सीनापत्नी

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगाधविर्भुजः ॥ आसीच्च पाणौ ततोयं माहं प्रजा मु नेन नतु ॥ तत्सा णिभ्यां ग्र
हीत्वानुपापमात्म रुतं स्मरेत्तु ॥ आत्मानं यजमानं च होता त्रैः शोक्षयेज्जले ॥
होता प्रस्नाः ॥ ॐ च मध्वस्त्र उपतिष्ठेत्तु ॥ अग्न प्रत्यग्रु पास्थितः ॥ श्रद्धां मेधां मित्य ॥
दिग्नाश्चरेत्तु ॥ अग्निमुन्तेन मंत्रेण प्रार्थयेत्तद्विजोत्तमः ॥ ततः परिपूर्णार्थं द
घाद्विप्राय दक्षिणां ॥ होमोपयोगी द्रव्यं अग्निहोत्रे दद्यात्स दक्षिणां ॥ यथोक्त
दक्षिणालाभे हिरण्यं वास्व शक्तितः ॥ इति ॥ दुद्ग्रे रः पात्राणि प्रोरःचाप्याग्नगृही
यात्तु ॥ अर्वाक्तु शम्या परस्तार्यत्तु बहिं राघं तनोदृते ॥ प्रायश्चित्त समास्येत्तं स
मथो जीचितं यदि ॥ इदं तेस्य चास्य नस्यस्थाने ग्निं प्रक्षिपेत्सुनः ॥ आज्याह
तिश्च जुहुयात्व्याहृत्या स्व्येश्च पूर्ववत्तु ॥ अतिक्रांताय दाम्याम्या परासनमं
नोत्स्वेत्तु ॥ शम्या परिमितादेशाद्वत्तिरत्र व्याख्यानेत्कलौ त्तु ॥ शम्या च षट्त्रि
शादंगुलस्यापस्तंबस्मरणात्तु ॥ पूर्णप्रोक्षणपात्रमादाय परिस्तरणद्दर्भाग्रैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्म० मार्जनमात्मनः कुर्यात्॥ पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः भट्टी०
१०० सदसि सर्वं मे भूयाः सर्वमसि सर्वं मे भूयाः॥ अक्षितिरसि मा मे क्षेष्ठाः॥ प्रा
च्यां दिशि देवा ऋत्विजो मार्जयंतां॥ दक्षिणस्यां दिशि मासाः पितरो मार्जयं
तां॥ अप उपस्पृश्य॥ प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां॥ उदीच्यां दिशि
यज्ञः संवत्सर मार्जयंतां॥ आपो अस्मान्मातरः शुंधंतु घृतेन नो घृतप्वः
पुनंतु॥ विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पूत एमि॥ इदमापः प्रव
हतेत्यनेन मंत्रेण मार्जनं कुर्यात्॥ सुमित्र्यान आप ओषधयः संतु॥ अनेना
पि यजमानमंजलिना परिषिंचेत्॥ दुर्मित्रियास्तस्मै संतु॥ अनेन मंत्रेण या
स्यरिवदके क्षिपेत्॥ माहं प्रजां परासिचं या नः सयावरी स्थन॥ समुद्रे वा १००
निनयानः स्वं पाथो अपीथ॥ अनेन मंत्रेण मध्ये अक्षतान् दूर्वादिकं क्षिपेत्॥
अग्न्यपरस्थाने॥ ओं च मे स्वरश्च मे यज्ञोपच ते नमश्च॥ यत्ते न्यूनं तस्मै त उपय
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेत्तिरिकं तस्मै तेन मः ॥ अयं ते योनिऋत्स्येकः ॥ अनेन समारोपः ॥ समिन्वा
रोप समिन्धे देसी मातिक्रमणेपि च ॥ वषु भारोहणं कुर्याद्द्याश्वे तिसंत्र तः ॥ च
तुर्गृहीतमोज्येन पुनराधानमेव च ॥ समिधारोपणे पक्षहोमे छिद्यते यदि ॥
अपमादिनादर्वीकं ऊर्ध्वं विछिद्यते नत्वः ॥ आमन्यारोपणे पक्षे होमे छिद्य
तेयदि ॥ आसमदिनादर्वी गूर्ध्वं विछिद्यते नत्वः ॥ धार्याग्निनित्यहोमे यदि ॥
आहादेशादिनादर्वीकं ऊर्ध्वं विछिद्यते नत्वः ॥ इति स्थालीपाकविधिः ॥ ४
अथ मलमासकृत्यं ॥ पार्वणेष्टिश्चाग्रयणं संध्योपासनकर्म च ॥ अग्निहो
त्रं पाकयज्ञानन्याने पि मलिम्लुचे ॥ कुर्यान्नित्यानि कर्माणि न प्रारंभमिति
स्थितिः ॥ यजुषह्यस्यतिनाम् ॥ आरंभ दर्शपूर्णेष्टयोरग्निहोत्रस्य चोदितः ॥
५ प्रतिष्ठानं च कर्मादि मलमासे विवर्जयेत् ॥ इति ॥ तदुक्तं शात्स्यायनेना
स्वकालमुपक्रांतानां धानादि प्रारंभ चिषयं ॥ यमः ॥ गर्भे याद्धु षिक्रमेस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ॰ श्राद्धकर्मणिमासिकेसापिंडीकरणेनिषेनाधिमासंविवर्जयेदिति ॥ भट्टी॰
गर्भेमासाश्चभर्तृतिचिहितेपुंसवनादौअनुच ॥ वाईषिकेभस्यादौअग्नी
१-१ भागावृद्धिः ॥ स्यादिस्यानेनाविहिते ॥ श्राद्धकर्मणिकेइतिमासेनविनश्रा
द्धकर्मणिअमावास्याश्राद्धइत्यर्थः ॥ निषेनित्यदाने ॥ वषट्कारहोमश्च
पर्वचाग्रयणंतथा ॥ मलमासेतुकर्तव्यंकाम्याइष्टीस्तुविवर्जयेत् ॥ अथव
षट्काराः ॥ अग्निहोत्रोपासनवैश्वदेवादय ॥ आग्रयणंचतुर्भिरग्यामाकु
व्यतिरिक्तधान्यालंभवान्तु ॥ जीवनार्थमावश्यकंनदामलिम्लुचेकार्यं ॥ द
र्भिक्षाभावेतुअनन्यगतिकत्ताभावादधिमासेनकर्तव्यं ॥ ॥ इतिमल
मासकृत्याकृत्यं ॥ अथान्वाधानकर्तव्यदिनेग्रहणनिर्णयः ॥ अन्वाधाने
ष्टिमध्येवारवर्येस्यग्रहणंयदि ॥ उदुत्समुद्रयंचित्रजुहुयादाज्याहुति १०१
त्रयं ॥ अन्वाधानेष्टिमध्येवाचंद्रस्यग्रहणयदि ॥ नयोनयोयमादिस्यादि
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जुहुयः दाज्याहुतिद्वयं ॥ अत्रशौनकेन चित्रोपस्थानं उक्तः ॥ सूर्यग्रहे आहुतिः स्या
दुद्वयं तमसस्परि ॥ चित्रं देवस्य पस्थानं चांद्रे तन्यो विधिर्मयं तु ॥ अत्राह
गार्ग्यः होमे न चान्वद्वपस्थितं ॥ उपस्थानं कार्यमित्यर्थः ॥ चंद्रसूर्योपरा
गतुजुहात्योपासनेनले ॥ उपस्थानं तथानं तथा कार्यद्वयमेवं नतः क्रमा
त् ॥ अथेष्टिदिने हविरासादनांतं कृत्वा अन्वाधानेष्टिमध्ये प्राप्तग्रहणज
नितदोषपरिहारार्थं शौनकोक्तप्रकारेण प्रायश्चित्ताज्याहुतिहोमे कृ
ष्वा तिसंकल्पहोमं कृत्वा प्रधानहोमं कुर्यात् ॥ अत्राह गार्ग्यः सिस्यराहुगणो
गोतमश्चंद्रो गायत्री ग्रहणदोषपरिहारार्थं आज्यहोमे वि॰ ॥ नवो नवचद्र
स्यस्य सूर्यो सावित्री चंद्रमास्त्रिष्टुप् ॥ उपस्थाने वि॰ ॥ सूर्यग्रहे तु उद्वयं
मित्तिहोमः ॥ चित्रं देवानामित्युपस्थानं ॥ उद्वयमित्यस्य काण्वः प्रस्कण्वः
सूर्योनुष्टुप् ॥ चित्रमित्रस्य सूर्यस्त्रिष्टुप् ॥ अथ पर्वनिर्णयः ॥ प्रवर्तने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्श॰ यदा संधिस्तत्र सूर्यथाम तथापि या ॥ तदहर्यागइष्येन परतश्चेत्सरेह नि ॥ द्वि अही॰
१०२ मुहूर्ताद्वितीया चेत्सत्ति पद्या पराण्हिकी ॥ अन्वाधानं चतुर्दश्यां परतः सो
मदर्शनात् ॥ भूतपराण्हास्सरात्संधौ चेद्रदर्शनवर्जिते ॥ अपराण्हे च तत्रास्तं
धौ दृष्टे चंद्रे पि च सज्जनं ॥ अपराण्हे च मध्यान्हे यदि पर्वसमाप्यते ॥ उपोष्य
तत्र पूर्वेद्युस्तदहर्यागइष्यते ॥ परतिथ्याह्रासदृष्ट्यो रह्रे पूर्वतिथौ सोऽस्य ॥
पर्वणो यश्चतुर्थोंश आद्याः प्रतिपदस्त्रयः ॥ यागकाले स तु विज्ञेयः प्रात
रुक्तो मनीषिभिः ॥ याजने यव्याप्तिरिक्तानां श्राद्धदिनेन्वाधानपरेद्युरिष्टि
रिति ॥ सिद्धांत ॥ न यष्टव्यं चतुर्थे ॥ शो यागे प्रतिपदः क्वचित् ॥ रक्षांसि
तद्विलुंपंति श्रुतिरेषा सनातनी ॥ तिथ्याख्या चतुर्थांस व्याप्ति रिक्ते प्रतिपदि या १०२
गः ॥ कार्यमित्यर्थः ॥ तत्रैव तु रले चेत्स्यात् दानं व्यात्दृत्तिहोमवान्नितिस्मर
णात् ॥ तत्र यागः ॥ प्राग्दिनाचतितत्र प्रतिपदि ई दीक्षा चंद्रदर्शनं त्रिमुहू राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तो द्वितीयाभावे तदा तद्दिन एव दानव्याहृतियुक्तो यागः कार्यः ॥ अथवा
पूर्वेद्युः पूर्ववत्तृतीयं ॥ सोपि यागः कार्यः ॥ प्रतिपदि चंद्रदर्शने सत्ती इष्टे
रुपकरणं चेत्कृत्स्नकर्म्मिस्यनन्तभेदे तत्के ॥ पर्वणो द्वितीये शेषेपि कर्तव्ये इष्टि
द्विजातिभिः ॥ द्वितीयास्तु हि तं यस्मात् हूषयं स्वाभ्युदायनाद्य इति ॥ कालद
र्थ र्शे विशेषः ॥ यदान्हाचतुर्भागे द्वितीयाव्याप्तोऽतितदन्वाधानं चेत्तुर्दश्यां प
रक्षपरिष्टिरितिः गार्गः ॥ संधिर्यस्य पूर्वाण्हस्यायागः प्रातः परेऽहनि ॥ कु
र्वीत् प्रतिपद्यागे चतुर्थेपि न दुष्यति ॥ प्रदिपघप्रविष्टायां पदि इति चेदिष्टिः
समापयेत् ॥ पुनः प्रणीय कुर्याद्दृष्टिः कर्तव्या यागविक्रमः ॥ गार्ग्यः ॥ स
माप्ति प्रतिपद्युक्ता पर्वण्यविच्छलो व्यजेरितिति ॥ कालनिर्णये विशेषः ॥ प
र्वणीष्टिः प्रारंभकृत्तावदिरम्य प्रतिपदि समाप्तिं कुर्यादिति ॥ यदा पंचदशा
घटिकानंतरं पर्व प्रतिपदि संधिस्तदा पूर्वाण्हे इति के कार्य मतः पूर्वाण्हे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्म० स्थालीपाकारंभेऽप्यक्रांतस्य कर्मणो विधिमंतरेण विरामासंभवात्समाप्तिपर्य ११ही०
वेत्याद्यपीवैवस्थालीपाकसमाप्तिः॥ प्रसंगान्दर्शं च नं स्वल्पकालसाध्यस्था
लीपाकस्य शांतिः॥ किंतु बहुकालसाध्यां श्रौतेष्टिमवस्य शानीतिमाधवविद्भा
१०३ हुः॥ ग्रंथांतरे द्विदोषाभ्यांस्याः॥ इति पर्वनिर्णयः॥ अथ स्थालीपाकनिषेधः॥
संग्रहे॥ उपन्याधानेस्यनीलेतु कुर्यांचिन्नुतकादिना॥ तेनापरेद्युः कुर्वीतत
स्मादिष्टिं च वर्जयेदिति॥ ग्रंथांतरेपि॥ न हि नेपि कर्तव्यमिति॥ तंत्रे पुरस्त
नं तत्र समाचीर्य यथाविधि॥ यद्वा तद्दहरे चैव तद्दन्वाधानपुरःसरं॥ आ
चार्यं॥ तो चापि स्तलके शाचे पर्वणुष्टिंसहायादिः॥ स्त्रिधर्मिण्यां च भार्या
यां न कुर्यात्ता करा चेन॥ ताविति श्रौतस्मार्तकर्मनुष्टानता रो॥ ने वीमा
त्विनीपुष्पवत्याभिधानात्॥ तत्तु कुलग्रहणात्सर्वकालविषयं॥ व्रतग्र १०३
हणेतु कृत्ते यागकर्तव्यतां भूयते॥ भगवान्॥ स्थालीपाकमतिक्रांत

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रकुत्रचित्तु॥ दिवसे तत्र कर्तव्यमेतत्तु स्मार्तकर्मणः॥ तत्राग्नियद्यग्नि
त्तिकाले कार्यं पर्वण्यनंतरं॥ पथिकृद्धोमपूर्वं तु कर्तव्यमवधानतः॥ चरु
निर्वपणं तत्र पूर्वं पथिकृतेग्नये॥ अन्याभ्यो देवताभ्यस्तु चरुमंत्रं तु यथाक्र
मात्तु॥ अन्ये तु पथिकृद्धोमं स्वतंत्रं कर्म मेनिरे॥ तं तु कृत्वा पुरस्तंत्रं प्रणी
तासादनांतकं॥ निर्वापः प्रोक्षणं कृत्वा चरुः पथिकृतेग्नये॥ यथोपरि
ष्टात्तंत्रं च यथाविधि समाप्य च॥ अतिक्रांते च कुर्वीत स्थालीपाकं यथापु
रात्ति॥ अस्यार्थः॥ प्रतिपदि कर्तव्यस्थालीपाकस्यातिक्रमणे अग्नाविच
तुर्दशी पर्यंतेषु तिथिषु यत्रकुत्रवा स्थालीपाकः कार्यः॥ तत्राप्यतिक्रम
णेनंतरपर्वण्येव पथिकृत्पूर्वकं अतिपत्तहोमं कुर्यादिति॥ तथापि ति
थिविशेषमाह॥ आचार्यः॥ नानातिथ्यष्टि चतुर्दश्यां चतुर्थीमध्ये पंचके
नवम्यां च द्वितीयायां कार्या ह्याहुतयस्तथेति॥ एतदन्वाधाने कृते जात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्म० ष्यउरन्वाधानयागातिक्रमेणतुपथिकृद्धोमःकार्यः॥उभयंचकारिकायां॥
१०४ उभयातिक्रमेकार्यःपथिकृतश्चरुरिति॥केवलस्थालीपाकप्राप्तप्रायश्चि भ०दी०
त्तनोक्तंतत्रकथकार्यं॥अन्वाधानंकृत्वाप्रतिपद्दिप्रमादादिह्यकरणतृती
यादितिथिषुप्रातरुपासनानंतरंसंकल्पपूर्वकंसंस्कृताज्ये॥व्यस्तसमस्त
व्याहृतिभिर्हुत्वापुनरन्वाधायपागंकुर्यात्॥अन्वाधानंनकार्यमिति
केचित्॥कारिका॥प्रायश्चित्तविहीनस्यपत्नीकोविधिर्भवेत्॥होतव्या
ज्याहुतिस्तत्रभूर्भुवस्वरितीहितुः॥इतिस्थालीपाकातिक्रमनिर्णयः॥अ
थाभ्यंगविधिः॥सतुपादौप्रक्ष्याल्याचम्यसंकल्प्यमहादीनां॥तैलं
दत्वाताम्बुलंदद्यात्गृहीत्वाकुर्यात्॥वारफल॥संतापःकांतिरल्पायुर्धनंतता
तथा॥अनरोग्यंसर्वकामान्वीरघभ्यंगकारिणः॥संग्रहे॥द्वितीयाद
शमीचैवरिक्तापष्ठीत्रयोदशी॥प्रतिपदर्शषष्ठीषुभवेमेकादशीतत १०४
थी
राम

पा॥ तैलाभ्यंगं रवौ तापं मांसं दंतकाष्टं च वर्जयेत्॥ संक्रांत्यां रविवारे च सप्तम्यां
श्राद्धवासरे॥ तैलाभ्यंगं तु यः कुर्याद्दरिद्रः स तु जायते॥ द्वादश्यां तैलसेवना
दिभिर्वाक्यैर्द्वादश्यपि निषिद्धा॥ मत्स्ये जन्मर्क्षे दिवसे संक्रांतिपंचमीषु चाऽभ्य
भ्यंगं वर्जयेदिति विशेषः॥ संग्रहे॥ स्नानमाऽभ्यंगमारोग्यमागत्य स्मश्रु
कालिकं॥ नद्यादिषु न कर्तव्यं चोष्णवारिणा॥ निषिद्धदिवसे चारे रात्रौ च
व्याधितस्य च॥ ईष्ट्यां लवयुतं तैलं न दुष्यति कदाचन॥ पंचदश्यां चतुर्दश्यां
अष्टम्यां रविवासरे॥ द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शमपि त्यजेत्॥ व्या
सः॥ तैलेन स्नानं सदा पुण्यं कुर्यादामलकैः श्रियै॥ सप्तमी नवमी दर्श रविसं
क्रमणादृते॥ पद्मपुराणे॥ सप्तमीं नवमीं दर्शं द्वितीयां दशमीषु च॥ रवि
वारे च संक्रांत्यां स्नानमामलकैस्त्यजेत्॥ कालादर्शे॥ आराध्य देवतारा
ध्यं बंधूनभ्यर्च्य विप्रांश्च॥ भुक्त्वा व्याधौ न च नरः स्नायात्तैलेनापि निशास्वपि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्म॰ पुत्रजन्मनि यात्रायां आभेषु केन्द्रजेषु च ॥ ७ ॥ पराग ॥ ८ ॥ वाह चस्नायात् तैलं नवा भ६।०
पुनः ॥ स्मृति संग्रहे ॥ नरकाय चतुर्दश्यां विवाहादि महोत्सवे तथा संवत्स
१०५ रस्यादौ मूलकोलं ज्ञिरोरुजि ॥ आचण्यां बलिराज्ये तु च संतोभ्युदये तथा ॥
तैलाभ्यंगो न दुष्येत संक्रांतिग्रहणादिषु ॥ सार्षपं गंधतैलं च यत्तैलं पुष्प
वासितं ॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥ पक्षांतरं ॥ ९ ॥ रवो ॥ १० ॥ आ
दित्यादिषु मंडस्य चबुधेरभ्यंगकाले सद्य देयं तैल ज्ञितले च सनतं दोष
पनुसैनतः ॥ अभ्यंगस्थामं तदंगधानहेद्‌या रणा ॥ ज्योतिर्यरामश्चि षा ॥ पन्याको
तं ज्ञिर श्छितैः पत्तिचित्ता रछेर्यदिमभ्यंगतः ॥ दिनादा हृतं तोयं तत्वा
स्वर्णयुक्तं तुलतः ॥ रात्रिस्नाने तु संग्रामे कुर्याद्दिनवत्सं न्निधौ ॥ नस्नाया
स्व दुर्भवनीति मांगल्ये विनिवर्त्य च ॥ ११ ॥ अनुव्रज्य स्वकं दृष्ट्वा धुनःप्रजयिष्टे तेष्ट दे १०५
ता ॥ दशमी पुत्रनाशाय धनहान्ये त्रयोदशी ॥ द्वितीया भयनाशाय स्ना राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्तु वर्जयेत्तत्तः ॥ २ तुर्गाग्यवचनं ॥ त्रयोदश्यां द्वितीयायां प्रतिपद्दशमीद्वये ॥ तैलाभ्यंगं न कुर्वीत पितृद्वादशमीद्वये मित्ति ॥ ३ स्नभ्यंग ॥ विधिः ॥ अथ
षमातृमातृकापूजनं ॥ स्कांदे ॥ जातनिघापित्त यज्ञेन वेदि कृत्य ॥ समाचरेत् ॥
तत्रापि मातरः पूर्वं पूज्यनीयाः ॥ प्रयत्नतः ॥ पूज्या श्रिवै पवाचार्या वरदा
भयपाणयः ॥ एवं मातृकापूजनं ॥ जसतनेयानां नित्य ॥ ज स्मछास्वा
स्वछाकरणं आश्वलायनरनुक्तत्वात् ॥ तत्र प्रयोगः ॥ स्वस्तिवाचनानंत
रं प्राणायामस्य स्यातिथ्यादि कीर्त्य प्रारब्धकर्मणा निर्विघ्नता सिध्यर्थं
षोडशमातृकापूजनं करिष्ये ॥ इति संकल्प्य ॥ वस्त्रोपरि षोडशादेवता ॥
स्वर्णमयाः कुंकुमाक्षतामयावास्थाप्य मंत्रेण षोडशोपचारैः प्रपूज
येत् ॥ मंत्रः ॥ नरवैडूतासानामान्यकानि ॥ गौरी पद्मा शची मेधा सावित्री
विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 स्तथा तुष्टिरात्मनः कुर्व्वदैव्येसयासहेति ॥ विष्णुपुराणे ॥ अकृत्वामातृ
कायागं येद्विकं यः समारभेत् ॥ तस्य क्रोधसमायुक्ता हिंसामिच्छंति मातरः ॥
मनुः ॥ कर्मादिषु च सर्वेषु मातरः सगणाधिपः ॥ पूजनीयाः प्रयत्नेन पूजि
ताः पूजयंति चेति ॥ ॥ अथ स्वस्तिवाच ॥ पुण्याहवाचनविधिं प्रवक्ष्या
मीथ यथाविधि ॥ प्रस्तकर्मणामादौ अंते याह्यत्तिद्ध ये ॥ कारिका ॥
अर्चिता ब्राह्मणाः सम्यक् गंधमाल्यैः सदक्षिणैः ॥ तिष्टेयुः प्राङ्मुखास्वायु
ग्माचत्कारोदर्भपाणयः ॥ तिष्टेद्वाचयिता तेषां दक्षिणास्यो मुदङ्मुखः ॥
अथ यानयतुर्वाहुं दक्षिणं तु समाश्रिताः ॥ तिष्टेत्स्यादङ्मुखाः समेक्षस्रका
र्यस्तुत्रतत्रतु ॥ विप्रकुंभमपात्रर्णपिहिताननमार्चितं ॥ श्री वा ॥ सत्ता
पइसपंचदेद्वाचई तानतः ॥ बक्कोरापिश्रीवा आपः संतिस्येयंत्रचीस्य
यः ॥ गंधाइत्ति वेदे ॥ रूगंधाः ॥ पांत्तिजिल्तरं ॥ चदेत्स्वर्वस्कम नस्तुइत्ये
क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं ब्रवीत्स्वयः ॥ गंधा इति वेदे स्मरन्गंधाः पांतु इति नीतरे ॥ यद्देसं वेरुमनस्त
इत्येवमपरे पि च ॥ सौमनस्यमिति ब्रूयुरस्तु शब्दानंतरं ॥ पुष्पाद्दक्षि
णमित्येवं ब्रूयाद्वाचयिता ततः ॥ अन्योक्षितं चारिष्टं चास्त्वित्येवं ब्रूयुरेचि
ता ॥ ततो वाचयितना विप्रा दक्षिणा इत्युदीरयेत् ॥ स्वस्ति शब्दाय मुच्चा
या दक्षिणाः पांतु इति तीतरे ॥ बहु देयामिति ब्रूयुरस्तु शब्दानमादितः ॥
अपि वोरच्छापितं कुंभं विप्रत्रिष्टं दुदन्नुरुच ॥ सेनस्तमाधीयतामित्य
वं वाचयतावदेत् ॥ समाहितमनो स्म इत्य पंच ब्रुवंस्त्वथ ॥ प्रसीदंतु भ
वंत इत्यथ वाचयेत्रिता चरेत् ॥ प्रसन्ना स्म इति प्रीता ॥ प्रतिब्रूयुरिती
तरे ॥ शांतिः पुष्टिस्तथा तुष्टिः ऋद्धिविघ्नानुक्रमात् ॥ आयुष्यमारोग्य
मिति शिवं कर्म तथापि च ॥ अस्तु शब्दानमुच्चारयेत् वाचयित्वा तथा
परे ॥ ततो देवा अयंतु नरस्ते वध्मवमुत्तमं ॥ दक्षिणा दाचिरस्य चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६१ [illegible] पुण्याहं वाचयन्तु ॥ ॥६॥
प्रजापतिः प्रीयतामित्यथ वाचयिता वदेत् ॥ परेषामथ मुख्यार्थं प्रीयतां भ
१०७ गवानिति ॥ पश्चात्प्रजापतिरिति ब्रूयुः प्रेतस्य मानसः पुण्याहं वाचयि
ष्येहमिति वाचयिता वदेत् ॥ वाच्यतामिति भाषन्ते चकारस्तत्सूचेनतः ॥
अथोद्गाते च शाकुने साम गायति पूर्ववत् ॥ ऋचं तस्य स्वसह ब्रूयुस्ततो वाचयी
ता द्विजः ॥ ॐ मुक्तिपूर्वा पुण्याहं भवंत्विति ॥ भाषितानां परं ब्रूवंतितिष्ठ
युः ॥ पुण्याहमिति तरे ॥ पुनरप्येवमेवाह्निः कृत्वा पुण्याहवाचनं ॥ ततः
स्वस्तिनयिंद्रेति ऋचं ब्रूयुः सहाभयं ॥ ततो वाचयिता पूर्वमोरस्वस्तीत्य
भिधायतु ॥ पश्चात्स्वंतु इति च ब्रूयंतीतिर्विभाषते ॥ ॐ स्वस्ती तिनेथे १०७
वाच्ये प्रतिब्रूयुरतः परं ॥ प्रारम्भितं चतुर्थ्यो — कर्म वाचयिता ततः ॥
स्वस्तीत्याद्यब्रूवंतं तं वस्तमुदीरयेत् ॥ चकारश्चतुर्थ्यंतं तन्नामान्तिपूर्वकं ॥ राम

CC-0. In Public Domain:Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्तीच प्रतिब्रूयुरथ सर्वे पित्रे द्विजाः ॥ ऋध्याम स्तोमम् इत्यादि मंत्रं च ब्रूयुः
समृद्धे ॥ ततो वाचयिता ऋद्धिं भवंतं ब्रुवंत्विति पूर्वकं ॥ नितं वदेदन्ये ब्रूयुश्च ऋ
ध्यतामिति ॥ एवमथाभ्युदये द्विजैरभ्यमपुरिट्टं पुनः ॥ पुण्याहदंस्त्विर
भ्यसे मंत्रमध्योश्च निःस्वने ॥ ७ स्वने ॥ आश्वनयेरत्निमं सर्वे यथागमपू
रस्परं ॥ ततो वाचयिता कुंभजलं संरक्षार्यमूर्द्धनि ॥ द्विः चि त्रिं च तथा वाऽन्ये
ब्रूयुश्चविविधाशिषः ॥ आपोहिष्ठादयास्तिस्त्र शन्नोदेवीस्तथैव च याग ई
ईशानांवार्याणामिति भुद्रवत्सघमर्षणं ॥ तरत्समंदीति सूक्तं सर्वपाप
प्रणाशनं ॥ पवस्वसोममित्यादि ऋग्भिः प्रोक्षसमंत्रलं ॥ पुण्याहं वाच
यित्वेवं सर्वं कल्याणवान् भवेत् ॥ स्वस्तिवाचनमित्येतु सर्वेषामद्विकर्मणा
आदावंते च कर्तव्यमिति मत्सोविदोमतं ॥ अथ प्रयोगः ॥ ॐ अवनिकृ
तजानुमंडलं कमलमुकुलसदृशमंजलींशिरस्याधाय दक्षिणेन पाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्र० नास्सुवर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदा भट्टी०
१०८ नि च तेन आयुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु ॥ शिवा आपः संतु ॥ सौ
मनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु ॥ अरिष्टं शुभमित्यर्थः ॥ गंधाः पां
तु रुकमगत्यं चास्तु पुष्पाणि पांतु ॥ सौश्रियमस्तु ॥ तांबूलाः पांतु ऐश्वर्य
मस्तु ॥ दक्षिणाः पांतु बहुधेयं चनोस्तु ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरण
कर्मारंभाः शुभाः शोभनाः प्रवर्त्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुःसा
माशीर्वचनं बहुऋषिमतं सचिज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाच
यिष्ये वाच्यतामिति विप्राः ॥ भद्रं कर्णेभिः ॥ द्रविणोदाः ॥ सविता पश्चा
तात् ॥ नवोनवः ॥ आपउंदंतु जीवसे दीर्घायुत्वाय वर्चसे ॥ यस्त्वा हृदा की
रिणा मन्ययस्मै त्वं ॥ सत्वाशिंचा ॥ मि यजुषी प्रजामायुर्धनं च ॥ व्रतनिय १०८
मतपः स्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधीयता
मिति कर्त्ता ॥ समाहितमनसः स्मइति विप्राः प्रसीदंतु भवंतः इति कर्त्ता ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसन्नास्स्मइत्ति विप्राः ॥ शांतिः पुष्टिर्ध्र्यविघ्नाघाछन्दान्यं च दरोवतु ॥ अ
स्तकराव्यंतमुत्येरुन्चाचयितानलतः परे ॥ यछ्रयस्तदस्तु ॥ यत्पापं तत्प्रति
हतमस्तु ॥ उन्नरेकर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिमस्तु ॥
उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां ॥ तिथिकरणमुहूर्तसंपदस्तु ॥ ति
थिकरणमुहूर्तजन्मनक्षत्रे वारस्तग्नाधिदेवताः प्रीयंतां ॥ शाम्यंतु घोरा
णि शाम्यंतु पापानि ॥ शाम्यत्वीलयः ॥ शुभानि वर्धंतां ॥ शिवा आपः संतु ॥
शिवा ऋतवः संतु ॥ शिवानघः संतु ॥ शिवा गिरयः संतु ॥ शिवा वनस्पत
यः संतु ॥ शिवा अहतयः संतु ॥ ॐ शिवा अतिथयः संतु ॥ अहोरात्रे शि
वेस्यातां ॥ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां ॥
योगः क्षेमो नः कल्पतां ॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसो
मसहिता आदित्यपुरोगास्सर्वेग्रहाः प्रीयंतां ॥ अग्निपुरोगा विश्वेदेवाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०भ० प्रीयंतां ॥ ब्रह्मपुरोगाः सर्वे वेदाः ॥ विष्णुपुरोगाः सर्वे देवाः ॥ माहेश्वरीपुरो भट्टी०
गास्तत्र मातरः ॥ वसिष्ठपुरोगा ऋषिगणाः ॥ अरुंधतीपुरोगा एकपत्न्यः
१०९ प्रीयंतां ॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां ॥ श्रीसरस्वत्यौ प्रीयेतां ॥ श्रद्धामेधे प्री
येतां ॥ भगवती कात्यायनी प्रीयतां ॥ भगवती माहेश्वरी प्रीयतां ॥ भगव
ती पुष्टिकरी प्रीयतां ॥ भगवती तुष्टिकरी प्रीयतां ॥ भगवती ऋद्धिकरी प्रीय
तां ॥ भगवती वृद्धिकरी प्रीयतां ॥ भगवान्विघ्नविनायकः प्रीयतां ॥ भग
वान्नारायणः प्रीयतां ॥ भगवान्स्वामी महासेनः पुण्याहकालान्वाचयिष्य
वाच्यतां ॥ ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ॥
रं वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद याज्यया यज
ति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तल्लक्ष्मीं संभावयति पुण्यां लक्ष्मीं १०९
संस्कुरुते ॥ यत्पुण्यं नक्षत्रं तद्वट्कुर्वीतोपव्युषं यदा वै सूर्य उदेति ॥ अथ न
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षत्रं नेत्ति॥ यावन्ति नक्षत्रस्सूर्यो गच्छेत्॥ यत्र जघन्यं पश्येत्॥ तावत्तिष्ठेत्तथ
त्कारी स्यात् पुण्याहं एव कुरुते॥ अस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु॥ ॐ पुण्या
हं॥ स्वस्तये वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं स
र्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः॥ आदित्य उदयनीयः पथ्ये रे
वतः स्वस्त्याप्रयति पथ्यां स्वस्तिमभ्युपैति स्वस्त्ययनं॥ प्रयंति स्वस्त्ययंति
स्वस्त्ययंति॥ स्वस्ति नः ऋक्॥ अष्टौ देवा वसवः सोम्यासः॥ चतस्रो देवी
रजराश्चविष्ठाः॥ ते यज्ञं पांतु रजसः पुरस्तात्॥ संवत्सरीणममृतं स्वस्ति॥
मस्य सह कुटुंबिने स्यादिति स्वस्ति भवंतो ब्रुवंतु॥ आयुष्मते स्वस्ति॥ ऋध्याम
ऋक्॥ सर्वामृद्धिमृध्यामिति तं वै तेजसे वपुरस्तात् सर्वभवद्दोभिर्मध्य
तो क्षैरेरस्परिष्टाद्धोयः स्तासर्वतोऽहंदश्वाहं परिभ्यसर्वामृद्धिमार्ध्नुमिति स
र्वामृद्धिमृध्नोति य एवं वेद॥ ऋध्यास्मा हव्यैर्नमसोपसद्य मित्रं देवं मित्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध॰ स॰ धेयं नो अस्तु ॥ अनुराधान्हविषा वर्द्धयंतः ॥ शतंजीवेम शरदः सवीराः ॥ त्री भ॰ टी॰
णि त्रीणि ये देवानाम्ध्यानि त्रीणि छंदांसि ॥ त्रीणि सवनानि ॥ त्रयस्त्रिंशत्मेन्त्रा
११० काः ॥ ऋध्यामिव नद्दीर्यं पुत्तो रेषु प्रतिनिष्ठति ॥ अस्य कर्मणः ऋद्धिं भवंतो
ब्रुवंतु ॥ ३ ॥ ऋध्यामि निचिप्राः ॥ श्रिये जातः ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमे
तत् ॥ अमुं च लोकमिदमु च सर्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्य ॥ श्रीयं दधा
त्वहृणीयमानं ॥ अहंबुध्नियमंत्रं मे गोपाय ॥ यमृषयस्त्रयीविदा विदुः ॥
ऋचः सामानि यजूंषि ॥ सा हि श्रीरमृता सतां ॥ अस्य कर्मणः श्रीर
स्त्विति भवंतो ब्रुवंतु ॥ ३ ॥ अस्तु श्रीः ॥ वर्षशतं पूर्णमस्तु ॥ शिवं शिवमस्तु ॥
गोत्राभिवृद्धिरस्तु ॥ प्रजापतिः प्रीयतां ॥ शुभेभिरंगैऋक्क ॥ इदमादावे ११०
व कर्तव्यं ॥ कारिकाः ॥ आदावेव च कर्तव्यं सर्वेषाम्मङ्गलकर्मणामिति ॥ ॥
अथ मंडपविधिः ॥ वसिष्ठः ॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंडपं तोरणैर्युक्तं लक्ष्म वेदिं प्रकल्पयेत् ॥ अष्टहस्तं तु रचयेन्मंडपं वाद्विष
द्रुरं ॥ चतुष्करहस्तोर्द्धं मिष्टिकाभिमदापि चेत्तु ॥ वेदिलक्षणं विस्तारेण
विधाहेडलक्षं ॥ अथ मंडपदेवताप्रतिष्ठा ॥ नंदिनी नलिनी मैत्रा उमा च पशु
वर्द्धिनी ॥ ईशान्यादिक्रमेणैव ज्ञेया मंडपदेवताः ॥ ईशान्यादिदिक्षु निखि
लस्तंभमुपगम्यार्चयेत्स्यादीन्मंत्रानुक्तानि कामकल्पतां ॥ कोणकोण
तः ॥ या ॐ ष्वधीः दधिक्राव्णः स्थिरा भव ॥ स्थूणशब्द स्त्रिलिंगः स्थू
णास्तंभेपि चेत्यमरः ॥ अत्र गंधादि षोडशोपचारैः पूजयात्प्रथमं
मंडपस्थूणास्थिता नंदिनी मदंवताशीर्यंतां ॥ एवमाग्नेयादि दिक्षु कर्तव्या ॥
अथ ब्राह्मणसंख्या ॥ अघंतौ भोजयेद्विप्रान् वशास्त्रप्रमतो दश ॥ ब्राह्म
णान्मधुरान्नेन शान्तपुंसवने तथा ॥ सीमंते जननेनाम्नि प्रत्तिक्रमशः
तं शतं ॥ दशाभिः क्रमेण चान्नप्राशने चौलकर्मणि ॥ व्रतबंधे च विप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्म० र्योद्विशते शते तथा ॥ दशवा भोजयेद्विप्रान्निष्क्रमे चान्नभोजने ॥ तथा वेद भट्टी०
१११० व्रतानां च चतुर्णां च दश दश क्रमात् ॥ ब्राह्मणान्भोजयेद्विप्रो गोदाने स्नान
कर्मणि ॥ विवाहेषु यथाशक्ति पाकयज्ञेषु पंचसु ॥ एकमेव द्विजश्रेष्ठ
भोजयेद्दक्षिणान्वितं ॥ विप्राणां द्विशतं भोज्यमग्न्याधाने द्विजोत्तमः ॥
उपवर्षादिभिः प्रोक्तमाधाने शतभोजनं ॥ पंचदशाधास्त्रिंशत्के [illegible]चि
ने षष्ठिरेव च ॥ सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं परे ॥ चातु
र्मास्यास्तु चर्षौ शतं पर्व्वणि पर्व्वणि ॥ अथ गर्भाधानाद्यतिक्रमणे प्रा
यश्चित्तं ॥ कात्यायनः ॥ कालातिक्रमणे चैषां हुत्वा व्याहृतिभिर्घृतं ॥ कार्यालंकैकम
शोऽन्योपपादकृच्छ्राः प्रकीर्तिताः ॥ अर्द्धकृच्छ्रस्तथा चौले आश्वलस्याद्विगुणं १११०
स्मृतं ॥ वेदादिव्रतलोपेषु षट्कृच्छ्राश्च समाचरेत् ॥ अथ कात्यायनः ॥
लुप्तकर्मणि सर्वत्र प्रायश्चित्तं विधीयते ॥ प्रायश्चित्ते कृते पश्चाल्लुप्तक
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्त्तमाचरेत्॥ गृह्यम ः॥ आरभ्याधानमाचौलात्काले तीते तु कर्मणां॥
आव्रात्याद्द्वित्तिभिर्हेत्वा प्रायश्चित्तं समाचरेत्॥ चौलकर्मण्यति क्रांते पा
दकृच्छ्रं यंचरेत्॥ अकामतस्त्वकालेतु द्विगुणं तन्माचरेत्॥ अस्तंतरोग
म्लेच्छपतस्तूरणां तिषु कर्महानीचिर्दे प्रोक्तेऽभ्यसोथो द्विगुणं भवेत्॥
षोडशादष्टवर्षांतं मौंजीलोपेतु तत्रहि॥ चांद्रायणं पराकं वा प्रतिवर्षं स
माचरेत्॥ इति काललोपप्रायश्चित्तं॥ अथ पत्नीकुमारापचेत्राः नुद्दि॥
यमः॥ संग्रहे॥ संस्कारकर्मर्त्तक सर्वत्र निष्टेतु नरः सदा॥ संस्कार्यः
पुरषोवापि स्त्री चा दक्षिणतः सदा॥ ज्ञेतो पुरसयने चैव स्निमंत्र यज्ञकर्म
णि॥ श्राद्ध काले विवाहे च पत्नी दक्षिणतः सदा॥ विवाहेयह पवेशेच पुंसि
चौले तथैव च॥ जातेनाम्नि च कुर्वीत न्विच्छिन्नं ग्नानं तथैव च॥ एषु कर्मसु
पत्नीं च दक्षिणे चोपवेशयेत्॥ जातकं नामकं चौलं अन्नप्राशनं चौलकं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ० उपनीते विवाहे च स्त्रीमंत्राधानपुंसके ॥ कर्तायामेन तथासीनः पत्नीपुत्रश्च
दक्षिणे ॥ पुंसवने सौनकेन कारिकायामुक्तं ॥ आत्मनो दक्षिणपार्श्वेऽस्य ॥ही०
११२ गानादुद्वाजिने ॥ गुर्विण्युपविशेत्स्वात्ताजयंत वचनं तथेति ॥ सौनकेना
प्युक्तं ॥ आर्यान्तर्लोयानीत्वाग्निमात्मानमंतरा ॥ आत्मनो दक्षिणपार्श्वे प्रा
ङ्मुखीमुपवेशयेत् ॥ चौले सौनकेनाप्युक्तं ॥ सव्ये नरचौलकृतः समीपज
ननीशिशो ॥ अंके न बिभ्रता पुत्रमासीनप्राङ्मुखी स्त्रीति ॥ कन्यादाने वि
वाहे च प्रतिष्ठायज्ञकर्मसु ॥ सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः सदा ॥ त्रिषु स्था
नेषु सा पत्नी वामभागे प्रशस्यते ॥ पितृणां पादशौचे च तथा रोहि ऋतुनो
तथेति ॥ श्राद्धकाले यदा पत्नी वामे नीरं प्रदापयेत् ॥ अश्रकरं न दये छाद्ध
पितृणां नोपतिष्ठति ॥ इति पत्नी कुमारोपवेशन विधिः ॥ अथ षोडश ११२
संस्काराः ॥ तत्र नावत्काले लोके प्रायश्चित्तं ॥ आचार्यः ॥ कालातिक्रे
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मणे चैषां हुत्वाज्याहुतिभिस्तथा ॥ कार्यास्ते कर्णलोपे पादकृच्छ्रः प्रकी
र्तितः ॥ अर्द्धकृच्छ्रस्तथा चौले अन्यस्याद्विगुणं स्मृतं ॥ वेदादिव्रतलोपेषु
तु षट्कृच्छ्राश्च समाचरेत् ॥ गर्भाधानं तु विज्ञेयं षट्कं ॥ गर्भाधानस्याकर ने
णात्तस्यां जातस्तु दुष्टुति ॥ अकृतागार्द्विजः कृत्वा कुर्यात्पुंसवनं पतिरिति ॥
मनुः ॥ जातकर्मादिसंस्कारान्स्वकाले न भवंति चेत् ॥ चौलादर्वाकूत्रकृ
रा वीत प्रायश्चित्तादनंतरं ॥ अथ षोडशसंस्कारनामानि ॥ पारि जातके ॥ ग
र्भाधानं पुंसवनं सीमंतं जातकर्म च ॥ नामकार्यं निःक्रमणं अन्नप्राशनं
चौलकं ॥ मौंजीवेदमहानाम महाव्रतमतः परं ॥ उपनिषच्च गोदानं स
मावर्तनकं तथा ॥ विवाहः पुत्रकामायसंस्काराः षोडशैव हि ॥ अथ गर्भा
धानं ॥ अनर्तुमासां भार्यायां न कार्यं गर्भलंभनं ॥ ऋतुमासां तु तस्यां वै
तत्कार्यं ब्रह्मचारिणा ॥ गर्भोलभ्यते येन कर्मणा लद्गर्भलंभनं ॥ तथा च ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृ निषिक्तोपत्ययोगेण गर्भः संधार्यते स्त्रियां ॥ तद्गर्भलंभनं ॥ नाम कर्म प्रो भ॰टी॰
क्तमनीषिभिः ॥ ब्रह्मचारी स्वदारनिरतः ॥ तथा चान्हिके ॥ ऋतुकाला
११३ भिगामी यः स्वदारनिरतश्च यः ॥ सदा ब्रह्मचारीह विज्ञेयः स्वगृहाश्र
मी ॥ यः ऋतुकालोपगामी च प्राप्नोति परमां गतिं ॥ अगत्वा पापी भवेत् ॥
गर्भाधाने पुंसवने सीमंते भ्युदयः क्रियां ॥ पत्निः कुर्यादभावे तु देवरो गुरु
नादितः ॥ शौनकः ॥ स्नातायाः स्त्रहन्यायाश्च क्षतुमत्याः समेह निशु
प्राग्भ्युदयश्राद्धं कृत्वा पुण्याहमीरयेत् ॥ तत्र स्तुदारतो पुण्यास्व यमन्ये
र पि द्विजैः ॥ अधीयीत प निषुदम परान्हे समापयेत् ॥ विप्रैः सह वमु
घालु स्वस्तिवाचनमेव च ॥ ततो रत्नमुपवेश्यायां कृत्वा कृत्यो भवेन्नरः ॥ मु ११३
द्रितं सत्रसंगंधपुष्पाक्षतसमन्वितं ॥ धूपितं दीपयुक्तं च गृहं पत्न्याः स्व
हो विनोत ॥ ३ ॥ त्रिविनोषः ॥ तत्र शयनेषोपत्नी अंकम्यारोपयेत् स्वयं चो राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ विशेत्॥ ततोऽश्वगंधामूलरसं दक्षिणे नासिकायां उदीर्ष्वातः इति मंत्रेण
सिंचेत्॥ ७ अत्र ऋग्विधाने विशेषः॥ विष्णुर्योनिं जपेत्सूक्तं योनिं स्पृष्ट्वा
त्रिभिर्दृचैः॥ गर्भाधानं ततः कुर्यात्सुपुत्रो येन जायते॥ ॥इति स्मृत्युक्तं ग
र्भाधानं॥ ॥अथाश्वलायन॥ शौनकजयंतोक्तं॥ आचम्य प्राणानायम्य॥
तिथ्यादि संकीर्त्य अस्याः प्रतिगृहीतभार्यायाः अस्यामुत्पत्स्यमानानां गर्भाणां बी
जगर्भसमुद्भवैनोनिबर्हणार्थं गर्भाधानं करिष्ये॥ तदंगं नांदीश्राद्धं करि
ष्ये॥ मातृकापूर्वकं तदंगं स्वस्तिवाचनं करिष्य इति संकल्प्याभ्युदयिकं
कृत्वाश्वगंधामूलरसं शुद्धांबरे क्षिप्त्वा उदीर्ष्वेति मंत्रेण पत्न्या दक्षिण
नासारंध्रे नस्तः सिंचेत्॥ अश्वगंधारसं॥ उदीर्ष्वातः इत्यस्य सूर्या
सावित्री ऋषिः सूर्या देवता त्रिष्टुप् छंदः॥ नासिकायामश्वगंधारस
सिंचने वि०॥ ततः स्त्र्युदरे गते तामाचम्योपेयात्॥ एवं कृतोपगमने कृते

ध०म० स्यात्स्नेस्तंभनं ॥ आचार्यः ॥ गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्टुतिः ॥ भट्टी०
अकृत्वा गां द्विजे दत्वा कुर्यात्सुसवनं पतिः ॥ अत्र निषिद्धदिनान्युच्यंते ॥ कृत्ती
११४ चिह्नेन धावन प्रेक्षरणे संगो कानि ॥ अथ श्राद्धेकायां ॥ ऋतुषोडशयामि
न्यश्चतस्रस्तास्तु गर्हिताः ॥ पुंस्यास्तास्वपि या युग्मा कन्याकामदाः तिः ॥
एवं द्वादशदिनेषु स्त्रीसेवनं कार्यं ॥ तत्रापि पर्वद्वय ग्रहणसंक्रांतिव्यती
पातयुगादिमन्वादिगजछायापमहाभरणीपवासपित्रदिननिषिद्धनक्षत्रादि
निवर्जयेत् ॥ पारिजातके ॥ सार्पश्वमघमूलेंद्र पौष्णगर्भं विगर्हितं ॥ श्रीका
मस्तु त्यजेन्नारीं पंचम्यामुत्तरात्रये ॥ अमावास्याष्टमी चैव पौर्णमासी च
तुर्दशी ॥ ब्रह्मचारी भवेन्नित्यं प्यस्तौ स्नातको द्विजः ॥ पमहलक्षणं ॥ यदा पु
ष्टी व्यतीपातौ भानुवारस्तथैव च ॥ पमहो नाम तत्प्रोक्तं मयना च चतुर्गुणं ॥ ११४
प्रेतपक्षे त्रयोदश्यां मघास्विंदुः करे रवि ॥ यदा तदा गजछाया श्राद्धे पुण्येर
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याप्यते ॥ चतुर्थ्यां जायते पुत्रः स्वल्पायुर्धनवर्जितः ॥ तद्दोषपरिहारार्थं च
तुर्थीमपि वर्जयेत् ॥ श्राद्धात्पूर्वदिनं श्राद्धदिनं च परदिनं च वर्जयेत् ॥ गृहस्थ
लि ॥ ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनं निःस्मृतं ॥ अनृतौ तु यदा गच्छेच्छौचं म
त्रपुरीषवत् ॥ मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं स्मृतमिति ॥ स्मृत्यंतरे ॥ अ
ष्टम्यां च चतुर्दश्यां स्त्रियाः पर्वणि मैथुनं ॥ कृत्वा सचेलं स्नात्वा तु वारुणीभिश्च सं
र्जयेत् ॥ इति गर्भाधाननिषिद्धसमयः ॥ अथ निषिद्धतिथ्यादिषु प्रथमरजो
दर्शनदोषशांतिं वक्ष्यते ॥ चैत्रे तु प्रथमे ऋतौ नारी वैधव्यकारिणी ॥ वैशाखे
धनपुत्रैस्त्याज्या ज्येष्ठे रोगान्विता तथा ॥ शुचौ मृतप्रजा [illegible] श्रीमती श्रावणे धनदा
न्यदा ॥ नभस्ये दुर्भगा कुब्जा आश्विने च तपस्विनी ॥ कार्तिके दुर्भगा चैव मार्ग
रूपुत्रकालवा ॥ पौषे वेश्या तु वंध्या च माघे पुत्रवती भवेत् ॥ फाल्गुणप्रियुर
ता च मासानां फलमादितः ॥ प्रथमायां प्रतिहंति द्वितीयायां स्वयं भवेत् ॥
तृतीयायां प्रियस्यास्य चतुर्थ्यां षंढी भवेत् ॥ पंचम्यां पुत्रलाभश्च षष्ठ्यां च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्न॰ ।स्त्राव्रया ॥ सप्तम्यां पुत्र राद्धः स्याद्दष्टम्यां स्फूतनाशन ॥ नवम्यां रदत्ती नित्यं भद्दी॰
दशम्यां धर्मनो ॥ शान्तिनी ॥ एकादश्यां पतिस्निग्धा द्वादश्यां कंदनी भवेत् ॥
११५ त्रयोदश्यां मानधनात्तु परा बहुदोषकृत ॥ पूर्वेण्यन्य गृहीनास्यां द्वितीयादेव
तिथेः फलं भवत्यतिरत्ने ॥ शुभं चैव चतुर्वर्ण्ये मध्याह्ने मध्यमं फलं ॥ अपरा
ह्णे तु वैसव्यं पूर्वरात्रे शुभं फलं ॥ मध्यरात्रे मध्यमं स्यादपरात्रे स्फुभं स्मृतं ॥
स्मोसंतरं ॥ प्रातःकाले शुभं विद्यात् सूर्यैस्तु रजनीधनं ॥ अपराह्णे तु स्नास्नाया
न्हे स्वर्च भोगिनी ॥ मध्यान्हे च भवेद् दुःस्यान्निशीथे विधवा भवेत् ॥ पूर्वरात्रे वि
रवं आशुभगा ॥ त्रापररात्रके ॥ एकाग्रं ले मर्ति विधवा ल संध्याकाले तु परस्थ
लीति ॥ आदित्ये विधवा नारी सोमे चैव मनप्रजा ॥ भौमे तु थाल्लघातीच्च बु
धे कन्या प्रस्रतिका ॥ गुरौ च पुत्रलाभाय कन्या पुत्रो भृगो स्मृता ॥ शनौ ११५
च पुंसत्वी नारी स्येतद्वार फलं स्मृतं ॥ इति वार फलं ॥ दस्रात् कपुनापत्य श्री
वंध्या व्याधिप्रपीडिता ॥ पुत्रिणी विधवा चैव पुत्रास्कुभगा तथा ॥ वि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धैये कस्कुला भाग्यंवती कन्या प्रसूतिका ॥ सुभगा कार्तिके वंध्या स्यात्क्रोहिणीव
हु भर्तृका ॥ पुत्रिण्या घाथ चांडाली पतिघ्नी धर्मवत्सति ॥ पुदाण्या दासकरवा
दासी शांगिनी कुलदा कृतं ॥ ॥ इति हस्त फलं ॥ अमासं कां तिविष्कंभे च व्यती
पाते च वैधृतौ ॥ परिघस्यतु पूर्वार्द्धे षड्उतिगंडयो ॥ व्याघाते नू च शूलेतु
नाड्यः पंच चतुर्दश ॥ वैधव्य मर्थहानिं च रक्तनारी महद्भयं ॥ मेषरास मभि
राचार्यं रास्यां वृषभे परभोगिनी ॥ मिथुने धन भोगाढ्या कर्कटे व्यभिचारिणी ॥
पुत्राढ्या सिंहराशौतु कन्यायां श्रीमती तथा ॥ विलूणातु लायां तु वृश्चिके तु पति
व्रता ॥ दुश्चारिणी धनुः पूर्वे अपरे च पतिव्रता ॥ मकरे मानहीना च कुंभे निर्धन
वंध्यता ॥ मीने चिन्लक्षणा लग्नग्रह संख्या विवाह वत्तु ॥ श्वेत वस्त्रा शुभा नारी
रोगिणी रक्त वाससा ॥ नीलांबरधरा नारी विधवा नात्र संशयः ॥ भोगिनी पी
तवस्त्रा च दृढवस्त्रा पतिव्रता ॥ दुर्भगा जीर्णवस्त्रा च सुभगा चारु वस्त्रिणी ॥
चतुष्पथे देवगृहे मार्गे चांडालवेश्मनी ॥ राज्ञात्य पापायं च धन पुत्रवती भवेत्तु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०म० चंद्रिकायां ॥ प्रथमर्तौ तु पुष्पिण्याः पतिपुष्पवती स्त्रियः ॥ अक्षतैरासनं दद्या भद्री०
तस्मिन्स्तामुपवेशयेत् ॥ हरिद्रागंधपुष्पादि दद्यात्तांबूलकं स्रजं ॥ आशिषो
११६ वाचयेत्तस्याः पतिपुत्रवतीर्भवेत् ॥ गृहीपेनीराजनं कुर्यात्सदीपेपात्रसयग्टहैत्ताः
सर्वाः पूजयेत्ताश्चा हेधपुष्पाक्षतादिभिः ॥ लवणाद्यपमुद्गादि दद्यात्ताभ्यः
स्वशक्तितः ॥ आर्तवानां तु नारीणां शांतिं वक्ष्यामि शौनक ॥ पंचमेहनि चतु
र्थे वा ग्रहातिथ्यपुरःसरं ॥ आचार्यं वरयेत्प्राज्ञः भार्यासार्द्धं जितेंद्रियं ॥ होमा
र्थं च जपार्थं च वरयेद्दृत्विजो बहून् ॥ यजमानो द्विजैः सार्द्धं शांतिहोमसमार
भेत् ॥ गृहादीशानदिग्भागे देवतापूजनाय च ॥ द्रोणप्रमाणधान्येन व्रीहिरा
शिं प्रयंभवेत् ॥ द्रोणलक्षणं ॥ अष्टमुष्टिभवेत्किंचित्किंचिदष्टौ तु पुष्कलं ॥ ११५
पुष्कलानि तु चत्वारि आढकः परिकीर्तितः ॥ चतुराढको भवेद्द्रोणइत्येतन्मा
नलक्षणं ॥ इति द्वानरखड्डक ॥ कुंभत्रयंन्यसेद्राशौ तंतुवस्त्रादिवेष्टितं ॥ प्र
रयेत्तीर्थसलिलैः ॥ प्रतिकुंभं पृथक्पृथक् ॥ सत्कनाथनवचैनप्रस्थआ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मस्यथः ॥ क्रमात्पाः प्रवचस्तदुपाय स्योचनतः क्रमात् ॥ मध्यकुंभे न्यसेधा
न्यमोषधानी चहेमञ्च ॥ तत्तश्च पंचरत्नानि गंध पुष्पाक्षतादिकं ॥ मन्त्रि
कामोषधादीनि मंत्रेण प्रक्षिपेत्क्रमात् ॥ कुंभोपरि न्यसेत्पात्रं कांस्यं वा ताम्र
मेव च ॥ मन्मयं वा ॥ पात्रोपरि न्यसेद्धस्त्रं प्रतिमां भुवनेश्वरीं ॥ वस्त्रोपरि न्य
सेत्तत्र इंद्राणीं च पुरंदरं ॥ आचार्यः पूजयेद्देवीं मंगलाद्याभरणानि च ॥ अन्या
वा पूजनं कुर्यात्स्थापत्या मंत्रसारया ॥ इंद्राणीं पूजयेद्देवीमिंद्राणीं क्रमात्कृता
रिषु ॥ क्रमेण पूजयेदिंद्रमिंद्रत्वात्तत्र वभुवयं ॥ अनेन विधिनाचार्यः पूजयेद्दु
वतात्र यं ॥ आवाहनादिसकलैरुपचारैः पृथक्पृथक् ॥ तन्मध्यमं स्य ब्राह्म
मं मंत्रेण भुवनेश्वरी ॥ जपेदाचार्य होमादि स्त्सूक्तं जपेनेन ॥ ॥ स्य ब्राह्मेदक्षि
णकुंभमृत्विग्गको जपेत्तेन ॥ चत्वारि भद्रसूक्तानि चतुर्मंत्रोत्तराणि च ॥ सं
स्य ब्रह्मानुत्तरं कुंभं श्रीरुद्रं रुद्रसंख्यया ॥ ब्राह्मनइंद्राग्नी सूक्तं च नेत्रे वेस्य ब्रह्मज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋध्म॰ यत्न॥ कुंभस्य पश्चिमे देशे शांतिहोमं समाचरेत्॥ अन्वाधानं ततः कुर्याद्धो भट्टी॰
मतंत्रं समाचरेत्॥ पूर्णपात्रनिधानांतं कृत्वा यद्द्विजसत्तम॥ दूर्वाभिस्तिल
११८ गोधूमैः पायसेन घृतेन च॥ कृत्वाज्यभागपर्यंतं हविषां द्रावणादिकं॥ ति
लैर्मिश्रैश्च दूर्वाभिरेकैकाहुतिर्भवेत्॥ अभिमंत्रप्रयुक्तानि गायत्र्याजु
हुयात्क्रमात्॥ अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा॥ तिलमिश्रैस्तु गोधू
मैर्दूर्वाख्याज्याहुतिर्भवेत्॥ हविश्चतुष्टयेनैव प्रत्येकं समसंख्यया॥ गाय
त्र्येव तु होतव्यं हविरन्नचतुष्टयं॥ ततः स्विष्टकृतं हुत्वा रुद्रग्रहणं तथा॥
अयाश्चेत्यभिहुत्वा समुद्रादूर्मिरित्यृचः॥ संततां माज्यधारां तां पूर्णाहुति
मथाचरेत्॥ परिषिंचनपर्यंतं होमशेषं समापयेत्॥ सहौषधीःस्थितैस्ते ११८
स्तत्र प्रतिकुंभं स्थितोदकैः॥ ऋतुमत्याः स्त्रियाः न्यासे दंपतीभ्यां सुखा
य च॥ अभिषेकमंत्राश्चैव प्रोच्यंते शौनकादिभि॥ आपोहिष्ठेति नवर्चा राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिः सूक्तेन चत्वलः परं ॥ इंद्रोऽभंगतत्वेनैव पावमानैः क्रमेण तु ॥ ३ भयं
शरण्य चेनः स्वस्तिदा विशां एकया ॥ यथा केन मंत्रेण जातवेदस एकया ॥ स
मुद्रज्येष्ठा इत्यादि चतुर्भिश्च प्रसिद्धके ॥ आयंतामिति मंत्रैश्च त्रिभिश्चाभि
यथाक्रमं ॥ इमा आपस्त्वचेन व देवस्यत्वेति मंत्रतः ॥ मंत्रेणायंतु मीशानत्व
मग्नरुद्र इत्यथा ॥ तमुष्टहीति मंत्रेण भवनस्यापितस्तथा ॥ यात इद्रेति मंत्रे
ण शिवसंकल्प मंत्रतः ॥ इंद्र त्वा वृषभं पंचमंत्रैश्चैवाभिषेचयेत् ॥ तां चव स्त्रा
दि लंकृत्वा पुनश्चापि विप्रास्ततो ॥ उपवासो त्रसमीपवा रच्छाने ॥ विप्रानभ्यर्च्य
विधिवद्धा क्षत्तां निशाधेनुं पयस्विनीं दद्यादाचार्याय च सुपूर्णे ॥ सदक्षिणा
मनडुहं प्रदद्यात्वतैथे वच ॥ ऋत्विग्भ्यश्चायसर्वेभ्यो दद्याद्दक्षिणा नतः ॥
महाशांतिं प्रख्याप्य विप्राशीर्वचनं ततः ॥ ब्राह्मणान् भोजयेच्छ्रद्धा स्तु जीयात्स्व
मनैस्तु भसह ॥ एवं यः कुरुते शांतिं शोकान् प्रमारतः ॥ तदनिष्टं तु सततं

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋस्नं॰ फलंसएवविनश्यति ॥ अथमतांतरं ॥ एवंगुणशुभतिथौ ॥ अस्याःभार्या भटी॰
११८ यानिंघत्तिथिवारक्षत्रादिकेषुप्रथमरजोदर्शनजनितशिरहफलनिरासार्थं
जीवपत्नीत्वआयुरारोग्यऐश्वर्यादिप्राप्त्यर्थंचशांतिकंकरिष्ये ॥ तदंगभूतं
स्वस्तिपुण्याहपूर्वाण्हब्राह्मणानांनिमंत्र्यपुण्याहवाचनानंतरंशास्त्रकोवि
दमाचार्यअष्टोचतुरोवाऋत्विजोपिश्वत्वाप्रतिमांसुवर्णेनतदर्धेनवातया
याकृत्वा ॥ आचार्यःपूजयेत् ॥ अग्निप्रतिष्ठा ॥ आदौनवग्रहमखंकृत्वापश्चा
त्तद्देवताहोमःकर्तव्यः ॥ रुद्रंदिक्षुकोणेचतुरःकुंभान्नडुजोपरिस्था
पयेत् ॥ तान्कुंभान्अश्वक्रांतेतिमंत्रेःपूरयेत् ॥ ओषधीरिति ॥ याओषधीः ११८
प्रक्षिपेत् ॥ पंचरत्नानिच ॥ उद्धृतासीतिसहस्रमार्त्तिका ॥ रेवतीर्नामेति
पंचवृक्षत्वचः ॥ प्रवोयज्ञेतिपंचपल्लवान् ॥ गायत्र्यागोमूत्रं ॥ गंधद्वारेति
गोमयं ॥ आप्यायस्वेतिक्षीरं दधिक्राव्ण्णइतिदधि ॥ शुक्रमसिज्योति
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षीति। आज्यं देवस्य त्वेति कुशोदकं ॥ प्रधान फलशांत्यस्त्वादिना। अनंत
त्वतस्यापरि नक्षत्रदेवता: षोडशोपचारै: पूजयेत् ॥ नतं कृत्तिका जप
एकादशार्द्रं। आनोभद्रा: पुरुषसूक्तं ॥ ईशानादि फलशापुत्र प्रयु: ॥ न
क्षत्राधिदेवतामंत्रमाचार्ययथाशक्त्या वर्तयेत् ॥ भण्यां वेधव्यं यमो
देवतापाशहस्तं दंडधर: ॥ त्र्यंबकं यजामहइति पूजा ॥ अस्यानुष्टुघृतमि
ष्टोयम: ॥ कृष्णागरगंध ॥ करवीरपुष्पं ॥ गुग्गुलधूप: ॥ गुडान्नं नैवेद्यं ॥ घृत
मधुतिल्ला: प्रधानद्रव्यं ॥ कृत्तिकास्कंदारिद्रय अग्निदेवता मेषवाहनस्त्र
क्स्रुक्स्रुवचरदाजभय पाणि: ॥ पुनंतु मां देवजना इति पूजा ॥ अस्यानुष्टुप् ॥
मेधातिथिरग्नि: ॥ रक्तचंदनं ॥ यूथिकापुष्पं ॥ सर्पिधूप: ॥ घृतौदनं नैवेद्यं ॥
प्रधानद्रव्यं घृतं ॥ आर्द्रायं हुस्वं ॥ रुद्रं वृषवाहन: ॥ त्रिशूलवरदाभयपा
णि: ॥ नम: शंभवइति पूजा। अस्य वहस्य इति हिरण्यगर्भो रुद्र: ॥ चंदनं कर्पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्त० रगंधः ॥ धत्तूरपुष्पं ॥ दशांगधूपः ॥ घृतपायसंनैवेद्यं ॥ तदेवप्रधानद्रव्यं ॥ ॥नदी०
पुनर्वसुकृष्णेबुधहानिः ॥ अदितिर्देवतासाक्षसूत्रकमंडलुवरकरस्कंधदर्भपाणिः ॥
११० अदितिर्योरितिपूजा ॥ अस्यात्रयोदितिःकुंकुमगंधः ॥ मल्लिकापुष्पं ॥ मल
यजधूपः ॥ मुद्गौदननैवेद्यं ॥ घृततंडुलाः ॥ प्रधानद्रव्यं ॥ आश्लेषासुवैध
व्यं ॥ सर्पदेवता ॥ त्रिशीर्षः ॥ नमोस्तुसर्पेभ्यइतिपूजा ॥ अस्याग्निविराट ॥
कुंकुमाग्निरगंधः ॥ अगस्तिपुष्पं ॥ घृतगुग्गुलधूपः ॥ क्षीरघृतनैवेद्यं ॥ दधिघृत
नैवेद्यं ॥ दधिघृतप्रधानद्रव्यं ॥ मघायांवैधव्यं ॥ पितरोदेवता ॥ पुच्छाक्षसूत्र
कमंडलुवराभयपाणयः ॥ आयंतुनःपितरइतिपूजा ॥ अस्यप्रजापति ११०
स्तिष्टपू ॥ पितरः ॥ कृष्णागरगंधं ॥ चंपकपुष्पं ॥ गुग्गुलधूपः ॥ घृतपाय
सनैवेद्यं ॥ तिलतंदुलाः प्रधानद्रव्यं ॥ पूर्वायांवैधव्यंभगोदेवता ॥ कमला
सनः ॥ अभयपद्महस्तः ॥ यन्मेगर्भइतिपूजा ॥ रक्तचंदनं ॥ करवीरपुष्पं ॥

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिल्वपेशिकाधूपः ॥ कृसरं नैवेद्यं ॥ ओदनास्तिलजमिश्रकृसरः ॥ परिकीर्ति-
ताः ॥ सप्तव्रीहयः प्रधानद्रव्यं ॥ पूर्वाषाढायां वैधव्यं ॥ आपो देवता नाम कृश्या
हनः कमलयुक्तद्विभुजोऽत्वं नो अग्ने वरुणस्येति पूजा ॥ अस्या वामदेव त्रि-
ष्टुप् ॥ चंदनं ॥ शालपत्रपुष्पं ॥ दशांगधूपः ॥ घृतौदनं नैवेद्यं ॥ घृतशाल्येयः
प्रधानद्रव्यं ॥ शालताराकायां दारिद्र्यं ॥ वरुणो देवता ॥ क्षत्रस्य राजा ॥ वरु-
णोऽधिराजा ॥ यज्ञेशो राजा ॥ उदयेनुदु इति द्वाभ्यां पूजा ॥ गायत्र्यानि आज्यपू-
पसहोमः ॥ शालताराकादोषः अश्व एव दक्षिणा पूर्वाभाद्रे वैधव्यं ॥ अज एकपाद्दे-
वता ॥ भुवि न्यस्तवामपादः ॥ ऊर्ध्वप्रसारितदक्षिणपादः ॥ द्वयोरक्षसूत्र
कमंडलुः ॥ द्वौ मुकुलीकृतो होमम्ग्निरग्निभिरिति पूजा ॥ अस्यानुष्टुप् ॥ इंदी-
वरजं एव पात्रं ॥ अर्कपुष्पं ॥ सर्वौषधीधूपः ॥ दधिसर्पिःपायसं नैवेद्यं ॥
कूष्मांड प्रधानद्रव्यं ॥ अजामेरसमिधाहविभिः ॥ व्याहृतिभिर्होमः ॥ कार्यः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम् त्रिथो विरुद्धपक्षे स्तति ॥ त्रिष्विं देवतामंत्रेण ॥ नमोंते आज्यद्रव्येण होमः का भद्री०
१२० र्यः ॥ नवम्यां दुर्गादेवतां जातवेदसे मंत्रेणावाहनादि पूजा कार्या ॥ तेनैव हो
मः ॥ तिलत्सर्पिसहितं प्रधानद्रव्यं ॥ सौवर्णसिंहवाहनी दुर्गामूर्त्तिः पूजा ॥
सुवर्णं दक्षिणा ॥ रविवारे निष्टा आदित्यमूर्त्तिः पूजा ॥ सुवर्णं दक्षिणा ॥
रविवारे निष्टा आदित्यमूर्त्तिः कार्या सौवर्णा कार्या ॥ अर्कसमिन्नि आज्य
द्रव्यं ॥ होमसंख्यामष्टोत्तरसहस्रं शतं वा ततः पूर्णाहुतिं हुत्वा ॥ शतच्छिद्र
कुंभं दंपत्योः ॥ शिरसि कृत्वा पूर्वं चतुःकोणस्थापितकुंभोदकेन आचा
र्येण ऋत्विग्भिः दंपती स्नापयेयुः ॥ दधिक्राव्ण ॥ आपोहिष्ठेति तिसृभिः ॥ हि
रण्यवर्णा इति तिसृः ॥ शिवेन मा ॥ पवमानेन स्नानेन दंपती स्नापयेयुः ॥ स १२०
मुद्रज्येष्ठाः सरास्ता ॥ आपो ना ॥ इत्येतैर्मंत्रैरभिषेकं कुर्याद्ब्राह्मणान्पूजये
त् ॥ इति दुष्टनक्षत्रप्रथमरजोदर्शनशांतिः ॥ ॥ अथ पतिव्रताधर्मः ॥
याज्ञवल्क्यः ॥ संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ॥ कुर्याच्छ्वशुरयोः पाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादवंदनं भर्तुर्न स्मरा॥ स्वंदे॥ न चरंति स्थले द्वारी न द्वारमुपसेवते॥ अदा
पितं तया किंचित्स्वयं चिन्न ददात्यपि॥ पूजोपकरणं सर्वमनुक्ता साधयेत्स्व
यं॥ नियमोद्रकवर्हिषि पत्रपुष्पाक्षतादिकं॥ दूरतो वर्जयेदेषा समजोत्सव
दर्शनं॥ न गच्छत्तीर्थयात्रादि विवाहप्रेक्षणादिषु॥ स्त्रीधर्मिणी त्रिरात्रानु
स्वमुखं नैव दर्शयेत्॥ स्ववाक्यं श्रावयेन्नापि यावत्स्नान मशुद्धितः॥ स्न
स्नाता भर्तृवदनं वीक्ष्येन्नान्यस्य न कस्यचित्॥ अथवा मनसि ध्यात्वा पतिं भा
नुं विलोकयेत्॥ हरिद्राकुंकुमं चैव सिंदूरं कज्जलं तथा॥ कूर्पासकं च तांबूलं
मंगलाभरणं शुभं॥ केशसंस्कारकवरीकरकर्णविभूषणं॥ भर्तुरायुष्यमिच्छं
ती दूरयेन्न पतिव्रता॥ भर्तुर्विद्वेषिणीं नारीं न सा संभाषते क्वचित्॥ नैकाकि
नी क्वचिद्भूयान्न नग्ना स्नाति न क्वचित्॥ नोलूखले न मुसले न वर्धिन्यां दृ
षद्यपि॥ न यंत्रके न देहल्यां सती नोपविशेत्क्वचित्॥ विना व्यवायसमयं प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रम॰ गच्छेन क्वचिदप्यरेत्॥ यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा॥ इदमेव व्रतं भट्टी॰
१२१ स्त्रीणां अयमेकोत्र वृषः परः॥ इयमेका देवपूजा भर्तुर्वाक्यं न लंघयेत्यतो॥
क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनं॥ हास्यंपरगृहेयानंत्यजेत्प्रोषितभ
र्तृकेति॥ सुप्तेर्द्धेचवणते जादिक्षयेपिचपतिव्रता॥ पतिंनास्तीतिनब्रूयादा
यासेषुनयोजयेत्॥ तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत्॥ शंकराद
पिविष्णोर्वापतिरेकोधिकःस्त्रियः॥ व्रतोपवासनियमंपतिमुल्लंघ्यमाचरे
त्॥ आयुष्यंहरतेभर्तुर्मृतानियान्निगच्छति॥ उक्ताप्रत्युत्तरंदद्यान्नारीक्रो
धेनतत्सरा॥ सरमाजायतेग्रामेशृगालीनिर्जनेवने॥ सूरमोद्द्वृष्टुनी॥ अ
भ्यर्च्यचरणौभर्तुर्भोक्तव्यंकृतनिश्चयं॥ उच्चासनंनसेवेतनसेवेतसरवैगृ
हं॥ तत्रपारकथास्यानिवक्तव्यानिकदाचन॥ अपवादंनकर्तव्यःकलहं १२१
दूरतस्त्यजेत्॥ गुरूणांसंनिधौचापिनोच्चैर्ब्रूयान्नवाहसेत्॥ याभर्तारं
राम

परित्यज्य रहश्चइत्तिदुर्मीतिः ॥ उलूकी जायते क्रूरा वृक्षकोटरशायिनी ॥ वा
स्याद्यपानमोक्रोक्यत्वरितो चजल्पोशने ॥ तांबूले व्यंजने ध्वैव पादसंवाह
नादिभिः ॥ तत्रैवचाटुवदने स्वादूसंनादने ः पदे ॥ याप्रियंप्रीणयेप्रीता
त्रिलोकीप्रीणतातथा ॥ भर्त्तादयो गुरुर्भर्त्ता धर्मतीर्थव्रतानि च ॥ तस्मात्स
र्वंपरित्यज्य पतिमेकं समर्चयेत् ॥ यावत्स्त्रीरोमसंख्याऽस्ति तावत्कोट्ययुता
नि च ॥ भर्त्ता स्वर्गसुखं भुंक्ते रममाणा पतिव्रता ॥ धन्या सा जननी माता ध
न्योसौ जनकः पुनः ॥ धन्यास्ता च पतिः श्रीमान् येषां गेहे पतिव्रता ॥ विभ्र
सा तिव्रतास्पर्शं कुरुते भानुमानपि ॥ सोमो गंधवहश्चापि स्वपवित्र्याय
नान्यथा ॥ देवपितृतिथिस्याज्यादिना भार्यः कर्म चार्हति ॥ गृहस्थः सहवि
ज्ञेयो यस्य गेहे पतिव्रता ॥ ॥ इतिपतिव्रताधर्मः ॥ अथ विधवानियमः ॥
मातृखंडे ॥ विधवाकबरीबंधो भर्तुबंधाय जायते ॥ शिरसोवपनं तस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध०सं० कार्यं विधवया पहं ॥ सदा ॥ एकाहारः सदा कार्यो न द्वितीयः कदाचन पर्यंक भट्टी०
शायिनी नारी विधवा पातयेत्पतिं ॥ तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥
१२२ नैवांगोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् ॥ गंधद्रव्यस्य संभोगो नैव
कार्यस्तथा पुनः ॥ तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः ॥ तत्पितुस्तत्पितु
श्चापि नामगोत्रादिपूर्वकं ॥ विष्णोस्तु पूजनं कार्यं पतिबुध्या वनान्यथा ॥
यद्यत्पतिष्टतमं लोके यच्चपत्युः समीहितं ॥ तत्तद्गुणवते देयं पतिप्रीणन
काम्यया ॥ वैशाखे कार्तिके माघे विशेषान्नियमाचरेत् ॥ स्नानं दानं तीर्थ
यात्रां विष्णोर्नामग्रहं मुहुः ॥ वैशाखे जलकुंभाश्च कार्तिके घृतदीपकाः ॥
माघे तिलधनोत्सर्गः स्वर्गलोके विशिष्यते ॥ प्रपा कार्या च वैशाखे देवे देया १२२
गलंतिका ॥ उपानद्व्यंजनं वस्त्रं सूक्ष्मवासास्तु चंदनं ॥ सकर्पूरं च तांबूलं पु
ष्पदानं तथैव च ॥ जलपात्राण्यनेकानि तथा पुष्पगृहाणि च ॥ देयानि द्वि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमुख्येभ्यः श्रीपतिः प्रीयतामिति ॥ ऊर्जे यवान्नमश्नीयादेकान्नमथवा पु-
नः ॥ वृंताकं सूरणं चैव शूकशिंबिं विवर्जयेत् ॥ अपुत्रा या स्वपुत्रा वा विधवा कां-
स्यभोजने ॥ वस्त्रहीनकृतस्नाना सूतके शानरकं व्रजेत् ॥ व्यासः ॥ ब्रह्मचारी
यतिश्चैव विधवा कांस्यभोजनं ॥ तांबूलं चर्चितं तैलं तुल्यं गोमांसभक्षणं ॥
कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु ॥ कार्तिके वर्जयेत्कांस्यं कार्तिके शापि-
संचितं ॥ कांस्यनिषेधोन्यविषयः ॥ विधवायाः पारल्कनिषेधात् ॥ कार्तिके मौ-
ननियमे घंटां वापि प्रदापयेत् ॥ पत्रभोजी कांस्यपात्रं घृतपूर्णं प्रयच्छति ॥
भूमिशय्याव्रते दद्याच्छय्यां सूक्ष्मास्तरतूलिकां ॥ फलत्यागे फलं देयं रसत्या-
गे च तद्रसान् ॥ धान्यत्यागे च तद्धान्यमथवा शालयः स्मृताः ॥ धेनुं दद्यात्प्रय-
त्नेन स्वालंकारां सकांचनां ॥ फलं ॥ सर्वदानानि दीपदानं लक्षैः कृतैः ॥ का-
र्तिके दीपदानस्य कलां नार्हंति षोडशीं ॥ किंचिदभ्युदिते सूर्ये माघस्ना-
नं समाचरेत् ॥ यथा वाल्याच नियमान्माघस्नानं समाचरेत् ॥ पक्षान्तरे

कृत्य॰ जयेद्धि प्राप्यते नोपि न परिक्षितः ॥ कुंकुमैः फेणिकाभिश्च घटकोर्डारकादिभिः भट्टो॰
घृतपक्वैः समरिचैः शुचि कर्पूरवासितैः ॥ कंचूकं तु लगर्भं च तुल्लिकां स्तप
१२३ वीत्तिकां ॥ मांजिष्ठरक्तवाससा सितथानूलवतीपटी ॥ जालीफलन वंगोभ्यर्ता
वृत्तानि बहून्यपि ॥ कंबलानि विचित्राणि नियाणानि गृहाणि च ॥ मद्यजाः
यादरक्षाश्चैव सुगंधद्रव्यानि च ॥ दद्यात्तत्र यत्नेन ब्राह्मणेभ्यो यथाविधि ॥
अष्टं श्रूलुरक्तां नांकिंचिन्न कुर्यात्स्तु नत्सराः ॥ एवं पराचयानि सं विधवापि
शुभामता ॥ इति चैत्राख्य कार्तिक माघमासे नियमाः ॥ ॥ अथ रजस्वला
नियमाः ॥ आर्तवाभिप्लुता नारी नैव वेश्मनि संविशेत् ॥ न स्वर्गं व्रजे तस्याद्
स्नातायाः पापमुच्यते ॥ त्रिरात्रं स्वमुखं नैव दर्शयेत् ॥ स्ववाक्यं न श्रावये १२३
येत् ॥ अंजनाभ्यंजनं स्नानं प्रवासं दंतधावनं ॥ न कुर्यात्सार्त्तवा नारी गृहाय
चेणामीक्षणं तथा ॥ नखानां कृंतनं रज्जुतालपात्रादिवंधनं ॥ दग्धशरावे राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुंजीत न पेयं चांजलिना पिबेत् ॥ अत्रिः ॥ वर्जयेन्मधुमांसे च पात्रस्वर्वे च भोज
न ॥ गंधमाल्यं दिवास्वापं तांबूलं चास्यशोधनं ॥ रक्तनिमंजयां ॥ तस्मादुदक्यया
सार्धं एकगेहे न संवसेत् ॥ प्रलिग्रहं च सर्वादं आस्याअन्नं च वर्जयेत् ॥ रजस्व
लापत्निं गच्छश्चांडालो जायते सुतः ॥ आर्तवाभिप्लुतास्नाना जाता स्त्वक्षमरि
ष्यति ॥ तैलेनाभ्यंजनं कुर्यात्कुष्टरोगी च जायते ॥ आर्तवे निखनं भूमिं मत्या
युर्जायते खलः ॥ नेत्रयोरंजनं कुर्यात्काणो वधस्तु जायते ॥ पुष्पिणी दंतधावि
स्याज्जायते स्यामदंतकः ॥ नखानां छेदनं कुर्यात्कुनखी जायते सुतः ॥ पर्णपा
त्रेण चास्नाया दुर्मोही जायते सुतः ॥ सर्वरात्रौ च भुंजीया हाम नावाश्च जाय
ते ॥ उदक्या पल्लवः अक्षौर्ह गंधपुष्पघृतं जपेत् ॥ दिवानिद्रां च तांबूलं तालवृं
तातवं धनं ॥ शौचादिशोधनं जस्यात्प्रजा दोषकरं स्मृतं ॥ कांस्यपात्रे न म
श्नीयात्कालिनं क्षीरवर्जितं ॥ चर्म कार्ष्टमये वापि पादुका वाधिरोहयेत् ॥ र
जस्वला युदास्य स्तुरश्वान शूद्रा संजेभवेत् ॥ नाचं निष्टेन्निराहारा स्नाता का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्म॰ लेन शुध्यति ॥ अशक्तौ स्नपयास्तानां दत्त्वाज्ञाकृत्यां च दक्षिणां ॥ एवमुक्तप्र म॰टी॰
१२८ कारेण तिस्रो रात्रीर्व्रतं चरेत् ॥ शुद्धा भर्तुश्चतुर्थेह्नि स्नाने न स्त्री रजस्वला ॥
दैवकर्मणि पित्र्ये च पंचमेहनि शुध्यति ॥ अत्र नन्तु रिति भर्तुः संभागार्थमि
त्यर्थः ॥ रजस्वला यदि स्नाता पुनरेव रजस्वला ॥ अष्टादशादिनादर्वागशुचि
त्वं न विद्यते ॥ एकोनविंशतिरर्वाग् एकाहस्यान्ततो द्व्यहं ॥ ततः प्रभृत्यूर्ध्वं तु
त्रिरात्रमशुचिर्भवेत् ॥ अयं रजोदोषनिषेधः ॥ कश्चित्करजोदर्शनेपि स्या
त्यागेवाष्टादशादिनात्सर्वदा रजोनिर्गमस्तस्याश्चिरात्रं ॥ वस्त्रेष्टत्वाच्चरक
स्नानात्स्नापकैश्च विनिर्गतं ॥ पश्येत देवप्रतिमां वासुदेवस्वरूपिणीं ॥ अ
याराम भर्तारं नान्यं कंचन सत्वरं ॥ तत्काले चंदनं यस्य पश्येत्स यथाविधिं ॥ १२८
सा प्रसूते स्वसुतानां मंशुभं वाप्यथवाशुभं ॥ पूजनं वासुदेवस्य स्यात्सुरूसोत्या
भ्मनएवच ॥ अथवा सूर्यपश्येत् ॥ अपरजस्वलास्नाने ॥ प्रकार ॥ पाराशर ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजस्वला त्रिरात्रं ते मलं प्रक्षाल्य संगवे दंतानां धावनं कृत्वा मृत्तिकाष्टि
भिः पृथक् ॥ शौचं कृत्वा ततो देहं प्रक्षाल्य गोमयवारिणा ॥ स्नायात्सचेलेना
गारे तत्कोदिजलाशये ॥ अत्रिः ॥ रजस्वला चतुर्थेऽन्हि मृत्तिकाषष्टिभिः
पृथक् ॥ शौचं कृत्वा यथान्यायं दंतानां धावनं तथा ॥ कृत्वा तु संगवे तीरे स
चेलं स्नानमाचरेत् ॥ भस्मगोमयमृत्स्निग्धैः सर्वैरन्यतमेन वा ॥ स्नात्वा
शुद्धं परिधाय गंधपुष्पैरलंकृता ॥ आचम्य पुष्परादि सुमर्चयित्वा यथो
चितं ॥ ऐंद्रं वरप्रभो मह्यमिदानीं दातुमर्हसि ॥ इत्युक्त्वा थेंद्रं भावनं प्रार्थ
येत्सुखकं पतिं ॥ ऋतुस्नाता तु या नारी यस्तेहान्नरमीक्षते ॥ तादृशं जन
येत्पुत्रं पतिमेव निरीक्षयेत् ॥ प्रजापतिः ॥ अविज्ञाते रजो यस्यामज्ञव
हस्तना यदि ॥ कृत्तगहेषु लिष्टत्स्या हिंसाता अशुचिरिष्यते ॥ यमः ॥ व्यस
नात्कार्यकरणान्निद्राविवरणादपि ॥ रजस्त्रावमविज्ञातासा शुचिः श्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शु०म० कर्मणः॥ज्ञानादूर्ध्वं यदिस्पष्टाशाधयेत्कर्मसाधनं॥मन्मया॥न पारस्परस्य ॥६॥०
स्त्रहान्यपि विज्ञाप्येत्॥तत्क्षणंदारस्तंगरच्छेकांस्यपात्रभस्मभिः शतः॥म
१२५ हं विलेपयन्मृद्भिर्गोमयेन च वारिणा॥धान्यानां च सर्वेषां प्रोक्षणाच्छुद्धि
रिष्यते॥ज्ञाताज्ञातेषु दोषेषु अनुक्तेष्वशुभेषु च॥पुण्याहवाचनं कुर्याद्वि
प्राणामनुशासनात्॥तथा॥असंदिग्धेपरिज्ञाते ज्ञाते वै शुद्धिकारणं॥
संदिग्धमात्रेस्नानं स्यादित्युवाच प्रजापतिः॥कात्यायनः॥रात्र्यास्त्वतु
र्थभागात्प्राग्यदि वार्त्तासियो षिनः॥मत्उरस्या स्त्रिभागेन पूर्वेणापूहा
लुप्तध्यति॥असंगतेयदारतर्ये यदिता रात्रिजस्वला॥जन्मन्यव विपत्तौ
च पक्षहस्त्रलस्य शर्वरी॥अर्धरात्रावधिं कालेसूतकादौविधीयते॥उ १२५
षसः प्राग्जनः स्त्रीणां विज्ञेयपूर्वके दिने॥दिवावाय दिवारात्रौ मल
वद्वसनायदि॥तद्दिनादित्रिरात्रं स्यान्नेसंख्यानमिह कारयत्॥प्रजापतिः॥
राम

रात्रौ तृतीयभागात्प्राक् यदि नारी रजस्वला ॥ पूर्वाण्हानुसंशुद्धाऽऽर्ध्वे चेत्
दुत्तराहनि ॥ रात्रावेवरमुत्पन्ने मृतं जन्मसि सूतके ॥ पूर्वमेव दिनं ग्राह्यं या
वन्नाभ्युदितो रविः ॥ एवंवचनं ॥ विरोधस्तु निगदेशोनरेतो व्यवच्छित्तिया
श्च वंश्यनाम्क ॥ रजस्वलावेतु नारीणां रजोदोषाद्दिनत्रयं ॥ चतुर्थे दिवसे स्ना
नास्पर्शदानाच निंदिता ॥ चतुर्थे दिवसे रात्रौ रजो योन्यां तु दृश्यते ॥ मोहा
द्गृत्वा द्विजः कुर्यात्त्रिरात्रं समुपोषणं ॥ आपस्तंबः ॥ चतुर्थ्यां रात्रौ गर्भाधा
नमिति ॥ सर्वमैथुनकालोस्तु स्नानाद्वादशरात्रयः ॥ चतुर्थ्यां केचिदिच्छ
न्ति तां समध्यं तु पण्डिताः ॥ गर्गव्यासः ॥ अष्टांगमैथुनं त्यागो ब्रह्मचर्यं प्रच
क्षते ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ संकल्पोध्यवसायश्च
क्रियानिष्पत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्र
ह्मचर्यं तदेवाष्टविधिं स्मृतं ॥ एकादशी विषये पैठीनसिः ॥ भार्यापस्कुर्वतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ८म· कुर्यान्द्भार्यायाश्चापतिव्रतं ॥ अभावे पुत्रिनरत्नाभ्यां व्रतभंगो न विद्यते ॥ ॥ भट्टी०
अथ पुंसवनं ॥ पुमान्येन कर्मणा जायते तत्पुंसवनं ॥ कारिका ॥ तृतीये गर्भ
१२६ संस्कारो मासि पुंसवनं भवेत् ॥ आद्ये गर्भे न विज्ञातस्तृतीये मासि चेद्यदि ॥
चतुर्थे मासि कार्यमित्ययं विधिराद्यगर्भ एव ॥ नृसिंहः ॥ सीमंतोन्नयनं
चोक्तं तिथिवारसदादिषु ॥ पुंसवं कारयेद्विद्वान् ॥ सहैवैकदिनथवेतिः ॥
शौनकः ॥ व्यक्तो गर्भस्तृतीये तु मासे पुंसवनं भवेत् ॥ गर्भोऽव्यक्तस्तृतीये चेच
च्चतुर्थे मासि वा भवेत् ॥ पूर्वस्मिन्निव सपत्नीह विष्वेकाशनाभवेत् ॥ वृद्धिः
श्राद्धं पतिः कुर्यात् ब्रह्मचारी भवेत्तदा ॥ समानवर्णवत्साय गोक्षीरं प्रभ १२५
वेद्यधि ॥ त्रीन्यवान्माषयुद्धं च संपाद्य तेनानि निक्षिपेत् ॥ किंचिद्गृहैकदेशं
चरंमणीयावकाशकं ॥ चैताकारं तु तच्छायासंपन्नपरिकल्पयेत् ॥ वधूम
पि कृतस्नानं धृतधौतांबरद्वयं ॥ भूषितां गंधमाल्याद्यैः कृतपुण्याहवाचनं ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतकौतुकबंधां तां कारयित्वाथ शोभने ॥ मुहूर्ते स्वस्तिकं कृत्वा वह्निमोपा
सनं ततः ॥ द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् ॥ व्यक्ते गर्भे भवेत्का
र्यं सीमंतनं सहाथवा ॥ आषाढयुक्प्रोष्ठपदद्वयं च मूलार्द्राहस्तः श्रवणश्च
पुष्यः ॥ एतानि येषु सवने हितानि वारास्तथो भौमरविर्गुरुश्च ॥ पूर्वेद्युर्नां
दीश्राद्धं गर्भिण्याः एकभोजनं भवेत् ॥ तथा च स्मर्यते ॥ पुंसवने च सीमंतन
यां चौलोपनयने गोदाने स्नाने उद्वाहे नांदीश्राद्धं पुरादिने ॥ अथवा परस्कृति
ब्यर्क्षश्रवणे वा पोषिनाह चिषुण एकेवारं कृत्वा स्नानं ॥ पत्नी दक्षिणतः पूर्वे
न्यस्तिथ्यादिकं स्मृत्वा ॥ अस्याः भार्यायाः पुत्रजननार्थं बैजिकगार्भिकदो
षपरिहारार्थं अस्यां विद्यमानस्य पुंस्त्वप्रतिपादनार्थं गर्भसंस्कारार्थं च पुं
सवनाख्यमनवलोभनाख्यं च कर्म करिष्ये ॥ तत्रान्वाधाने इत्यादि चक्षुषं
नमुक्त्वा प्रजापतिं चरुद्रव्येण साद्यपूर्णपात्रनिधानांतं कृत्वा प्रजापतये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्प्र ताजुष्टं निर्वपामीति मंत्रेण निर्वपणं प्रोक्षणं कृत्वा चरुश्रपणाद्याज्यसंस्कारा भ.प्र.१०
न्तं कुर्यात् ॥ अथ पत्नीं दक्षिणत उपवेश्य इध्माधानाद्याज्यभागांतं कुर्यात् ॥
१२७ तथा होमं कृ॥ आचांततो यानीत्यग्निमात्मानमपि शांतस्य ॥ आत्मनो दक्षि
णे पक्षे पार्श्वे प्राङ्मुखीमुपवेशयेत् ॥ ततः तरणसंस्पृष्टो वध्वेध्मानं पूर्ववत्कं ॥ पु
रस्तात्तंत्रशेषं तु समाप्य च यथाविधि ॥ जयंतोऽपि ॥ ततः इध्माधानं कृत्वं
तं पत्नीमग्निमात्मानं चांतरेण गमयित्वा आत्मनो दक्षिणत उपविश्य इध्माधा
नाद्याज्यभागांतं करोति ॥ तत्र अभावे होमं कृत्वं दक्षिणपत्न्युपवेशनांत
कृं ॥ आज्यसंस्कारपर्यंतमवघातादि पूर्ववत् ॥ समानरूपवत्सायागो
दधे प्रस्तरो क्षिपेत् ॥ इति प्रकृतं ॥ अथ पत्न्याः प्रसूतीकृतं दक्षिणहस्तं प्रा १२७
क्ष्य समानरूपवत्सायागोर्दधिप्रस्तरो क्षिपेत् ॥ तादृशगोऽभावे तु अन्य
स्या गो क्षिपेत् ॥ अंगुष्ठानामाषद्वयं द्विशः स्थाने यव तत्र क्षिप्त्वा किंपिब
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीतिन्नीः दृष्ट्वा पुंसवनमिति त्रिः प्रस्थकास्य यवमाषधिनिः शेषं पीत्वा
चमेत् ॥ पुनरेवं द्विः आद्याचामेत् ॥ शौनकोपि ॥ आत्मनो दक्षिणे पार्श्वे
प्राङ्मुखीमुपवेशयेत् ॥ ततः करेण संस्पृष्ट विध्वेध्माधान पूर्वकं ॥ पुंस्त्वा न
नत्र शेषं तु समयाप्य यथाविधिः ॥ तत्र प्रक्षालितं पाणिं भार्यायाः प्रसृती
कृतं ॥ दध्नाः प्रसृतिमात्रेण पूरयित्वा तथास्य तु ॥ अन्यत्र प्रागुक्तमेव दध्न
श्चोपरि निक्षिप्य लिंगानुरूपं यवं ॥ अंडानकारिणो माषो क्षिप्त्वा तु यव
ध शीवयः ॥ ततः किं पिबसीति त्रिर्वदन् पृष्टः स्वधः पुनः त्रिः पुंसवनमेस्कं का
वधूं सयवमाषकं पीत्वा तच्छिनिः शेषमाचम्य दुद्रक्रं ततः ॥ अनेन पनवः प्र
कारेण पुनर्द्विः द्विधिः पानयेत् ॥ ततः आशानन्तरं तोयमाचामेदेवधानतो त्रिः ॥
एवं प्रसृतित्रयं प्राशयेत् ॥ कारिका ॥ एवं पुंसवनं प्रोक्तमथ यत्नेनवलोभनं ॥
अथ सूत्रं ॥ अथास्मै मंडलागारच्छायायामिति ॥ अत्र कर्मान्तरत्वात्काला
न्तरप्राप्तावानंतर्यार्थोथशब्दः ॥ इतःपरं यद्वक्ष्यत्ते यदनवलोभनं ॥ पूर्वक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्म॰ ल्पितुरोहच्छायायां च धूमु पवेश्य दक्षिण नासिकायां दूर्वारसं गर्भिण्या प्र भट्टी॰
१२८ स्यकृदेवो प्राङ्मुखस्तिष्ठन् तूष्णीं सिंचेत् ॥ प्रजावज्जीवपुत्राभ्यां सकाभ्यां
वा सिंचेत् ॥ आत्तेगर्भः ॥ अग्निरैतु ॥ ९ तो प्रजावज्जीवं पुत्रो सह्शितो मंत्रो ॥
आत्तेगर्भ इत्यृद्धयो हिरण्यगर्भस्तू पऋषिः ॥ प्रथमाया अग्निर्देवता द्वि
तीयायावरुणो देवता ॥ अनुष्टुप्गायत्रिछंदसी भार्याया दक्षिणनासायां दूर्वा
रससिंचने विनियोगः ॥ जयंत ॥ लस्यारसन पूर्वकं वदु पविष्टायां दक्षिण
स्मिन्नासविच्छेरस्य यं वत स्याः १ष्ठन स्तिष्ठन् ॥ तूष्णीमेव सिंचेदिति ॥
शोनकोपिः ॥ प्रसंगेदत्ता स्त्रिया लिष्टन्दक्षिणे नासिका बिले ॥ तथा दूर्वा
रसं सिंचेद्यथा दरू मतं भवेत् ॥ इति ॥ अग्निसमीपमागत्य ॥ पूर्ववत् दूष १२८
विरूयच दावनधर्मेण चरुमवदाव ध्याः १ष्ठः प्रजापतये स्वाहा तत्र सत्तुदं
रेंगत्ते ता माचम्यत्तं चरुम्य च दाप वध्याः १ष्ठः प्रजापतये स्वाहा वराहे राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येकामाहुतिं हुत्वा पत्न्या हृदयं स्पृशेत् ॥ यत्ते सुसीमे इति मंत्रस्य हिरण्यग
र्भः प्रजापतिरनुष्टुप् ॥ भार्याया हृदयालंभने विनियोगः ॥ ततः स्विष्टकृ
तादितंत्रं समापयेत् ॥ कारिका ॥ अन्यत्वादूरिदं कर्म ऋतुस्नातस्यास्मिं
उक्ते ॥ इदं कर्म गर्भसंस्कारत्वात्प्रतिगर्भमावर्तेत ॥ गांगेयः ॥ पुंसवनं कर्म
नित्यत्वात्प्रतिगर्भं प्रचक्षते ॥ गर्भं तु प्रथमे कार्यमिति केचित्प्रचक्षते नि।
अस्य कर्मकर्ता पतिः ॥ देवरो वा भवेत् ॥ पुंसवनस्य मासप्राधान्येन वि
हितत्वाद्द्रस्पुरकृमोऽप्यपि कर्तव्यतायम्यते ॥ तदाह बृहस्पतिः ॥ मासप्र
पुत्रमार्गेषु मूढत्वं गुरुस्थुरकृयोः ॥ तदोषकृत्तदा मासेलक्षणाबलवानिति ॥
अथ सीमंतोन्नयनं ॥ सीमंतो मुन्नीयते यस्मिन्कर्मणि तत्सीमंतोन्नय
नं ॥ तच्चतुर्थे गर्भमासे षष्ठाष्टमयोर्वा कार्यं षष्ठाष्टमयोरिस्ययेकालार्थं द्रा
द्वेनस्यचित ॥ कथं ॥ अथाग्निमुपसमाधायेतिरस्त्रं ॥ अथ पत्राद्धोन्यस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशम० न्नापि भवतीदकं मैत्रिज्ञानार्थे इति नारायणः ॥ शौनकः ॥ चतुर्थे गर्भमासे भ०टी०
स्यात्सीमंतोन्नयनक्रिया ॥ षष्ठेष्टमे वा कुर्वीत नरस्तत्रैतद्विधानतः ॥ अभा
वे पूर्वपूर्वस्य विधिरुत्तरोत्तरे ॥ अत्रिः ॥ आधानादष्टमे मासि सीमंतोन्नयनं
१२९ भवेत् ॥ नवमे मासि वा कुर्याद्यावद्गर्भविमोचनं ॥ सीमंतोन्नयनं कार्यमा
दित्यो गुरुभौमयोः ॥ मृगे पुनर्वसौ पुष्ये हस्ते मूले च वैष्णवे ॥ पुन्नामाश्र
वणस्तिष्याहस्तश्रवे वपुनर्वसू ॥ आसि जित्प्रोष्ठपा चैव अनुराधा तथाश्वि
युक् ॥ मेषमिथुनसिंहतुलाधनकुंभाः ॥ एतानि लग्नानि स्युः ॥ कारिका ॥
वृक्षस्य मध्यमे पादद्वये कर्मदामिष्यते ॥ प्राज्ञी च मूर्ध्वे ॥ अथ प्रयोगः ॥
संकल्प्य ॥ पूर्ववत् ॥ प्रतिगर्भमिति विशेषः ॥ पूर्वेद्युर्नांदीश्राद्धं कृत्वा पर
द्युर्मंगलाचारयुतोऽलंकृता मुख्यः ॥ स्वस्त्ययनापत्नीसंनिधायस्य पुनः १२९
संकल्प्य मुख्यामस्याग्नौ सीमंतोन्नयनहोमं चान्वाधानं करिष्य इत्यादि च
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रूक्ष्मं त्समुत्क्ताद्धियारं धातारं गं कां ह्विर त्विगो त्कादेवता प्रजापतिं चाज्य द्रव्ये
ण शेषेण स्विष्टकृत मग्निमित्यादि समिल्प्रक्षेपणांतमं त्वाधानं कृत्वा पात्रा
सादनं कुर्यात् ॥ तत्र क्रम ॥ तत्र आज्यसादनांतं कृत्वा पात्राग्नेः पश्चादास्तरस्य
दक्षिणतः स्थिता प्रागग्री वोर्ध्व ज्ञोम्नि च कर्मण्युपविष्टायां समन्वारब्धायां
तस्यामिध्मान्वाधानाद्याज्यभागांतं कृत्वा प्रधान होमं कुर्यात् ॥ आज्य संस्कार
पर्यंत मंत्रै र्धाता ददा मीत्विति ॥ ज यंतो पि ॥ आज्य संस्कार पर्यंत कर्म कृत्वा
ति ॥ ततो गृह प्रवेश नप्रकारेणा त्के नाविधानेन चर्मा स्तीर्य तस्मिन्न चमाणि
त्वा लौकिक मंगल स्वस्ति वाचनांतं कृत मासा नो दक्षिणतउपविश्य तया
समन्वारब्धा ध्मान्वाधानाद्याज्य भागांतं कृत्वा धाता ददा मी त्वि त्यादिभि र्जुहुयादि
ति ॥ अथ प्रकृतं ॥ धाता ददातु चित्विष्ठु यो र्वामदेवो धातानुष्टुप् ॥ आज्य होमे
वि ॥ ॐ धाता ददातु दाशुषे प्राचीं जीवातु मक्षितं ॥ वयं देवस्य धीमहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०क० स्फुमती वाजिनी वन्नः॥ स्वाहा॥ धात्र इदं॥ ॐ धाता प्रजानामुत राय ईशे धा भट्टी०
१३० त्रेदं विश्वं भुवनं जजान॥ धाता कृष्टीरनिमिषाभिचष्टे धात्र इद्धव्यं घृतव
ज्जुहोत॥ धात्र इदं॥ रक्षा महद्वयमिति द्वयोः शौनको गृत्समदो वा ऋषिः जग
ती॥ आज्यहोमे वि०॥ नेजमेषेति तिसृणां गर्भकर्ता च ष्टा ऋषिः॥ लिंगो
क्ता देवता॥ अनुष्टुप् छंदः॥ आज्यहोमे वि०॥ प्रजापते हिरण्यगर्भः प्रजाप
तिस्त्रिष्टुप्॥ इदं स्त्र्याज्याहुतिहुता स्त्रियः॥ प्रसंगे शप्रयज्जमुखाच्छितो उदं
बरपक्वफलैस्तवकद्वयेन त्रिशुक्लया शलल्या त्रिभिश्च कुशपिंजलैरेकी
कृतैर्भर्तुर्मध्यसमं ललाटकेशयोः मारभ्य मूर्ध्नि देशान्मूर्द्धदेशपर्यंतं॥
ॐ भूर्भुवः स्वः चरामि इति मंत्रस्य प्रजापतिः प्राजापत्ये हतो॥ सीमंतस्यु
हने विनियोगः॥ अथ चास्य युग्मनसंख्याद्धुमगड्डे प्रदेन॥ आमफले शलाटुः १३०
स्यादित्यमरः॥ उदुंबरस्तबकं॥ उदुंबरस्तबकेन शास्त्रान्तरे दृष्टत्वात्॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभावेन्यतरस्यांण्यास्त्रिषु येनी श्येणी वर्णादनुदात्तात्तोपधात्तोनः इति ङीप्॥
तकारस्य नत्वं ॥ अवदातः सितो गौरः शुद्धो लोध्रः कर्बुर इत्यमरः ॥ कुशाः पिञ्ज
लेः कुशास्तरणे के आर्द्रैः एभिरेकीकृतैर्लोष्टकेशायोः ॥ सुधिमार्यालोर्ध्व
सीमन्तं व्यूहयेत्॥ अन्त्रजं यंत ॥ एताभिर्भिराज्याहुतीर्हुत्वा त्वात्क्षुद्रयतस्याः
पृष्ठतस्थित्वा ष्टनु र्चाभिमुखः कर्मं करोतीति ॥ अथ शौनकः ॥ हुत्वा त्वायुष्य
यत्स्य देशानुप्राङ्मुखः स्थिताः ॥ औदुम्बरं च सत्वचं कं युग्मां फलान्वितं ॥ भिन्नेः १५
शुक्लैस्त्रिभिः युक्तं शलल्या त्रिकुशां कुशानु ॥ एकी कृत्य गृहीत्वा तान्हसभूरता
नेव पाणिना ॥ सीमन्तं व्यूहेदित्तिशेषः ॥ अथ गायनार्थं वीणावेनौ विप्रौ सं
शास्ति ॥ सोमं राजानं संगायेतामिति प्रेषणानो ॥ सोमा नो राजा वस्त्विसे
नाम चेत्यथालक्षणं गायतां ॥ असौ स्थाने स्मी पनघाः सं बुध्यानामग्र
यात्॥ निविष्टचक्रावरदेतिय देत्॥ अथ वीणागाधिनौ संशास्तीति सूत्रं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽद्यम० वीणाचगाथाचविणागाथेतेयपोस्तोसंरागास्ति॥सोमंराजानमित्यादिम्रे भट्टी०
षेणप्रेषितोद्विजो॥ऋचंसोमोनइत्याद्यांगायतांसहवीणायेति॥अरेरो
१३१ स्थानसमीपनघानामसंध्यंतंचवेदेत॥प्रज्ञानिविष्टचक्राकावेरीसेवमा
दिनिदर्शनं॥यद्दिनंसमनाधीतंत्रिर्जपेनामचंतदा॥ततःस्विष्टकृदादि
समाप्य॥ब्राह्मणेभावेब्राह्मणेभ्यःऋषभंदद्यात्॥स्त्राग्निजीवपतिका
भिर्यथाद्युपदिष्टंतदपिकुर्यात्॥अस्यकर्मणःस्वसूत्रेचक्रता॥भावर्तनं
इदंकर्मप्रतिगर्भइतिरिक्षिति॥तत्रोचोक्तं॥अस्यमपुत्रकामायगर्भ
माधेहीतिस्त्रसंस्कारमतीतेः॥प्रतिगर्भनावर्तनमितिगम्यते॥सकृत्स्नुक
तसंस्कारासीमंतेनद्विजालयः॥प्रतिगर्भप्रस्वत्यतेसगर्भःसंस्कृतोभ
वेत्॥कालेभकृत्स्नेवचास्त्रीप्रसूतात्तदाग्निंकुर्यादित्याह॥सत्यव्रतः॥ १३१
स्त्रीयद्यकृतसीमंताप्रसूयेतकथंचन॥पुत्रंगृह्यविधिवस्तुनःसंस्कार
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्हन्ति ॥ गर्गोपि ॥ यदि सीमंतं नतः पूर्वं प्रसूता चेत्तु मानिनी ॥ तदातां पे
ष्टकेन गर्भस्थाप्यसंस्कारमाचरेत् ॥ ॥ इति सीमंतोन्नयनं ॥ ॥ अथ जात
कर्म ॥ होमपक्षेभवल्लोग्नि ॥ जातादिस्नानादिस्नानपर्यंतं कर्मस्याभ्यु
दयिक्रियां ॥ पिता कुर्यात्तदूर्ध्वं तु पारिणेनाथा विधि ॥ हेमाद्रौ ॥ देवाश्चैव
पुत्रे जाते द्विजन्मानां ॥ अर्योनिजस्मात्तदहः पुण्यं पूज्यं सर्वदा ॥ तत्र दद्या
त्स्वर्णं च भूमिं गां तुरंगं रथं ॥ वस्त्रं यानं च माल्यं च शयनं चासनं गृहं ॥
स्तु याज्ञवल्क्यः ॥ कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रह ॥ हिरण्यभू
गवाश्वादि धान्यवस्त्र्यासनादिषु ॥ तत्र सर्वं प्रतिग्राह्यं पक्वान्नं च विवर्जे
यत् ॥ अभ्यंगवाद्धिस्नाने दंतधावनमैथुनं ॥ जाते च निधने चैव तिथिं छि
त्वा तु कालिकीभवेत् ॥ रात्रीकृत्वा त्रिभागं तु द्वौ भागौ पूर्ववासर ॥ उत्तरा
शः प्रभावेन स्कोत्कीपाक[illegible]नोरकृत ॥ सचैलं स्नात्वा तिथ्यादिकं संकीर्त्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु.धम. अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेनातिशयार्थं मेधादिप्रा भट्टी०
स्त्यर्थं जातकर्म करिष्ये इत्यादि संकल्प्य स्वस्तिवाचनपूर्वकं हिरण्येनाभ्युद
१३२ यिकं कुर्यात् ॥ तथा च स्मृतिः ॥ अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ॥
हेमश्राद्धं प्रकुर्वीत चंद्रसूर्यग्रहे तथा ॥ इदं कर्मस्यज्ञानुयोग्यानोस्यज्ञाना
भाष्कार्यं अथ कर्मस्मिन्पात्रे सर्पिर्मधुनी यथालाभं ॥ संसृज्य तथा हिरण्य
नावघृष्य दक्षिणहस्तोपविष्टायां मातुरुत्संगमारूढं कुमारं प्रते दद्या
मीति मंत्रेण सर्पिर्मधुनी हिरण्येन प्राशयेत् ॥ ततो दक्षिणकर्णे हिरण्यं
निधाय तस्य मुखसमीपे आत्मनो मुखं नीत्वा मेधां त इंद्र इति च जपेत् ॥ मेधां
त इंद्र स्य वामदेवो मेधानुष्टुप् ॥ तथैव सव्यकर्णे निधायेतां मंत्रं जपेत् ॥ १३२
अथ स्कंधं ॥ अंशाभिमृशति मयूचन्नजीषिमिति च ते ॥ अस्यार्थोऽपि
तो ॥ स्तनवाहोर्मध्यप्रदेशो निशास ॥ अत्र त्रयः पक्षः ॥ सष्ठदेवत्रयाम
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना:॥ पर्यायेणाभिमर्शनमिति॥ भार्याभिमर्शनवत्॥ न तु युक्तस्तत्र सह
मंत्रः॥ द्विर्वचनयुक्तत्वात्कुम्भमंत्रस्य॥ इह तु एकवचनयुक्त॥ अत आह स्या
भाव्यं॥ नेतद्देवात्रासाध्युचेतिष्किल हि कुमारः॥ स चेन्द्रस्तस्मान्नाहत्तिरि
ति॥ एकमंत्रः॥ अस्माभवेंद्रश्रेष्ठास्यस्मेप्रयंधीति॥ इति प्रथमपक्षः॥ ॥
अथ द्वितीयः॥ अस्माभवेति दक्षिणांशं॥ इंद्रश्रेष्ठान्यस्मेप्रयंधीति॥ इश्यो
यामांशमिति॥ कथमेतत्॥ मध्ये इतिकरात्॥ न हि कश्चिन्मंत्रमध्य इति
करं पठेदिति॥ इति द्वितीयः पक्षः॥ अथ तृतीयः॥ सकृद्वत्तितो मं
त्रावृत्त्या॥ न च मंत्रविभाग॥ न च पृथगभिमर्शः॥ भार्याभिमर्शन
त्॥ कथं तावत्तथाभिमर्शः॥ इह तु रोचयेत॥ युगपद्दर्शोस्तु दृष्ट्वा त्रिषु पक्षेषु तृ
तीयः॥ श्रेयान्॥ यथा च कारिका॥ ऋक्क्रयेणास्य युगपद्दंसामभिमर्शोद
यः॥ प्रथमास्माभवेतींद्रःश्रेष्ठानिसपरात्वा॥ तृतीयास्मेप्रयंधीतिकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्म मार्यास्यादमंत्रकर्मेति ॥ अस्य त्रयाणामन्यतमः पक्षोऽभिप्रेतः तस्यापि कृ भट्टी०
१३३ र्तृत्वे न दोषः ॥ सर्वेषांगमकत्वादिति भाष्यकारः ॥ तत्रैकमंत्रविभागः ॥
श्रेयान्निस्साहु ॥ इंद्रश्रेष्ठानीसस्येऽग्नस्मदइंद्रस्त्रिष्टुप् ॥ अस्मे प्रयंधीत्य
स्य घोर ऋषिः इंद्रस्त्रिष्टुप् ॥ ओं स्याभिमर्शने ॥ कुमारं दक्षिणहस्तं निधाय ॥
इमं मंत्रं जपेत् ॥ स मंत्रः ॥ इमां कुमारा जरां धयतु दीर्घमायुः प्रजीव सेऽ ॥ अ
स्यैस्तनोऽप्र युंजानाः आयुर्वर्चो यशो बलं ॥ ततः ॥ बोधयन्मेधादिभिश्चत
सृभिराशिषा वाचयेत् ॥ बोधश्च मेति चतसृणां वामदेवोऽग्निर्गायत्री ॥
कुमारस्याशीर्वचने विं ॥ एतत्कुमार्या अभि अमंत्रकं स्यात् ॥ रात्रौ संध्या
यां ग्रहणे जातश्चेद्वा कार्यं ॥ अन्याशौचे तदंते कार्यं ॥ ॥ इति जातकर्म ॥ १३३
अथ नामकर्मोच्यते ॥ तज्जातकर्मोच्यतेऽनंतरं कार्यं ॥ अथ जन्मदिनादार
भ्य एकादशे वा कार्यं ॥ उक्तं च मनुना ॥ नामधेयं दशम्यां वा द्वादश्यां वापि का
रयेत् ॥ पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते इति ॥ दशम्यामतीयामिसर्थः ॥ ना
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाचस्मर्यते ॥ एकादशेऽह्निविप्राणांक्षत्रियाणांत्रयोदशेवैश्यानांषोड
शेकार्यंमासांतेशूद्रजन्मनिगतिः ॥ अथशौनकः ॥ द्वादशेनामधपित्र्येदेवा
मेद्वादशेऽपिवा ॥ कुमार्याघट्ठागुणयुक्तनक्षत्रेषुगुणेशिशाः ॥ उत्तरात्रयरो
हिण्यामैत्रंचित्रातथाश्विनी ॥ पुष्यपुनर्वसोस्वातीरेवत्यांशशिदैवते ॥ श्रव
णत्रयहस्तेषुनामधेयंशुभावहमिति ॥ अन्नप्राशनेपिएतानिनक्षत्राणि ॥
अथपत्नीकुमारौदक्षिणतउपवेश्यअस्यकुमारस्यबीजगर्भसमुद्भवैनोनि
बर्हणार्थंअभिवादनविवाहादिव्यवहारसिध्यर्थंना
मकरणाख्यंकर्मकरिष्ये ॥ इतिसंकल्प्य ॥ स्वस्तिवाचनंशर्वरुंनांदीश्राद्धंकुर्या
त् ॥ तत्रपुण्याहवाचनेस्वस्तिपर्यायमध्यस्थनाम्नेस्वभवेतोब्रुवंतु ॥ इतिवि
प्रान्वदेत् ॥ ततोरामनाम्नेस्वस्तीतिप्रत्यूचुः ॥ अथाभिवादनीयंचोपांशुभूनि
र्दिशेच्च ॥ तदुपनयनपर्यंतंमातापितरौविजानीतां ॥ अदिहोमक्रियते
तर्हिजननादशाहंतिलहुत्वा ॥ स्वस्तिपर्यायमध्येशर्वदेवन्नामदेताभ्यविष्टह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋष्म० दादिहोममशेषं समापयेत् ॥ तथा च शौनकः ॥७ पुरस्तात्तत्र आचार्यः कृत्वाना ११ही०
देशा आहुतीः ॥ तत्र स्तेनैव पुण्याहप्रकारेण यथाक्रमं ॥ नामाधिष्ठितमाद
१३८ यतत ॥ स्विष्टकृत्सदादिकमिति ॥ अस्मिन्पक्षे स्वगृह्योक्तं कार्यमिति भा
वः ॥ अत्र पार्थिवो नामाग्निः ॥ अथ नामलक्षणं ॥ पुंसां द्व्यक्षरं चतुरक्षरं वा
नाम भवेत् ॥ तत्र घोषवदक्षरमादौ कृत्वा मध्ये यरलवाश्चान्ते विसर्जनी
यं ॥ यथा हरदेवः ॥ नागदेवः ॥ भुद्रदत्तः ॥ ईदृग्लक्षणं व्यवहारार्थं नाम
ग्मा जानीयात् ॥ स्तत्रैव ॥ युग्मानि तेषु पुंसां ॥ मेति युग्माक्षराणि स्त्रीणां भवन्ति ॥ पिता
हादिषु जन्मनाम जानीयात् ॥ अथ गर्गः ॥ आह ॥ मासनाम गुरोर्नाम दद्याद्बा
लस्य वैपिताः ॥ कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः ॥ उपेन्द्रो यज्ञपुर १३८
षो वासुदेवस्तथा हरिः ॥ योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ॥
मार्गशीर्षादितिज्ञेयः ॥ अत्र मनुभाष्यविज्ञानेश्वरः ॥ ८ चतुर्थ्यन्तमुदीर्य
दोपितामहनामकर्मणः ॥ स्वाखिलत्याप्यनुवर्तं भवतु सदमुदीरयन् मादिति ॥ ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मवद्ब्राह्मणेभ्यो लंकं राज्ञो राजा हि समन्वितं ॥ वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य
प्रेष्यसंयुक्तमिति ॥ ॥ इति नामकर्म ॥ ॥ अथ निष्क्रमणं ॥ चतुर्थे मासि
षष्ठे वा शुक्लपक्षे पुण्यर्क्षे कार्यं ॥ स्नानकोपि ॥ मासि चतुर्थे षष्ठे वा शिशोर्नि
ष्क्रमणं गृहादिति ॥ पत्न्यंकस्थं कुमारं दक्षिणत उपवेश्य तिथ्यादि संकी
र्त्य ॥ अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेनायुरायार्थं आरोग्या
दिसिद्ध्यर्थं निष्क्रमणाख्यं कर्म करिष्ये ॥ तदंगस्वस्तिवाचनपूर्वकं नांदी
श्राद्धं विधाय ॥ स्नानमलंकृतं समुत्कस्वस्तं शिशुमादाय देवायतनं गत्वा
देवं विधिवदभ्यर्च्य ब्राह्मणानामाशिषो गृहीत्वा देवं प्रदक्षिणीकृत्य मा
तृश्वशुरगृहं मातुलगृहं वा गत्वा तत्र आशिषो गृहीत्वा स्वगृहं गच्छेत् ॥ ए
वं कृते दीर्घायुर्भवति ॥ आचार्यस्मृतौ ॥ भोजयित्वा द्विजानाहस्वस्तिवा
चनमाचरेत् ॥ शंखकुंतेभ्रजपत्रस्त्रके शिशोर्निष्क्रमणे पिता ॥ शंखकुंतककनि
कदत्तेज्जनुषंप्रदक्षिणिदभीते इस्त्रके ॥ द्विजांश्चादर्शपूर्वाणि मंगला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊस्म॰ निपुरानयतृ॥ द्दपणः पूर्णकलशाः कन्यारूमनुरक्षाक्षत॥ दीपमाला गद्य॰
ध्वजतोरणाः संप्रोक्तं चाष्टमंगलं॥ विवाहे निष्क्रमे कार्ये स्टोत्सवे समारंभे॥
१३५ उत्सवेषु च यात्रायां प्रदर्शयेत्तं चाष्टमंगलं॥ अथ पंचममासे कर्तव्यो पवेशान
विधिः॥ पराशरो वामदेवस्तु पुष्कराणां कृ॥ पंचमे च तथा मासि भूमौ लमुपवे
शयेन्नु गते ऽसर्वग्रहाश्शस्ता॥ भौमारामदिशेषतस्तिथिं च वर्जयेद्रिक्तांश
स्तानि शुभानि मे॥ उत्तरात्रि[illegible]लंयं सौम्यं पुष्यं ऋक्षं तु त्रैदेवतं॥ प्राजापत्यं
च हस्तं च शस्तमश्विनं मित्रभं॥ वराह पूजयेद्देवं पृथिवीं च तथा द्विजान्॥
पूजनं शर्व वत्सलं तागुरुदेवद्विजन्मनां॥ भूभागमुपलिप्याथ हस्तान्ते तु मंड
ले॥ शीरेत्पुण्याहशब्दैन्नु भूमौ तमुपवेशयेत्॥ मंत्रश्चात्र भवेत्प्रमातन्भोनिग १३५
दनः शृणु॥ क्षेमं चैव रक्षा धेदेहि सदा सर्वगतं शुभं॥ आयुःप्रमाणं सकलं नि
क्षिपस्व हरिप्रिये॥ अचिरायुषस्त्वस्य ए केचित्सरिपंथिनः॥ जीवितारो
ग्यवित्तेषु निर्दहस्वाप चिरेण तान्॥ धरिण्य शेषभूतानां मातस्त्वमधिकास्यसि॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजाराचाप्रमेयाचरत्सर्वभूतनमस्कृते ॥ त्वमेवाद्रोषुजगतांप्रतिष्ठाचाश्रयो
स्यसि ॥ कुमारंपाहिमातस्त्वंअस्मादनुमन्यतां ॥ तस्योपवेशनंकृताभूमौप्राश्य
णकृजनं ॥ ततः कृत्वाततः कार्यमुत्सवंपूर्ववद्विजैः ॥ उत्सवोनीराजनादिः ॥ त
एतत्कुमार्याप्युपलक्षणं ॥ इतिपुराणोक्तोबालोपवेशनविधिः ॥ अथान्नप्रा
शनविधिः ॥ तत्रषष्ठेमासिभवति ॥ अष्टमेचेतिकेचित् ॥ नामकरणोक्त
नक्षत्रेस्तुमुहूर्तेतिथ्यादिकेसंकीर्त्यअस्यकु[illegible]मारस्यसर्वकामसि
द्ध्यर्थंबलपुष्टिआयुरभिवृद्ध्यर्थंचअन्नप्राशनाख्यंकर्मकरिष्ये ॥ इतिसंकल्प्य ॥
पूर्वेद्युर्नान्दीश्राद्धंपरेद्युर्नित्यकर्मानंतरंदक्षिणतः प्राङ्मुखस्नातमलंकृतं
मुपवेश्यसंकल्पानंतरंदधिमधुघृतमिश्रमन्नपात्रेनस्येतिमंत्रेणप्राशयेत् ॥
अथयथेष्टंयथाभवति ॥ मुखंप्रक्षाल्यतेनसार्वकामोभवति ॥ अन्नपतइत्यस्य
नलकूबरोनपंक्तिर्बृहती ॥ प्राशने ॥ अनेनप्रा[illegible]यमंकेवलंप्राशयित्वा
पुनस्तूष्णींयथेष्टंभोजयित्वामुखंप्रक्षाल्य ॥ स्विष्टकृतादिहोमशेषंसमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुम व्य॥ ब्राह्मणा भोजयित्वा दक्षिणां दत्वा आशिषो वाचयेत्॥ शौनकः॥ हो म.टी०
मपक्षाश्रये त्रापि जातकर्म यदाचरेत्॥ वृद्धिश्राद्धं तु पूर्वेद्युरतस्मिन्पक्षे
१३६ समाचरेत्॥ उत्तरेद्युस्तु बध्नीत कौतुकं तु यथाविधीति॥ अन्नप्राशनमाती
थ्यादिवाहं वा स्वकर्म चरात्यावहनि नाकुर्याच्छेषाण्यहनि कारयेत्॥ इत्यन्न
प्राशनविधिः॥ अत्र शुचिरग्निः॥ अन्नप्राशनानंतरं जीविकापरिक्षा॥ का
मार्कंडेयेन॥ अग्रतोऽर्थ नविन्यस्य शिल्पभांडानि सर्वशः॥ अस्त्राणि चैव
शास्त्राणि ततः पश्येत्तु लक्षणं॥ प्रथमं यत्स्पृशेद्बालः ततो भांडं स्वयं तदा॥
जीविका बालस्य तेनैव तु भविष्यति॥ इति जीविकापरिक्षा॥ अथ चौल
कर्मकाल उच्यते॥ मनुः॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्रथमे १३५
ब्दे तृतीये वा कर्तव्यं श्रुतिनोदनात्॥ यमस्तु॥ ततः संवत्सरे पूर्णे चूडाक
र्म विधीयते॥ वा तृतीये कर्तव्यं श्रुतिचोदनात्॥ आचार्यस्मृतौ॥ तृती
ये पंचमे वाब्दे चौलकर्म प्रशस्यते॥ प्राग्वा समे तु समे वा सहोपनयनेन च॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यादिविरुद्धवचनानां कुलधर्मानुसारतो व्यवस्था ॥ येषां कुले यस्मिन्व
र्षे कर्तव्यं ॥ एतद्वा हरति कारः सद्गुरुशिष्यः ॥ ज्ञाताधिकारात्तृन्मादित
यद्वेतु चौलकं ॥ यादृशः कुलधर्मः स्यात्तादृशं चौलकर्म च ॥ अपरे तु कुर्वन्ते
केचित्संचमेन्येद्वितीयके ॥ उपनीत्यासहैवेति विकल्पः कुलधर्मतः ॥ तथा च
कारिकायां ॥ यथान्वयं वा केषांचिदुपनीत्या सह व्यानेति ॥ एवं यथोक्तचौड
दगयने आपूर्यमाणपक्षे कल्याणनक्षत्रे कार्यं ॥ अथ तत्र चक्रं ॥ उदगयन आपू
र्यमाणपक्षे कल्याणनक्षत्रे चौलकर्मोपनयनगोदानविवाहाः सार्वकालमेके
विवाहं तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात् ॥ अग्न आयूंषि पवस इति ॥
इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिर्वा समुच्चयमेके ते
के काञ्चन समयमाभवतीति यत्कर्णीनाम मिति विवाहे चतुर्थीति ॥ अस्यार्थः ॥
चौलकर्मेति चौलस्य संज्ञा ॥ कर्मशब्दस्य सार्थकता किं स्या गोदानचौलवत्का
र्यमिस्कृत्वा तु ॥ चौलग्रहणेनैव गोदानप्राप्तौ तस्यां पुनः गोदानेग्रहणस्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्म० मावर्तनार्थं ॥ विवाहस्तूदगयनादिकालादपि यस्मिन्काले भवति तथा
चरमर्यते ॥ ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छतीत्यादिसंकटवचनात् ॥ भट्टी०
१३८ चतुर्ग्रहणाद्राज्यभागो न भवति ॥ विवाहे नुत्तमर्षमेति चतुर्थ्यादिरिति ॥ अज्ञा
पत्तये इति पंचमी ॥ स्पष्टमन्यत् ॥ चौलकर्मोपनयने विवाहप्रथमस्तथा ॥ ब्र
तानि चान्यस्मिन् पूर्वेद्युर्मिसेषां लौकिकुर्याद्वतल्लतिर्वृच्छितीति ॥ समीपपर्णी
नि चान्यस्मिन् दारा वन्यस्य भूतले ॥ तत्रैव वरच्छापयेद्दारास्तु सात्रस्य पार्श्व
तः ॥ भगवान् ॥ पूर्वेद्युरेव वत्सकुलोत्तं भारं श्वमथो चितान् ॥ संभृत्याभ्युद
त्या यश्राद्धमपि कुर्याद्यथाविधि ॥ शाब्देन ग्रहयज्ञोऽरसमुच्चयुते ॥ अनयोः शु
भकर्मादौ करतो ॥ अथ चौलप्रयोगः ॥ गृहमुख्यकृत्य पूर्वेद्युर्नांदीश्राद्धं कु
र्यात् ॥ तथाह भगवान् ॥ पूर्वेद्युरेव वत्सकुलान्तभारं श्वयथा चितान् संभृ १३८
त्याभ्युदयश्राद्धमपि कुर्यात् यथाविधि ॥ अत्र पिशाब्देन स्तुतिरस्ति पौच
नग्रहयज्ञोऽरसमुच्चार्यते ॥ अनयोः शुभकर्मादौ करत्वात् ॥ अथ चौलप्रयोग राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यादि ॥ सूतकादिप्राप्तौ तस्य कालावधिमाह ॥ एकविंशात्यहर्यज्ञे विवाहे द
शवासरान् ॥ त्रिषट् चौलोपनयने नांदीश्राद्धे पुरा दिने ॥ त्रिषट् दशविंशत्या
प्रारब्धे नास्ति सूतकमिति ॥ अथ प्रकृतं ॥ अपरेद्युः शूद्रवत्स्नातकमन्त्रेरु
लयकृत्स्वस्त्ययनं कृत्वा कौतुकबंधं ॥ पत्न्यां कृच्छ्रं कुमारं दक्षिणत उपवेश्य लौ
किकाग्नौ प्रतिष्ठाप्य तस्य नाम इति भवति ॥ मनुः ॥ जातकर्मादिसंस्काराः
जातकर्मोपलक्षणं ॥ यथाधानमारभ्य चौलपर्यंतं कर्माण्यतीतानि चेत्तानि
प्रायश्चित्तपूर्वकाणि कृत्वा चौलं कुर्यात् ॥ कात्यायनः ॥ लुप्ते कर्मणि सर्वत्र
प्रायश्चित्तमेकैकेषु संस्कारेषु पादकृच्छ्रं स्यात् ॥ चौले त्वर्द्धकृच्छ्रं ॥ आदौ का
लातीतहोमं कृत्वा चौलोक्तहोमं कुर्यात् ॥ कालातीतहोमं कृत्वा कृतं मिसृकृ
त्वात् ॥ तत्रेदं कारिका ॥ प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ॥ कार्यमि
त्येकमाचार्यो नितन्यनु विपश्चिन्नति ॥ अथ प्रकृतं ॥ अत्र संकल्पः ॥ अस्य
कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेनायुरभिवृद्ध्यर्थं चौलाख्यं कर्म क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्प॰ रिष्येइतिसंकल्प्य ॥ तत्रान्वाधानं करिष्ये देवतापरिग्रहार्थमित्यादिनिधानां भट्टी॰
तं कुर्यात् ॥ उराधारांतमुक्त्वा ॥ पवमानमग्निः प्रजापतिश्च एते इंद्रप्रधान
१३९ देवते आज्यद्रव्येणेत्यादि शर्वं वसूर्णपात्रनिधानांतं कुर्यात् ॥ अत्र सभ्या
ग्निः ॥ अथाग्नेरुदग्भागे व्रीहियवमाषतिलैः ॥ पूर्णानि शरावाणि दध्या
त् ॥ यवाभावे व्रीहयो ग्राह्याः एकस्मिन् शरावे अनडुह गोमयं द्वितीय शरा
वे शमीपर्णानि च निक्षिप्य एते द्वे शरावे मातुः समीपे निदध्यात् ॥ अथज
यंतः ॥ अग्निप्रतिष्ठापनांतं कृत्वाग्नेरुत्तरतश्चत्वारि शरावाणि व्रीह्यादिभिः
पूरितानि प्रागग्राणि स्थापयेत् ॥ अंकेन बिभ्रती पुत्रमासीत प्राङ्मुखी स
ती ॥ तस्याः पुरस्तादग्नेश्च पश्चादानडुहं सकृत् ॥ अस्य द्भूमि विन्यस्य श
रावसादयेत्ततः ॥ कारिका ॥ पूर्णपात्रनिधानांतमुपलेपादि पूर्ववत् ॥ १३९
व्रीहिपूर्णं शरावं स्यात् यवपूर्णं तथापरं ॥ माषपूर्णं तथाप्यन्यत् तिलपूर्णं
तथापरमिति ॥ आचार्यः ॥ केशानं सहजातानां माषधात्वं निगल्यतेगृ॥ ए राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताः स्कपक्वाच्छेद्यास्कंदीजानुदृष्ट्वा स्मरेत्तथा ॥ अथ मातुर्दक्षिणतः पिता
एकविंशतिकुशांकुरानादाय ॥ अस्मिन्पक्षे अन्य एव कर्ता स्यात् ॥ ब्रह्मा
वादाय आस्ते ॥ कारिका ॥ मातुर्दक्षिणतो ब्रह्मासनमसनत्तु च सनच ॥ कुशा
पिंजूलकानांनुगृहीत्वास्तथचा पितेति ॥ पितुर्धारणपक्षे अन्य एव कर्ता स्या
दिति ॥ अत एव शौनकः ॥ ततः कुमारस्य पिता पिता हस्ते विभृत्कुशांकुरा
न् ॥ एकविंशति मासीनानां शिरो मातुरुत्संगे दक्षिण ॥ पितुरन्योभवेदर्थी पक्षे
यस्मिन्श्चौलकर्मणः ॥ ब्रह्मत्वेन हि पार्श्वे प्राधीरयद्वा कुशांकुरान् ॥ अस्मि
न्पक्षे पिते चाल्लकर्ता चौलस्य कर्मणः ॥ अथाज्यसंस्काराघारान्कृत्वाप्र
धानहोमं कुर्यात् ॥ संग्रहे ॥ चौलोपनीयाम खिलव्रतेषु ब्रह्मौदनेदार
परिग्रहे च ॥ स्नाने च गोदानविधौ च सर्वान्नैवाज्यभागौ प्रवदंति संतः ॥
अग्न आयूंषि लिति स्रुणोमांगिरसा ज्ञातवैश्वानरस ऋषयः ॥ अग्निः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ.स. पवमानो देवता ॥ गायत्री छंदः ॥ प्रधान आज्यहोमे वि० ॥ इति चतसृभिर्हुत्वा भट्टी०
१३९ व्याहृतिर्वा जुहोति ॥ समुच्चय पक्षे अष्टावाहुतयो भवंति ॥ ऋगाहुतयः ४
व्याहृत्याहुतयश्च एता वीष्टाहुतयः ॥ नैकैकांच न पक्षे अनादेशाहुतीत्वा कु
मारस्य पृश्चात्स्थित्वा दक्षिणहस्तवामोदकं ॥ गृहीत्वा एकस्मिन्पात्रे उष्णेन
वा उदकेन तस्य न न मंत्रेण युगपत्प्रक्षिपन् ॥ तत्र नवनीतं क्षिपेत् ॥ अभावे दधि
रसं क्षिप्त्वा मिश्रीकृत्य तदपा मकदेशं गृहीत्वा ॥ अदितिः केशादियादि मंत्रेण
वामकर्णादारभ्य दक्षिणशिरश्चिरं दे नु ॥ आर्द्रं कुर्यादित्यर्थः ॥ प्रक्लेदनमि
त्याहुः ॥ अथ बालस्य दक्षिणे केशपक्षे त्रीन् कुशान् भ्यात्मात्रानोषधे
त्रायस्वैनमिति मंत्रेण न्यसेत् ॥ स्वधिते इति मंत्रेण लोहक्षुरं न्यसेत् ॥ १३९
अथ तंत्रं ॥ स्वधिते मैनं हिंसीरिति निष्पीड्य लोहेन क्षुरेण प्रच्छिन्नत्तीति ॥
अस्यार्थः ॥ स्वधिते नेन मंत्रेण तानि कुशापिंजूलानि निष्पीड्य तेनैषुक्ष्कु
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्स्थापयतीत्यर्थः ॥ लोहक्षुरो लोह एव प्रसिद्धः ॥ अतोऽत्र तस्य वाच्यत्वा
त् ॥ लोहशब्दस्ताम्रे वर्तते ॥ शास्त्रांतरविहितत्वाच्च ॥ लोहशब्दश्चार्यर
जतादिष्वपि वर्तते ॥ अत्र तु ताम्रे ॥ तथा दृष्टत्वात् ॥ ततो येनावपदिति मं
त्रेण सकृत्केशं यथा तां छिंद्यात् ॥ तान्कुशान् शमीपर्णैः सह भार्याहस्ते दद्या
त् ॥ सा च तान् गोमये निदध्यात् ॥ पुनः कुशपिंजूलनिधानादि कृत्वा येन
धातेत्यनेन छिंद्यात् ॥ पुनः कुशपिंजूलनिधानादि पूर्ववत् ॥ कृत्वा येन भूय
श्चेत्यनेन मंत्रेण छित्वा ॥ चतुर्थं कुशपिंजूलनिधानादि तद्वत्कृत्वा एष्विति
मंत्रेण छिंद्यात् ॥ कारिका ॥ एकमेवात्र वच्छेदनं भवेत् ॥ ततः क्षुरेणेति मं
त्रेणायतमारभ्य मूलपर्यंतं क्षुरधारां निमृज्यात् ॥ स मंत्रः ॥ यत्क्षुरेण म
र्चं ॥ अथ शीतोष्णाभिरद्भिरिति ॥ प्रेषेण नापितमनुशास्ति ॥ ततः शी
तोष्णैः पूर्वाचैरोषितैः ॥ तोयैः केशानार्द्रीकृत्य वरगाचारतः शिखां कृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्० वपेत्तु ॥ मध्ये शिरसि चूडा स्यात् ॥ वसिष्ठानां तु दक्षिणे ॥ उभयोः पार्श्व भट्टी०
योरत्रिकश्यपानां शिखा मता ॥ यथोक्तकेशान् स्नातं कुमारं दक्षिणतउप
१४० वेश्य क्लिष्टकृशरादि समापयेत् ॥ व्रीह्यादिपात्रचतुष्टयं नापिताय दद्यात् ॥
एतत्सर्वं होमं विना कुमार्या अमंत्रकं स्यात् ॥ अथाभ्युदयिकब्राह्मणान् भो
जयेत् ॥ कुमारोऽपि विधिप्राशं मात्रा सह भोजनं कुर्यात् ॥ इति चौलकर्म ॥
शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ॥ तत्तु पंचमवर्षे गर्भिणी य
दि वा भवेत् ॥ गार्भिण्यां मातरि शिशोः क्षौरं शस्त्रेण न कारयेत् ॥ पंचमा
ब्दात्प्रागथोर्ध्वं च गर्भिण्यामपि कारयेत् ॥ चूडाकर्म शिशोर्माता गर्भिणी
यदि वा भवेत् ॥ गर्भस्य वा विपत्तिः स्याद्दृश्यो वा शिशोरपि सहोपनीत्या
कुर्याच्चेत्तनो दोषान् विपत्तेति ॥ अथोपनयनं ॥ तत्राष्टमवर्षे गर्भाष्टमे १४०
वा कार्यं ॥ ब्रह्मवर्चसकामो भिरध्ययर्थं विप्रो ठ पंचमे हनि ॥ आचार्यः ॥ गर्भाष्ट राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवाब्दे पंचमे वा सप्तमे पि वा॥ द्विजत्वं प्राप्नुयाद्विप्रो वर्षेत्वेकादशे नृपः॥ वै
श्यः॥ ब्रह्मवर्चसकामस्य जन्मतो गर्भतो पि वा॥ सप्तमेब्दे पि कुर्वीत ब्राह्म
णस्योपनयनं॥ आश्वलायनः॥ मुख्यकालस्त्वबलवान्त्रन गोचरस्तु द्विजः॥
कालातिक्रमणे चेद्गुरुः शुद्धिं न चिंतयेत्॥ काम्यकालः॥ तत्र विष्णुः॥ षष्ठेतु
धनकामस्य विद्याकामस्य सप्तमे॥ अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः॥
९ कर्तव्यं दशमे वर्षे लग्नकामस्य वै तथा॥ एकादशे तिंद्रियार्थी पश्वर्थी द्वादशे द्वि
के॥ द्वादशोब्दे त्वतिक्रांते प्रायश्चित्तार्हको द्विजः॥ युष्ठदंतिय श्वदूरके पावमा
निभिरेव च॥ ऋग्यजुःसामभिः पुण्यैः स्नानं कृत्वा चरेद्व्रतं॥ मौंजीबंधनतः कु
र्यात्षोडशाद्वा सति नो भवेत्॥ याज्ञवल्क्यः॥ आषोडशाद्द्वाविंशाच्चतुर्विंशा
च्च वत्सरात्॥ ब्रह्मक्षत्रियवैश्यानां काल औपनयनीयकः॥ परः॥ अत ऊर्ध्वं पतं
सेति सर्वधर्मबहिष्कृतः॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोरिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उप० कलापिन स्मृतु पन यनाधिकारसिद्धेऽग्नि ग पित वा पनयस्तु पन द भाषा पूर्व नप
ता॥ तदभावे पितृभ्राता तदभावे तु सोदरः॥ इति गर्गः॥ पिता पितामहो भ्रा
१४१ ता ज्ञातयो गोत्रजाग्रजाः॥ उपनयनेऽधिकारी स्यात्पूर्वाभावे परः परः॥ अथ
प्रायश्चित्तं॥ कपर्दिकारिकाः॥ आचार्य आदौ स्वशरीरशुद्धिं कृत्वा॥ यथाशि
ष्यशरीरशुद्धिः॥ कृच्छ्रत्रयं प्रथमं यथावत्कुर्यात्ततस्त्रमुपनयस्य नांदी
श्राद्धं कृत्वा पश्चादेनं ध्यापयेत् कारिकाः॥ मौंजीबंधनं तदा कुर्याद्विधाबंधनेन का
रयेत्॥ अथ प्रयोगः॥ प्रवर्षेयुर्यथोक्तस्वस्तंदासामर्यो सत्पाघाचम्य प्राणाना
यम्य तिथ्यादि संकीर्त्यास्य वटोरुपनयने गायत्र्युपदेशाधिकारार्थं कृ
च्छ्रत्रयमितं प्रायश्चित्तं करिष्ये॥ ततः अस्य वटोः कामवाद कामचार काम १४१
भक्षणादि दोषपरिहारेणोपनयनाधिकारार्थं कृच्छ्रत्रयमितं प्रायश्चित्तं
करिष्ये॥ यद्युपनयनकर्मणा सह चौलकरणपक्षे संस्कारद्वयं संकीर्त्य युग राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पस्वस्तिवाचनग्रहयज्ञनांदीश्राद्धं कुर्यात् ॥ अथग्रहयज्ञः ॥ तत्रसंकल्पः ॥
अस्यकुमारस्यउपनयनांगत्वेनग्रहानुकूल्यसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं
ग्रहयज्ञंकरिष्ये ॥ इतिसंकल्प्य ॥ ग्रहयज्ञंसमाप्यस्वस्तिवाचनपूर्वकंनांदीश्रा
द्धंकुर्यात् ॥ तथैवचसमर्थने ॥ कृत्वाभ्युदयिकंश्राद्धंस्वस्तिवाचनपूर्वकमिति ॥ तत्र
संकल्पः ॥ अस्यकुमारस्यवेदाध्ययनसम्यक्ब्राह्मणत्वसिध्यर्थंआरोग्यादि
प्राप्त्यर्थंसकलवेदकर्मकृद्गवेदोक्तफलप्राप्त्यर्थंउपनयनाख्यंकर्मकरिष्ये ॥ त
दंगभूतंस्वस्तिवाचनपूर्वकंनांदीश्राद्धंकरिष्ये ॥ इतिसंकल्प्य ॥ स्वस्तिवाचनं
कृत्वाकुलदेशाचारप्राप्तंचकृत्वायथाकल्पप्रकारेणनांदीश्राद्धंकुर्यात् ॥ अथाप
रेद्युः कृतस्नानमलंकृतमुक्तस्वस्त्ययनं कृतकौतुककवंधं कृतभोजनमुपा
त्तमांगल्योपिस्नानं ज्योतिःशास्त्रोक्तमुहूर्तेस्वसमीपमानीयतत्पुरस्तत्सम्य
गीक्षते ॥ अथसूत्रं ॥ अलंकृतंकुमारंकुशलीकृतशिरसमुद्रनिकुशलीकरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुक्म॰ वपनमित्यर्थः॥ इत्यादिकं संकीर्त्य अस्य कुमारस्य द्विजत्वसिध्यर्थं उपनयना भट्टी॰
ख्यं कर्म करिष्ये॥ इति संकल्प्य॥ उपलेपनाद्यग्निप्रतिष्ठांतं कृत्वा समिद्द्वयमा
१४२ दाय अस्य कुमारस्य द्विजत्वसिध्यर्थं क्रियमाणे उपनयनहोमाख्ये कर्मण्यन्वा
धानं करिष्ये॥ इत्याद्याज्यसंस्कारांतं चौलवत्कृत्वा वस्त्रं दद्यात्॥ कृतेपि तस्मि
नुपनयनाधिकारो भवति॥ कारिका॥ आज्यसंस्कारपर्यंतमुपनयनादि पूर्व
वत्॥ परिधानं भवेत्तस्य वाससे वाहतेन तु॥ भवेत्प्रावरणं वासः कृष्णाजि
नमथापि वा॥ एवंभूतं कुमारं तं कुर्याद्यज्ञोपवीतिनं॥ युवं वस्त्राणी वसस्य दी
र्घतमा मित्रावरुणौ त्रिष्टुप्॥ वस्त्रपरिधाने प्रावरणे च॥ अथ ब्रह्मचारि
णः कौपीनधारणमुच्यते कुले॥ कौपीनमात्राचरेत्तं॥ तथान्ये ब्रह्मचारि १४२
ण इति स्मृतेः॥ आचार्येणापि मेधाजनने उक्तं॥ वाससी ते स्वगुरवे मेधाजन
नकर्मणि॥ दद्यान्नास्नभस्ये कौपीनेन प्रवर्तयेदिति॥ अत्र गुरवे मेधाजनन रघा
कर्मणि॥ भगवान्॥ तत्रादौ परिधानार्थं कल्पयेन्नववस्त्रकं॥ द्वितीयं वगुरु राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं चैव मंत्रप्रावरणस्थाप्य नियं ॥ यथोक्तमजिनं वापि कृत्स्यं येद्वयगुंटनं ॥ उप
नीतं च संप्राप्य तथा कृत्स्नमगा ॥ जिनमिति ॥ अत्रेदं गृह्यसूत्रं ॥ अहतं वाससा
सेवितमेणेयेन वा ॥ जिनेन ब्राह्मणं रौरवेण क्षत्रियं माजेन वैश्यमिति ॥ अहत
लक्षणं प्रचेतसा उक्तं ॥ ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं अहतं तद्विजानी
यात्सर्वकर्मसु पावनं ॥ अन्यदपि लक्षणमस्ति ॥ अहतं यंत्रनिर्मुक्तं उक्तं वा
सः स्वयंभुवा ॥ शालं ॥ तन्मां गल्लिके षु ताच कालेन सर्वदेति ॥ क्षमा रौर
व वस्त्राणि विप्रादेरजिनानतु ॥ अहतं वस्त्रयुगमं तु श्वेतं रक्तमथापि वेति ॥
स्मसं लरं ॥ अंगुलं तद्बहि र्लोमयद्वास्या च्युतुरंगुलं ॥ अजिनं धारये द्विप्र
श्चतुर्विंशाष्टषोडशे ॥ एकं वत्रं वा बहिर्लोमाजिनं तलं ॥ एतान्निसधारणा
र्ज्ञेयं ॥ एतदुक्त्वानंतरं केचित्कुर्वंति नेच्छंसं ॥ अत्रशौनकः ॥ अथोत्थाय
गुरवन्हेः पश्चात्स्थित्वा नुगुरमाणवं ॥ प्राङ्मुखं तं मम वस्त्रं चाप्य परिधाप्येक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासस्सा वा ॥ जिनेन वेति ॥ मित्रस्य चक्षुरित्यस्य वामदेवोजिनं त्रिष्टुप् ॥ अ
१४३ जिनधारणे विनियोगः ॥ मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वी स्थवि
रं समिद्धं ॥ अनाहनस्यं वसनं जरिष्णु परिदं वाज्यजिनं दधेहं ॥ अत्र वास
सोजिनयोर्विकल्पः ॥ उभयोरपि प्रावरणार्थत्वात् ॥ एतावत्तु साधारणं ॥ यु
ग्मजिनं प्रावरणं न दातव्यं क्षत्रियवैश्ययोर्यथाक्रमेणै परौरजिनं ॥ अन्यजिना
नि भवंतीति ॥ ऐणेयपदस्य व्याख्यानं कुतः ॥ एणो येनेति सूत्रोक्तत्वात् ॥ एणस्य
स्त्री एणी तस्याः ॥ इदं एण्या ढ त्रितानि ढञ्च स्यः ॥ अ एणाभिधानं ॥ ए
ण्याश्च माघुमे नयमानं स्यैपामुत्तेर्ष्विस मरः ॥ एवं मृगयजिनं प्रावरणार्थो १४३
ग्रास्यं ॥ यत्रत्राण विरूपोद्रष्टव्यः ॥ असमनगत्यस्तत्रैकर्तव्यता मात्रमेव का
र्यं ॥ न द्वास्त्रोत्तरदृष्टा विस्तरः कर्तव्यः ॥ बेव्हल्यं यात्वगत्यालंपस्यक्रमे

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रचोदितं ॥ तस्य तावन्निश्शास्त्रार्थे कृते सर्वः कृतो भवेदिति गृह्यविदः ॥ कौ
पिनं कटिसूत्रं कमिति बहुग्रंथेषु दृष्टत्वात्तच्चैतेषु ॥ शाखांतरज्ञातव्यं ॥ अप
रं च कृष्णमृगस्य पुरुषस्यैनियतं धार्यं ॥ तच्च यज्ञोपवीतानां तरं विहितं ॥
नि अत एव शौनकः ॥ क्षिप्यक्षत्रमस्त्रं च तु वितत्याधः प्रसार्यते ॥ यथा मासेसूच्छापयि
त्वैतत्तथा कृष्णमृगाजिनमिति ॥ प्रकृतं ॥ यज्ञोपवीतेति मंत्रेण यज्ञोपवीतं
दद्यात् ॥ अस्य हिरण्यगर्भः परमात्मा त्रिष्टुप् ॥ श्रौतस्मार्तनित्यकर्मानुष्ठा
नसिध्यर्थे यज्ञोपवीतधारणे ॥ ततः कृष्णमृगाजिनं दत्वाचामेत् ॥ अथ कृ
ताचमनं बटुं आज्यं यज्ञपात्राणि चोत्तरे नीत्वा अग्निमात्मानमंतरेणोत्त
रेणानीयतं दक्षिणत उपवेशयेत् ॥ अत एव शौनकः ॥ आचांतवानमाज्यो
दियज्ञांगादुत्तरेणत्तं ॥ नीत्वा माणवमाचार्यो वन्हिचात्मानमंतरा ॥ गमयि
त्वात्मनः पार्श्वे दक्षिणे चापवेशयेतमिति ॥ अथ बर्हिरास्तरणादिस्यास
च संमार्जनांतस्यात् ॥ तथाच कारिका बर्हिरास्तरणादिस्यात्सच संमार्ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्म० नांतकर्मेति ॥ अथैध्माधानाघाघारांतं कृत्वा पूर्ववच्च तस्मान्नाहुती हु भट्टी०
त्वा अग्नेरुत्तरत आचार्योंतिके प्राङ्मुख उपविष्टे ॥ प्रत्यङ्मुखो बटुश्चेत् ॥ ये
१४४ चधानं परिहरेत् ॥ अथा आचार्यो बटोरंजलिं प्रसारयेत् उपरि आचार्य
कृतमंजलिमन्यः पूरयेत् ॥ ततस्ततस्सवितुरित्यस्य आत्रेयः श्यावाश्वः स
विता नुष्टुप् ॥ ऽवक्षारणे ॥ तत ओं देवस्य त्वेत्यादि गृह्णामीत्यंतमुक्त्वा देवद
त्तशर्मन्निति चोक्त्वा बटोर्दक्षिणं हस्तं सांगुष्ठं गृह्णीयात् ॥ पुनस्तठदपूर
णादि ॥ करग्रहे तु सविता ते हस्तमग्रभीदेवदत्तशर्मन्निति देवदत्तरौव्हे
त्त्यनामस्यात् ॥ अथाचार्यो देवस्य सवितरित्यनेन मंत्रेण उपनिमीक्षयेत् ॥
उभौ पूर्ववदुपविष्टे आचार्यः ॥ कस्य त्वेति मंत्रमुक्त्वा एनं प्रजापतये ददामीति
वदेत् ॥ शानकोपि ॥ धात्रे परिददाम्येनमिति संकल्पपूर्वकं ॥ कस्य श्रेना १४४
दिकमंत्रं ददाम्येतं गुरुर्जपेत् ॥ ततो युवा सुवासा इत्यस्य दीर्घतमसः दक्षिणं प्रा
ङ्मुखं कृत्वा उत्तराद्धुचनास्य अंसयोरुपरि पाणी धृत्वा हृदयं स्पृशेत् ॥ ओ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकोपि ॥ युवा सुवासा इत्यायमथाद्दं मुच्चमुदीर्यतं ॥ प्रदक्षिणमुपावर्त्य
प्रापयेसाङ्मुखबु टरिति ॥ युवा सुवासा इत्यस्य विश्वामित्रो ऋषिस्त्रिष्टुप् ॥
पूर्वार्द्धे च न प्रदक्षिणावर्तने ॥ प्राङ्मुखकरणे विनियोगः ॥ उत्तरार्द्धेनोत्तरा
र्द्धस्यार्द्धनेचिनियोगः ॥ पूर्ववदुपस्थानान्तोग्निं परिसमुह्य ब्रह्मचारी तूष्णीं
समिधमादध्यादिति सूत्रं ॥ परिसमूहनवचनमनर्थकं ॥ संस्कृतत्वादग्नेः ॥
सायंप्रातराधाने परिसमूहनं पर्युक्षणं स्यात्तामिति परिसमूहनवचनं ॥ अ
त्र तु परिसमूहनाद्यकृत्वैव तस्मिन्नेवाग्नौ ब्रह्मचारी तूष्णीं समिधमादध्या
त् ॥ एकमंत्रमिच्छंति ॥ समंत्र ॥ अग्नये समिधमित्यस्य वामदेवोग्निरनु
नुष्टुप् ॥ समिद्धोमे ॥ अग्नये समिधमहार्षं ॥ स्वाहा ॥ ततो हस्तं प्रक्षाल्या
ग्निमुपस्पृश्य तेजसा इति मंत्रेण ओष्ठौ विज्ञोमकोसंदंतो ■ कृत्वा मुखं
त्रिलला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्ण• यामदेवो मेखलाः स्त्रिवृत् ॥ मेखलाबंधने विः ॥ तूनोदंडं दद्यात् ॥ स्वस्ति भट्टी०
नइ सस्यस्व स्त्यास्त्र यो विश्वे देवास्त्रिवृत् ॥ दंडधारणे विः ॥ सेतु पालाशास्या
१४६ नुगात स्य प्रमाणं ॥ ललाटादूर्ध्वं परिच्छिन्न केशप्रमाणः ॥ ब्रह्मचर्यमादि
शानुगत्व चं प्रेषार्थं ब्रूयात्तु ॥ सोऽत्र नं ब्रह्मचार्यसि ॥ मूत्रपुरीषो योरलमा
चमनं कुरु ॥ कर्म कुर्वन् संध्योपासनादि ॥ दिवा मा स्वाप्सीः ॥ आचार्याधीनो वे
वेदमधीष्वेति द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहणांतं वेत्तिरस्त्रं ॥ वेदग्रहण
कथं ॥ वेदमात्र सांयंकाले विषुमस्यादिति ॥ मंत्रब्राह्मणयोर्वेदनाम ॥ ते
न महानाम्न्यादीनां व्रतानां मूर्ध्वं द्वादशाभ्यः संवत्सरान्त्युः एवं कृतोपनयन
प्रभृति षोडशवर्षं गोदानं सिद्धं ॥ वेदग्रहणाद्यमर्थोऽवंधं ॥ एवमके ॥
अन्ये तु जन्मप्रभृति षोडशवर्षं गोदानं ॥ वेदग्रहणांतं वा ब्रह्मचर्यं भवति ॥ १४६
प्रागूर्ध्वं वा द्वादशवर्षेभ्यः ॥ एवं धारसि त्वा त्रिविधं स्नानं दर्शितं विद्या
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानं व्रतस्नानं विद्याव्रतस्नानं ॥ यः प्राग्द्वादशवर्षेभ्यो वेदमधीत्य स्नाति ॥
स विद्यास्नातकः यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अनधीतवेदः स व्र
तकः ॥ यस्तु द्वादशवर्षाणि वेदब्रह्मचर्यं कृत्वा अधीतविद्यः स्नाति स वि
द्याव्रतस्नातकः ॥ ननु विद्यां तु गुरुसमर्थनमन्यस्नानमिति ॥ अतः कथं
व्रतस्नातकस्य संभवः ॥ उच्यते ॥ विद्यां तु इतिमविद्यापरिसमाप्तौ स्नानं
चोद्यते ॥ किं तर्हि विद्यायां अंतेन स्नातको मध्यमुत्तरज्यांतमारण्यकमधी
त्य स्नायात् ॥ रहस्यं चारण्यकं प्रधान्येन स्नाननिमित्तं चोद्यते ॥ वेदमधीत्य
स्नातको भवतीत्यादि ॥ शौनकः ॥ कालं च ब्रह्मचर्यस्य शिष्यायोपदिशेदथ
ति ॥ ततः स्विष्टकृदादि होमशेषं समाप्य ॥ भिक्षां याचेत ॥ अप्रत्याख्यायम
नप्रत्याख्यायिनीं चाग्रे भिक्षेत ॥ तत्र भवत् सर्वा पित्रादि प्रत्यावादिष्टो विधिः ॥
कर्तव्यः ॥ अत एव देवलः ॥ भवतीति पदं चोक्त्वा भिक्षां देहि इति याचयेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुग्म० याचयित्वा तेनो भिक्षां गुरवे समर्पयेदिति ॥ ३ ॥ स्नानकः ॥ भिक्षेत पात्रहस्तः श्रद्दी०
प्रत्याख्याप्याप्य तद्दंतिकं ॥ ३ ॥ अग्रे भिक्षेत जननीमप्रत्याख्यायिनीं च य ॥ १ ॥ श्वासि
१४७ तर मन्येपि ये चास्य बांधवास्तेताः ॥ ३ ॥ अमेधाजननाद्रक्षेत्तमापनयनान्
तं ॥ तत्रैव सायं प्रातश्च समिधं जुहुयादसावित्रि ॥ ३ ॥ सुपनयनं ॥ अथास्त
मिति ब्रह्मौदनं ॥ सायं संध्यामग्निकार्यं च कृत्वा आचार्यो ब्रह्मचारिणं दक्षि
णत उपवेश्य तिथ्यादि संकीर्त्य अस्य ब्रह्मचारिणो ब्रह्मणः ब्रह्मणः प्रीत्यानि
र्विघ्नेन वेदसमाप्त्यर्थं एतदधिकारप्राप्त्यर्थं चरुश्रपणांतेन तदनुज्ञया स्वाधि
कारप्राप्त्यर्थं च ब्रह्मौदनं करिष्ये ॥ तत्रान्वाधानमाघारांतमुक्त्वा तत्र प्रधानदेव
ताः ॥ सदसस्पतिं सावित्रीमृषीन् ॥ चरुद्रव्येण ॥ स्विष्टकृतमित्यादि पूर्णपा १४७
त्रनिधानांतं कृत्वा निर्वापक्षाणेन तूष्णीं स्तः ॥ विप्राणां भोजनवालु याचित
निर्वाप्य प्रोक्ष्य तत्रैव पाकयज्ञविधानेन श्रपयेत् ॥ अथ विज्ञापयष्टिष्यः ॥

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतो ब्रह्मौदनश्चरुरिति ॥ श्रृतं पाके ॥ ततोन्वारब्धे ब्रह्मचारिणि गुरुस्त्वा
ज्यसंस्कारादाघाघारांतं कृत्वा प्रधानहोमं कुर्यात् ॥ नात्र विभागविधिरित्यु
क्रमनुक्रमणिकायां प्रागेव त्वाविभ्यो द्वितीयमित्यस्मिन्सूत्रे त्वाचित्रीग्रहणं
उत्तरार्थं ॥ अतऊर्ध्वमपि महानाम्न्यादिव्रतेषु यदयुक्तं तेन तेन द्वितीयं जुहो
ती ॥ एतदुक्तं भवति ॥ महानाम्न्यादिश्रुपणं तेषु अनुप्रवचनीयहोमः कार्यः ॥
तत्र त्वाचित्रीस्थाने महानाम्नीभ्यः स्वाहेति ॥ उपनिषद्भ्यः स्वाहेत्याहुतित्रयं
द्वितीयं जुहोति ॥ उन्यत्समानं ॥ द्वितीयग्रहणं महानाम्न्यादिनामधेयेन
होमार्थं सौविष्टकृतं चतुर्थस्मिन्निति सूत्रे चतुर्थमेव स्विष्टकृतं षष्ठानेना
ज्यभागाभ्यवत् ॥ ततो वदानधर्मेण अवदायहविः शुचिः ॥ सदसस्पति
मिति काण्वा मेधातिथिः सदसस्पतिर्गायत्री ॥ प्रधानमाज्यहोमेपि ॥ त
त्सवितुरित्यस्य गाथिनो विश्वामित्रः सविता गायत्री ॥ चरुहोमोत्कृषिभ्यः
स्वाहेति स्विष्टकृदादि समाप्य ब्राह्मणान् भोजयित्वा वेदसमाप्तिं वाचयेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म० अथब्रह्मचारी अक्षारलवणाक्षी ब्रह्मचारी अधःशायी त्रिरात्रं संवत्सरं भट्टी०
वा स्यात् ॥ तिलितिलमुद्गाद्दिश्रितपक्वस्य गोधूमकोद्रवाः ॥ चणकं देवधान्यं च
१४८ एष क्षारगणः स्मृताः ॥ अथ कारिका ॥ यदा द्वादशरात्रं स्याद्वृतं मद्वमथा
पि वा ॥ तदा तद्दिनं एवास्यान्मेधाजननस्तके काले स्मिन्नह विब्रह्मौदनं चरश्र
पणाख्यकं ॥ यघनध्यायस्तके चेत् ॥ गर्जितादिषु अन्युद्धा भवेत्तदा द्विवे
वचरश्रपणं कार्यं ॥ अन्यथोपनयनं चरश्रपणयोर्मध्ये अघुनध्यायो
भवेत्तदा पुनर्मौञ्जीबंधनं कार्यं ॥ तस्मात्तद्दिने कायार्ससांद्विवैव ब्रह्मौ
दनं चरश्रपणं कार्यं ॥ तस्मिन्निर्विघ्ने नपके सतिजातेप्यनध्यो यब्रह्मौद
नेशायनं संध्यामुपास्यैव कार्यं ॥ तथा च स्मृतिः ॥ ब्रह्मौदनं पचेदग्निः पक्व
न्नं नदुष्यति ॥ होमे तु नध्याये दोषो नास्ति ॥ संग्रहे ॥ न संध्यागर्जितेकाले १४८
नदष्यसातस्तके ॥ ब्रह्मौदनं पचेदग्नौ पक्वं चेन्न निवर्तते ॥ इति ब्रह्मौदनं ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथव्रतांते मेधाजननं कार्यं ॥ तत्प्रकारः ॥ अनिंदितस्यां दिश्येकमूलं पाला
शं कुशस्तंबं वा पलाशोपचार इति ॥ अथ निंदितायां दिशि ॥ कारिका ॥ आ
ग्नेयी दक्षिणा प्रत्यग्दक्षिणा निंदिता दिश इति ॥ तत्र यदि निंदितायां अनिंदि
तायां दिशि छिन्नं पलाशं गच्छेत् ॥ पलाशं गच्छेत् ॥ पलाशोपचार इति ॥ पु
नः पलाशग्रहणादिनैकमूलमपि ग्राह्यं ॥ तस्याभावे कुशस्तंबं वा ॥ आचा
र्यस्मृतिरूपेणाह ॥ कुर्याच्छ्रिमेखलां वेदीं सर्वतो द्वादशांगुलां ॥ सुचो यागुत्त
रोभागे तस्यां मेधां समर्चयेत् ॥ इष्टानि वेदयेदन्नं सकुमिश्रं सवायकं ॥ स
मोदकं निवेद्यान्नं पुनश्चाभ्यर्च्य पूर्ववत् ॥ प्रणम्येतस्यै मेधायै श्रद्धानीः स्वार
पेज्जलं ॥ उच्चारं स्कंधवामे त्रं जलं गस्यमद्दक्षिणा ॥ संश्राव्य तान् मस्कृ सत
था कुर्यात्पुनः पुनः ॥ एवं त्रिवारमावर्त्य दंडाजिनकमंडलून् ॥ वद्यानिक्षि
प्यतस्मात्ताचासरसीच विनिःक्षिपेत् ॥ मेखलां चोपवीतं च धृत्वान्यान्निविनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोधीतधारणाशक्तिसंपादनार्थं मेधाजननाख्यं कर्म करिष्ये ॥ तदर्थं पला
१४९ शपूजनं षोडशोपचारैः करिष्ये ॥ ततो नवतंतुभिः पलाशं सूत्रं वेष्टयित्वा
मेधाजननि त्वं पलाशायेति मंत्रेण षोडशोपचारैः तु कल्पयेत् ॥ आवाह
ना १ आसनं २ पाद्यं ३ मर्घ्यं ४ आचमनं ५ तथा स्नानं ६ माचमनं ७ वस्त्रं ८ मा
चमनं ९ मुपवीतकं १० गंधं १० पुष्पं ११ धूपं १२ दीपं १३ नैवेद्यं १४ आचमनं तां
बूलं १५ प्रदक्षिणा विसर्जनं ॥ १६ ततः प्रदक्षिणं त्रिः परिसिंचितं बहु ॥ स्म
श्रवः स्रश्रवो ३ इति मंत्रमाचार्यो वाचयेत् ॥ ततः मेखलादीनि स्वस्वकान्यानि मं
त्रेण धारयेत् ॥ मेखलामजिनं दंडं वस्त्रं यज्ञोपवीतकं ॥ पालाशं सु निधा १४९
त्वाज्यं नवं मन्यं च धारयेत् ॥ प्रयोग पारिजातके ॥ वासु रतीन स्वगुरवे मेधा
जननि कर्मणि ॥ दद्यात्तावत्स भस्य वकौपीनं नव वर्तते ॥ तत्ता विप्रा मेधाम

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वमिति सर्वं जपेयुः ॥ ब्राह्मणेभ्यो हिरण्यं दत्वा नमस्कुर्यात् ॥ इति मेधाजन
नं ॥ अथ पुनरुपनयनं ॥ कारिका ॥ वेदांतरमधीयंते ऋग्वेदं येत्वधीयत ॥
उपनीतिर्विधिस्तेषामलंकरणवर्जिता ॥ ब्रह्मचारीव्रतलोपे च पुनरुपनीतिः ॥
शालातपः ॥ लशुनं गृंजनं जग्ध्वा पलांडुं च तथा शुनां ॥ उष्ट्रमानुषकुंभाश्वरा
सभीरां च भोजनात् ॥ उपानयं पुनः कार्यं तप्तकृच्छ्रं चरन्मुहुः ॥ अन्येषु शास्त्रो
क्तरोल्कं ॥ निमित्तेषु चेच्छातव्या ॥ तत्र विशेषः ॥ नैमित्तिकमनध्यायं कृच्छ्रं च त्र
पट्दिनं ॥ रमेखलाबंधनप्रायश्चित्तार्थं मुनयो विदुः ॥ सप्तमी माघमासस्य
तृतीया याक्षया तथा ॥ युगमन्वादयश्चान्या व्रतबंधे पुनः शुभाः ॥ तत्र वप
नं कृत्वा कृतं ॥ मेधाजननं च अनुप्रवचनीहोमश्चा सावित्र्याश्छाने ततस्त वि
लुर्दणी महे ॥ इति पुनरुपनयनं ॥ अथ ब्रह्मचारीधर्मा ॥ काश्मरोर वेत्स्यादि
र्वीन्कमेव ॥ स्कांदे ॥ एलेयरोरवं चास्तन्कमाचैत च द्विजन्मनां ॥ मौंजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ०म० त्रिवृत्तमाश्रलक्ष्णा ... मेखला ॥ मुञ्जा ॥ ...
ग्रंथिनैकेन संयुक्ता त्रिभिः पंचभिरेव च ॥ पालाशो वाथ बल्वकं वा दंडाय ज्ञि
१५० यवृक्षजाः ॥ केशान्तो ब्राह्मणस्य गांतप्रमाणश्च क्रमाद्द्विजोः ॥ उरोमूर्द्धिना
ललाटं च वा सिकाप्रयमाणतः ॥ ब्रह्मक्षत्रियविशां दंडस्त्वगाघानाग्नि
दूषितः ॥ व्यासः ॥ शिरोललाटनासाग्रप्रमाणं वर्तनाक्रमात् ॥ याज्ञिक
स्येतु वृक्षस्य दंडानाहेलिधर्मतः ॥ इति दंडलक्षणं ॥ जीर्णकमंडलुं दंडमु
पवीताजिनेऽपि ॥ अप्सुनानि चिनिक्षिप्य गृह्णीयान्यं च मंत्रतः ॥ धार्यमल
क्ष्णं सदा धार्यं कौपीनं कटिसूत्रकं ॥ कौपीनमहलां यत्र बलं त्रनिर्मुक्तवा १५०
ससः ॥ स्वयंभुवा हलं धार्यं दंडं वा वस्त्रपार्श्वयुक् ॥ अथ संध्यानिर्णयः ॥
लत्रोपस्तंबः ॥ उपनायेन्हि सायंस्यात्संध्यायाः समुपक्रमः ॥ आचारह्लम
यज्ञं तु मध्यान्हे तु परेहनि ॥ प्रजापतिः ॥ प्रातर्दद्यात्तु गायत्रीं गुरोश्चैवानु राम

गास्तं ॥ संध्यात्रयं तु कर्तव्यं सायमादि यथाक्रममिति ॥ अत एव कारि
कायां ॥ अहःशेषं नतु श्लिष्टं सायंसंध्यामुपास्य चेति ॥ शौनकोपि ॥ लब्ध
विज्ञाप्य गुरवे तत्सार्धं तं निधाय च ॥ तत्सन्निधाय च च पल्लश्लिष्टदारदेवस्तस्
यान्तु ॥ सायं संध्याविधिं कृत्वा अथोपनयनानलेति ॥ अत्रि ॥ संध्यात्रयं न
कर्तव्यं यावन्नैवोपनायनं ॥ उपानयदिनारभ्य सायंप्रातश्च कालयोः ॥ मध्या
न्हे च कर्तव्यं यावत्प्राणविमोचनं ॥ पुनः शौनकः ॥ अग्निश्चेत्यनुवाकेन सायं
काले त्वपः पिबेत्तु ॥ सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः ॥ आपः पुनं
त्विसेतेन मध्यान्हे तु जलं पिबेदिति ॥ व्याघ्रः ॥ किं च सर्वस्मस्य सायासीनो
जपेन्नरः ॥ सायंप्रातश्च मध्यान्हे सावित्रीजाप्यवाग्गतः ॥ सायंप्रसङ्मुख
श्चैवतिष्ठेत्प्रातश्च प्राङ्मुखः ॥ सायंप्रातश्चरप रच्छाय जातवेदसमुद्दिश्य च ॥
अन्यत्र ॥ भोजनात्प्रागेव मध्यान्हसंध्यायाः कर्तव्यताश्रयते ॥ भोजनादु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम० पयुक्तमुपनयनस्य ।। चमहत्वाद् ।। नग अत्र च भोगण ।। भुक्तभुजीत ऊनमस्तमात भट्टा०
मध्यान्हसंध्याविधानं स्मृतिकारादिभिर्भोजनात्प्रागेवोक्तं तस्मादुपनय
१५१ नादिने मध्यान्हसंध्योपासनं नेति गम्यते अतः कारणात् उपनयनदिने
मध्यान्हसंध्या न कर्तव्येति प्रीयतां ।। तथा च स्मृति ।। स्वगृह्योक्तेन मंत्रेण चरुत्वा
त्वा संध्यां विधाय च भ्वेलकृष्णरक्षेम स्वदयादीक्षपर्ययदिति ।। मद्देशज्ञाजिनो प
वीताद्याश्चैव भैक्ष्यं यथोदितं ।। गुरवे ।। पावयेद्याचितं चान्नं त्रिधा तत्रैकं
भागं ।। अग्नोर्ध्यान्हतिभिस्त्वाप्य भागमेकं गुरोरपि ।। एकं भुंजीत मत्तु
मान्स्वाध्यायं च ततः पठेदिति ।। अस्यार्थस्तारे ।। नित्यं स्वाध्यायाग्निकार्ये ।।
ब्रह्मयज्ञं तर्पणानि कुर्यात् ।। कारिकायां तु पाकर गुपर्यन्तं तावित्याब्रह्म १५१
यज्ञकर्मेति ।। पुनरस्यार्थस्तारे ।। अनिंद्येषु विप्रगृहेषु भैक्ष्यं चरेत् ।। गुरवेन्न
भोजनविधिना भुंजीत ।। गुरुशुश्रूषणं वेदसाधनार्थं कुर्यात् ।। व्रतसं राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मप्राशुक्तं ॥ ललस्त्रीमधुमांसोच्छिष्टंशुक्तस्त्रीप्राणिहिंसनं ॥ भास्करालोक
नाश्लीलपरिवादादिवर्जयेत् ॥ मधुक्षौद्रं ॥ उच्छिष्टमगुरोर्भोज्यं ॥ शुक्तं
निष्ठुरवाक्यं ॥ अश्लीलमसभ्यभाषणं ॥ आदियहाणाद्धारिणी ॥ यज्ञो
पवीतमजिनं मौञ्जीदंडं च धारयेत् ॥ नष्टभ्रष्टे नवं मंत्रेणाधृत्वा पूर्वं जले क्षि
पेत् ॥ सर्वत्र व्रतान्ते यज्ञोपवीतानि दत्वा पूर्णित्यजेत् ॥ चरुस्त्राणो नियमः ॥
इति ब्रह्मचारी धर्माः ॥ अथ देवव्रतं ॥ उदगयने शुक्लपक्षे पुण्याह आचार्यः ॥
परीदं दामीत्यं नमुपनयचत्वार्यामरवल्गादीनि नवानि गृहीत्वांजलिनोदकं गृ
हीत्वाग्निमभिमुखं व्रतानामपिंजपन् ॥ त्वं व्रतानां व्रतपतिरसि व्रतं च
रिष्यामितच्छकेयं तेनाध्येयं तेनेनराध्यासं ॥ ततः स्विष्टकृदादिसमापय
न् ॥ यथाकालमुपाकृत्य वेदमधीत्य व्रतान्ते अनुप्रवचनीयं ॥ पूर्ववत्कुर्यात् ॥ ४
अन्यत्रगारवायों ॥ इति दर्पणे लोके वदव्रतं ॥ अथ महानाम्नीव्रतं ॥ अस्यव्र
तस्यायं विशेषः ॥ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म॰ ह्मचारिणः समस्तपापक्षयद्वारा परमेश्वरप्रीत्यर्थं महानाम्नीव्रतं करि अ॰ ही॰
ष्ये इत्याघारांतमुक्त्वाग्निपवमानं ३ प्राजापत्यं ४ पूर्णे संवत्सरेऽस्मिन्हो
१५२ मे चाघारांतमुक्त्वा अग्निं १ संराधनीं २ अग्निं ३ अस्त्रयत्तां ४ अनुमतीं ५
प्रदातारं ६ अग्निं ७ वायुं ८ सूर्यं ९ एतास्त्तान्नद्रव्येण स्विष्टकृन्नमित्यादि ए
वं महाव्रतमुपनिषद्व्रतं च ॥ गोदाने चोक्तान्येव ॥ उपनयनवद्दास्यंतंके
त्वा मेखलादि दत्वा स्विष्टकृदादि समापयेत् ॥ कारिका ॥ नवां मौंजीं नवं द
ंडं दत्वा स्विष्टकृत्साधयेत् ॥ संवत्सरे चरेदेवं पूर्णाब्दं तु नारायण इति वर्षे पूर्णे
केमाठहीः ॥ निष्कम्यदेवनघाटोविविक्ते देशामेत्यापल्लेपारि पूर्णपात्रनि १५२
धानांतं कृत्वा होमायस्वंस्त्वभाजे नायत्ने तु ह्मोनिरूप्य तिलान्नक्षिप्य पचे
त् ॥ अथाचार्यव्रतलोपप्रायश्चित्तं ॥ बहुव्रतलोपे तु व्रतमावर्तयेत् ॥ आपदि
नावर्तयेत् ॥ तथा च कारिका ॥ बहवो व्रतलोपाश्चेत्पुनरावर्तयेद्व्रतमिति ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाज्याधिश्रपणाद्याघारांतं कृत्वाग्नावग्निरित्यादिमंत्रैरवदानधर्मेण
चतुर्गृहीतं जुहुयात् ॥ ते च मंत्राः ॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अ
धिराज एषः ॥ तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मा
अस्माकं ॥ मोमुहद्भागधेयं स्वाहा ॥ १ ॥ यातिरश्चीं निपद्यते हं विधरणी इ
ति ॥ तां त्वा घृतस्य धारया यजे संराधनीमहं स्वाहा ॥ २ ॥ यस्मै त्वं काम
कामाय वयं सम्राड्यजामहे तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब
स्वाहा ॥ ३ ॥ अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिंदन् ॥ अ
यं शत्रूंजयतु जर्हृषाणो यं वाजं जयतु वाजसातौ स्वाहा ॥ ४ ॥ अस्र यं व्ये
चानुमत्यै च स्वाहा ॥ ५ ॥ प्रदोषे स्वाहा ॥ ६ ॥ ॐ भूः स्वाहा ७ ॐ भुवः ८
ॐ स्वः स्वाहा ९ नात्र समस्तव्याहृत्या होमः ॥ व्याहृतिभिश्च पृथग्घुत्वे
ति सूत्रे पृथग्ग्रहणात् ॥ एतैर्मंत्रैः कृसरं हुत्वा स्विष्टकृन्महारोषं बर्हि
व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृद्म [illegible]
कारिकाच ॥ ततः परमिति ॥ भुक्तवंतमाचांतंजलपूर्णांजलितंव्रतानि ॥
१५३ मित्यादिभुक्तवंतंवटुं आदित्यमुपस्थाप्यार्घ्यंदत्वाचक्षुःश्रीरन्मीलनंदत्वा
मौनंकुर्यात् ॥ तंव्रतानांव्रतपतिः ॥ अथहोमः ॥ अग्नावग्निचरंतीसा
धेमंत्रैः षडाहुतीः ॥ ततोव्याहृतिभिर्व्यस्तसमस्ताभिस्तिस्रआहुतीः
हुत्वा ॥ ततोवटानंकिंचित्स्विष्टकृतेस्रुवसंनिधायतिलान्यस्यस्तसमारती
र्णेतुबर्हिषि ॥ ततः शिष्यंगुरुर्ब्रूयात् हुताशिष्टमिमंचरुस्त्वंभुंक्ष्वतु
भ्यांजातेहोमशेषंचरुहोते ॥ उत्थायतमपांशर्णमंजलिंदधतंस्थितं ॥ त
मुपस्थापयेच्छिष्यंत्वव्रतानांव्रतादिनामंत्रेणानेनराध्यासमित्यनेन १५३
दिशाभूत्करः ॥ ब्रूयात्त्वपचेतन्मेगुरुः शिष्यंचवाचयेत् ॥ अथप्रमेचा
रिणाहत्तनवाससाग्निः प्रदक्षिणेशिरः संमुखंचेष्टयेत् ॥ अथकराव राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतं एतं कालं एवंभूतं भूतन्नेस्वपल्लवे साचार्यः प्रेषयात् ॥ ब्रह्मचारि
णात्वयानितव्यं ॥ ततः स्विष्टकृतादि कारिका च ॥ ३ ॥ एकरात्रमित्यादि त्रि
षु स्विष्टकृता पृथा ॥ अवृत्यकेभ्यः इच्छया नो ॥ सनभोजनं ॥ अकुर्वन्नेकरात्रं च ब्र
ह्मचारीनयेदयथेति ॥ शौनकः ॥ एकरात्रं यातमेवंभूतचेष्टः ॥ आसीनः
स्वापहीनस्य ऐश्वसमभ्यासे वसेरिति ॥ अपरपक्षमंत्रस्नानसंध्यावंदनादि
कृत्वा इत्यादि स्त्र्यग्निं प्रतिष्ठाप्यालंकृत्यादकमंजलं तरतोग्नेः कृत्वाय
स्तरीवायव्यां दिशि वध्याग्नेः पश्चादाचार्यः प्रागग्रेषु दर्भेषु पवइस्थानी दि
शं वध्याग्नेः पश्चादासमिक्षमाणा ब्रह्मचारी मुख्य प्रक्षाल्याग्न्याचार्यं प्र
दक्षिणीकृत्याभिमुखपश्चात्तेषु नैर्ऋतिदिशामीक्षमाण उपविशे[illegible]त् ॥ स्वन
दृष्टेनाचार्यं दृष्टं संध्याय मन्त्रसामहीनोऽस्ति भोऽनुज्ञा ॥ हीति तेगु[illegible]दी
रयेत् ॥ अथ शौनकः ॥ अथ परपक्षश्चतुर्थ्यादिवासरे प्रयत्नो गुरुः ॥ वक्ष्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्य० न्नमहानाम्नीस्वागारापेक्ष्यादिशं ॥ पूर्वोत्तरामनुप्राप्ते शेग्रामाद्बहिर्भवेत्॥ भद्दी०
शुद्धिदेवालयेतत्र कृत्वास्थंडिलमादितः ---- सुपूर्णे सलिलं चक्रे मंडलं तु॥
१५४ यस्य वत्सलं रीत्याच्चात्तस्याग्नेः प्रस्य गुत्तरे ॥ तलोग्नेः प्रत्यगास्तीर्य दर्भाः प्रा
गुत्तराग्रान्॥ तेष्वासीनगुरुः प्रदृश्य प्रागुदीचीदिशां ततः शिष्यापि मुखलेपा
दीन्भुंज्याचम्य योदि कृत्वा गुरोश्च वन्हेः श्च प्रदक्षिणमथो गुरु ॥ अभिवा
द्य गुरोः॥ प्रसव्य दक्षिणे तस्य पृष्ठतः ॥ तस्यैवासनदर्भाणां मूलदेशे वचेत्ततः
ती ॥ विज्ञोक्यादिसमासितास्ततः पृष्ठेन चासनं ॥ आचार्यस्य च संयोज्य
वचनं मलिनसातेतः ॥ उदीरये न्महानाम्नी भाजन्वित्य चमादिकं ॥ ब्रूहि
त्वं तमथाचार्यो ज्ञात्वा कालप्रमाणतः॥ अथ गुरुः शिष्यं तद्दहरसंन्नान्त्र १५४
तल्लोपान् पृष्ठे भवेत्तः॥ समीलं कुर्वन् ॥ त्रिपुरषुपदे स्तह महानाम्नीनां
ऋचः ॥ शिष्यप्रस्फल्काशिरोवेष्टनं यावपेत् ॥ शेषं न कोऽपि ॥ विद्यामघवन्वि पुरी
दा गातु मिस्कृपत्रम्यसंस्कृता ॥ तां महानाम्न्यरस्य [illegible] यसंहिते ॥ एवा राम

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेषामादिभिः सार्द्धं संमिलित्वा विचरन्त्विति ॥ ततो मित्रस्येति मंत्रहृदयेनाचा
र्यस्तं शिष्यं स्थिरचक्षुमीक्षयेत् ॥ मित्रस्य त्वा चक्षुषा प्रतिपश्यामि ॥ यो अस्मा
न्द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषाहं तु ऋचं हन्तु ॥ मित्रस्य नयनेति मंत्रेण संभा
रादिरवेक्ष्य तृतीयेन पुनरादित्यमीक्षयेत् ॥ मित्रस्य त्वा चक्षुषा वीक्षु
मित्रस्य त्वा चक्षुषा समीक्षे ॥ शौनकः ॥ अथा[illegible]स्य प्रभृतिभिः ॥ संभारैः
सहिताग्निः ॥ दि मित्रस्य त्वा चक्षुषादि मंत्रतः सम्यगीक्षयेत् ॥ मित्र
स्य त्वादिकैर्मंत्रैर्भ छंति तेऽयं च मंत्रितं ॥ पाचयित्वा पुनश्चार्कमीक्षयेद
पतासुभोविति ॥ ईक्षणे कृत्वा दिशं मंत्रा ब्रह्मचारिण एव च ॥ अथ भूमि
स्पृष्ट्वा अग्निमीळे इत्यादि मंत्रं जपेत् ॥ एष जपपद्धयोध्येयः ॥ अथ २ च वदनं
प्रवचनीयहोमं कुर्यात् ॥ तत्र विशेषः ॥ सावित्र्याः स्थाने महानाम्नीभ्यः
स्वाहेति हुत्वा होमशेषं समापयेत् ॥ शौनकः ॥ इध्माधानादि शिष्येण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्र.दम०॥ दृष्टः कृत्वा पुनरस्तु ॥ तत्र शेषं यथान्यायमवदाय चरन्ततः चतस्राहुताः भ.द्वा.०
कुर्याद्यथा ब्रह्मोदने पुरा ॥ ब्रह्मोदनं वेदव्यापि होममात्रा स्यूरन्नु ॥ महा
नाम्नीभ्य इत्यपि वृद्धिर्तीयमंत्र इष्यते ॥ अथ महाव्रतं ॥ कारिका ॥ पूर्ववद्धुतना
१५५ दिष्टे संवत्सरान्मिदं चरेत् ॥ पूर्वसंवत्सरे दद्याद्विविक्ते च विरयचं ॥ आसुस्व
श्रावयेदनेन महाव्रतमातः परं ॥ अनुप्रवचनीयं कुर्यादुदके दक्षिणादिके ॥
महाव्रताय स्वाहेति सावित्र्यास्थाने विष्णुनीति ॥ एवं पूर्ववदुपनयनवद्धो
मं कृत्वा संवत्सरं व्रतं चरित्वा पूर्णे संवत्सरे विविक्ते देशे ॥ अनुप्रवचनीयं चरुं
श्रपयित्वा महाव्रतस्य पंचविंशतिसामिधेन्यः ॥ एषु पंथा एतत्कर्म इत्याचो
र्यं त्रिः श्रावयेत् ॥ अथाथर्वचक्षणान्तं कृत्वानुप्रवचनीयहोमं कुर्यात् ॥ सावित्र्या १५५
सावित्र्यास्थाने महाव्रताय स्वाहेति ॥ हुत्वा होमशेषं समापयेत् ॥ अथ उप
निषद्व्रतं ॥ कारिका ॥ पूर्ववद्धुतनादिष्टे चरेदब्दमिमं व्रतं ॥ श्रावयित्वा राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनिषद्ममादित्यावेक्षणादिकं ॥ अन्नोपनिषदे स्वाहा ॥ सावित्र्या रुद्धा इष्यु
ते इति ॥ शौनकोऽपि ॥ आचार्योऽथान इत्याग्नेयं तलीयारण्यकं श्रकांते ॥ अनिरनु स्यो
पनिषदं पूर्ववच्चार्कमाक्षेये दित्ति ॥ चरुश्रपणांतं कृत्वा अथानः संहितायाउ
पनिषत्ते ॥ इत्याचार्योऽस्त्रिः श्रावयेत् ॥ आदित्यावेक्षणादि भूमिस्पर्शनांतान्
त्वा अनुप्रवचनीयहोमं कुर्यात् ॥ तत्र सावित्र्या रुद्धानेऽपनिषदः स्वाहेति हुत्वा
होमशेषं समापयेत् ॥ इत्युपनिषद्व्रतं ॥ अथ गोदानं ॥ षोडशे वर्षे कार्यं ॥ तेन सं
वे चौलवत् ॥ तत्र प्रयोगः ॥ गृह्यमन्नं कृत्य पूर्वेद्युर्नांदीश्राद्धं परेद्युर्नित्य कर्मा
नंतरं अस्य ब्रह्मचारिणः वेदानां निज्ञायार्थं नित्य विधिरूपगोदानाख्यक
र्म करिष्ये ॥ इति संकल्प्य ॥ चौलवद्वह्निस्थापनादिभिः पूर्णपात्रा आज्यासादाघारांतं
कृत्वा चौलोक्तहोमं कुर्यात् ॥ पूर्ववच्छीतोष्णोदादि ॥ अत्र उदकं छेदनं च रमश्र
णां भवेत् ॥ मातुरंकोपवेशनं नास्ति ॥ विशेषं कथ्यते ॥ आदितिः श्मश्रूणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्म० वपत्वितित्रिवृद्दकेन ॥ अथ क्षुरमार्जने चिशपुः ॥ श्मश्रूणिच्छिंधिः ॥ शिरोमुखं भट्टी०
मामआयुः प्रमोषीरिति क्षुरधारां निमृज्येत् ॥ केशश्मश्रुलोमनखन्युदक्
१५६ संस्थानि अक्षुण्वन् ॥ कुशली कुर्वीतेनापितं तु शास्त्रे ॥ शौनकः ॥ तत्र के
शश्मश्रुलोमनखानि इञ्जिपृष्ठासरंउदक्संस्थानि कुशली कुर्वित्येवमुदीर
येत् ॥ ततः स्नातः स्नातस्समीपेस्थितस्मिन्स्विष्टकृतादिकं ॥ उपरिष्टात्तुतं
त्रमाचार्यः परिसमापयेत् ॥ शिष्यस्त्वाताललोपाचंनियम्यार्दिय संक्षयात् ॥
तिष्ठद्दत्तमितेरस्यै गुरोरतिकुमागतः ॥ वरंद्दासामीइत्युक्ताथ गोष्टथागु
रवेदितोत् ॥ उत्तरघुर्गुरस्तस्य वस्तरं ब्रतमादिशेत् ॥ तेषांसकृतंच यास्त
प्रसिद्धं केशधारणं मितिः ॥ शिरवां पूर्ववद्धारयेत् ॥ इति गोदानं ॥ अथ चु
वपनकालः ॥ वपनं प्रतिमासेषु कारयेद्ब्रह्मचारिणां ॥ मासद्वयं यतीनां १५६
च विधवाया द्वैमासिकं ॥ नित्यनैमित्तिकं कार्यं वपनं शुद्धिदं भवेत् ॥ काल

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

नासंवर्तं कुर्वीत प्राजापत्यं दिने दिने इति वपनकाण्डः ॥ अथ समावर्तनं ॥
स्कंदे ॥ विद्यांतेन गुरुः समर्थेनानुमंत्र्य च तेनानुज्ञातस्य यः स्नानमिति ॥ विद्या
परिसमाप्तौ गुरुमर्थेन संतोष्य कथं ॥ अहं तेन कमर्थं करवाणीति पृच्छेत् ॥
स यमर्थमाह तं कृत्वा स्नायात् ॥ स्नानं समावर्तनं ॥ अथ यानुज्ञातः स्नाया
त् ॥ त्रिविधं स्नानमुपनयनप्रकरणोक्तवारं दशरात्रमित्यत्रोक्तं ॥ उत्त
नक्षत्राण्युच्यंते ॥ नागीशादितिसौम्यपौष्णदिनकृद्विभित्रोत्तरारोहि
णीगोविदेषु राशयो भानुगुरुविशुक्लार्कयाराहिषु ॥ रिक्तां पर्वं तथाष्ट
मीप्रतिपदौ मेषं च कीटं हरिं ॥ हित्वा शुद्धियुते तथाह्नि विमले कुर्यात्स
मावर्तनं ॥ कर्मव्रतविसर्गाख्यं विज्ञेयं व्रतबंधवत् ॥ अन्यथा कर्मविस
र्गाख्यं विज्ञेयं व्रतबंधवत् ॥ अन्यथा कर्मश्रेन्नु ॥ उपनयनेऽकृतान् ॥
इदं कर्म स्वयमेव कुर्यात् ॥ अथ गोनकः ॥ विधायाभ्युदयश्राद्धं वृषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम· पेरेहनि ॥ अग्नौ नः समिधमाधाय कृतः स्वस्त्ययनो द्विजः ॥ अथ परस्ते ॥ म प्र०॥०
णिं कृत्वेत्याचार्यायोपकल्पयीत यथाप्रभयोर्निर्विदेनु ॥ नक्षत्रेण दा
१५८ आचार्याचोपकल्पयेनु ॥ विदुरूणा ॥ भद्रसस्य धातोऽचिरेते लिरूप ॥ प्रा
गुदीचीं दिशं गत्वा यज्ञियवृक्षस्य शाखां न्यामेच गता गारवाले स्याः समिध
मानीय भूमेरन्यत्र निदध्यान्नु ॥ आईउभयतो मद्दलिउं नाधुकाम आ
द्दीनाह ब्रह्मचर्यं सकामं त्वेदवा तो ॥ शुश्रूषामित्यर्थः ॥ उभयकामं उभयमा
हरेत्तु ॥ अर्द्धभुक्ष्वा शुश्रूषामित्यर्थः ॥ यज्ञियवृक्षाः रवाल्लीपाकेउक्ताः ॥ अथप्र
योगः ॥ तत्र देशेन कु ॥ दत्वान्नं च गां च प्रभ्यः ॥ कुर्मगोदानं कैचुरेनु ॥ ति
थ्यादि संकीर्त्य ब्रह्मचर्यव्रतसमाप्त्यर्थं गोदानं ब्राह्मणान्भोजयिष्ये १५८
इति संकल्प्य गां दत्वा ब्राह्मणान्भोजयित्वा कौतुकं संबंधं कृत्वा स्नमुहू
र्ते तिथ्यादि संकीर्त्य मम भार्यापरिग्रहार्थं समावर्तनाख्यं कर्म करिष्ये ॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिस्नानं कल्प्यं॥ उपलेपनाद्यग्निप्रतिष्ठांतं कृत्वा पुनर्देशकालौ संकीर्त्य॥
मया क्रियमाणे समवर्तनहोमेन्वाधानं देवतापरिग्रहार्थमित्याघाराघारां
तमुखान्त्रिवारमग्निं पवमानं प्रजापतिं चाज्येनाग्निं सूर्यं समिधा विश्वा
न्देवान्॥ समिद्द्रव्येण साघारांतं कृत्वा चोलवच्चनस्त्र ओप्याहुतीर्हुत्वा॥
शीतोष्णादिकं सर्वं चोलवत्॥ विशेषाभिरव्यंते॥ अदितिः श्मश्रूणि वप
त्विति त्रयस्त्वेमांमाहिंसीः॥ येवपत्तं मे यथा सतेन म आयुषे॥ वप्ता च पसि
श्मश्रूणि भुंधुशिरासुखं मामआयुः॥ अवपक्कुर्वाणः केशश्मश्रुलोमनखा
नि उदक् संस्थाप्य कृष्णवत्कुशालीकुर॥ स्नानं कल्प्यं॥ कुंतकमेति॥ उन्मर्दनं
कुर्वीतेति विशेषः॥ करंजकल्कस्य पत्रैः बीजैर्नद कुष्ठकेलसेवयित्वा नेनो
मर्दनं कारयेत्॥ शीतोष्णैरुदकैः स्नात्वाचम्य॥ उदुत्तममित्यस्य शुनःशे
पो मित्रावरुणौ त्रिष्टुप्॥ मेखलाविसर्जने मनेक क्रायामिति केचित्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्ण० युग्मं वस्त्राणीत्यनेनाहते वाससी अखापुरूष्यादि पूर्वमेवोक्तं मंत्रावृत्तिः भट्टी०
स्यात् ॥ ग्रंथेन कृ ॥ स्नात्वा तीरे वाग्निपार्श्वस्थो युग्मं वस्त्राणि धारयेत् ॥ ३ ॥ स्ना
वस्त्र १५८ यंतेन स्नेहेदु चार्यंतेनो युग्मं नवं वसित्वोदकमाचम्य ॥ गृहीत्वा पाणिनो ज
मित्रि ॥ वस्त्रे धृत्वाचम्य ॥ यज्ञोपवीतं मिति यज्ञोपवीतं मित्रि यज्ञोपवीते
पुनर्यज्ञोपवीतं द्वितीयस्यार्थं ॥ आचम्यात्मनः इति मंत्रेण सव्यदक्षि
अंजनीत ॥ सव्यं मनुष्यांजने ॥ प्रथममित्रि शून ॥ ततो दक्षिणमं त्वा
वृत्तिस्यात् ॥ अन्तर्मनस्तेजो स्ति श्रोत्रं मरुद्भि कुंडले बध्नाति ॥ ओदो दक्षिण
कर्णे ततः सव्ये कुंकुमाद्यनुलिप्ताभ्यां मुखमनुलिप्य अंगानि चानुलिप्य
हस्तौ प्रक्षाल्य यत्नं ॥ कारिका ॥ अथानुलेपनालिप्य पाणिभ्यां प्रथमं मुखं ॥ १५८
अनुलिप्य तराण्यंगान्यनुलिंपेनुपश्चिमे ॥ ततो नानासी लिस्त्रजं सिर
सि बध्नाति ॥ मा नो न्यायं न्वर्जयेत् ॥ देवानां प्रतिष्टेरुद्रस्य पानहा वास्त्रो
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्तत्कन्मंत्राः॥ दिवः छ्रमासीत्ति छंदेगत्पहात्ति॥ वेणुरस्तीत्ति दंडंगत्पही
यात्॥ आयुष्यमित्तिसूक्तेन मणिं कंठे बध्नाति॥ आयुष्यमित्से कादशर्चं
स्यसूक्तस्य विहव्य ऋषिः॥ हिरण्यं देवता अनुष्टुप्छंदः॥ पंचम्यष्टमी नव
म्यास्त्रिष्टुभः सप्तम्यतिशक्वरी॥ अंत्या पंक्तिः मणिबंधने विः॥ अथाहते
वासस्सा अंगिरा वेष्ट्योड पानहं सजेत॥ कारिकाः॥ नवां वरेण्यसंवेष्ट अंगिरा
प्यापानाह्रो सजेत॥ ततः स्मृतं च मइति मंत्रेणोर्ध्वं समिधं तिष्ठन्नग्नावा
दध्यात्॥ स्मृतं च म इत्यस्य प्रजापतिरतिछंदः॥ समिद्धोमे विः॥ स्मृतं च
दा मे अस्मृतं च मे तन्मउभयत्रतं॥ एवमेव निन्नमइत्यादीन्येकादशवाक्या
निउक्त्वा॥ यदग्नेसेंद्रस्य सप्रजापतिकस्य सदेवस्य सदेवराजन्यस्य
सऋषिकस्य सऋषिराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनु
ष्यस्य समनुराजन्यस्य साकाशस्य सातिकाशस्य सानुकाशस्य सप्रती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेम॰ काशस्य सदेवस्य समनुष्यस्य सगंधर्वाप्सरस्कस्य सहारण्यैश्च पशुभि भट्टी॰
र्ग्राम्यैश्च यन्म आत्मन आत्मनि छिद्रं तन्म सर्वं छिद्रमिदमग्ने सर्वं भूताभ मह
१५१ यामि स्वाहा ॥ इदमग्नय इदं ॥ उपविश्य ॥ कारिका ॥ अंत्रोपचेरानंशाह
रुत्तिकारः सहनुकमिति ॥ परिषेचनपर्यंतं कुर्यात्स्विष्टकृदादिकं ॥ मे
माग्न इति दशर्ग्भिः प्रत्यृचं दशसमिधो जुहुयात् ॥ ममाग्ने इति प्रत्यृचं
समिधाभ्याधानं लिखितं ॥ प्रत्यृचग्रहणं कथं स्वाहाकारं प्रचनं जुहुया
दिसेच मर्थं ॥ अत्र प्रत्यृचग्रहणं नास्ति तत्र स्वाकारं पठित्वा पश्चाद्धोमः ॥
कारिकायां च ॥ ममाग्ने दशर्भिः कुर्वन् स्वाहाकारमृचं ततइति ॥ जुहुया
दिति शेषः ॥ गृह्ये चैशानी होमे च पठेत् नोम्याहतिर्हुत्वा स्वाहाकारमृगंत १५१
त इति ॥ कपोलाख्याने च ॥ पठन् स्वाहेति जुहुयात् ॥ प्रत्यृचैव चनेष्विहेति ॥
अत्र कुलो दशर्भिर्होमः ॥ तथैतस्येस्य त्रसमाम्नायस्य वितानविशेषणत्वात् ॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाम्नायस्यवितानेऽग्निकुलः एतत्सूत्रे निखिलानांपाठादिह च प्रति
कग्रहणाभेनतस्मादृग्भिर्होमिः ॥ अथ शौनकाः ॥ समाग्नेवर्चवियित्स्यायेन
वर्चमिह वेरित्यन्ते ॥ दशमी मन्त्रसर्वांच मिदमिसादिकांक्रमान् ॥ ॐ आ
यंप्रस्यचेति षिष्टन्नादध्यात्समिधादश ॥ अत्रप्रस्यचे ॥ मिस्यक्तेस्वाहाकारा
न्तकरेवतु ॥ ऋगंतरसमिधंक्षिप्त्वात्स्वा ॥ पाश्चास्वाहे स्कंदीर यन्तु ॥ चिरस
ध ॥ ॐ पचेद्य्यन्तलः कुर्यात्कर्म स्विष्टकृतादिकं ॥ ॐ परिष्टात्तेनं नूत्र ॥ पु
ण्याहं वाचयेन्तनऽग्नि ॥ समाग्नेऽस्यस्यरच्छ्रस्यचिह व्या विश्वेदेवा स्वि
ष्टपू ॥ अंसाजगती ॥ होमशेषं समाप्य पुण्याहं वाचयित्वानन्तरं स्नाया
दिसादिस्नातकव्रतं संकल्प्य पूर्ववत् समाचरेत् ॥ ततः पश्चात्सानं मधुपर्केण
पूजयिष्यन्ति तत्रैतारात्रिं वसेत् ॥ आचार्यः स्नातकं विधिना कालमास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ॰म॰ मासमपि द्विजः ॥ अनाश्रमी न तिष्ठेत कृच्छ्रः प्रसस्तमप्रयतात्मवानु ॥ स्मृ॰टी॰
स्मरत्येनरः ॥ स्नातः समुद्वहेत्कन्यां ॥ प्रव्रजेद्वा तदिच्छकः ॥ वानप्रस्थो भवेद्वा
१६० प्रः कृच्छ्रो विधिनाशुधिः ॥ अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ॥
आनाश्रमं विना तिष्ठन्प्रायश्चित्तीयते हि सः इति ॥ ॥ इति समावर्तनं ॥ ॥
अथ स्नातकधर्माः ॥ याज्ञवल्क्यः ॥ न संशयं प्रपद्येत नाकस्मादप्रियं व
देत् ॥ नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी ॥ वार्धुषी प्रतिनिषिद्धवृ
त्त्युपजीवी ॥ दाक्षायणी ब्रह्मसूत्री वेणुमान्सकमण्डलुः ॥ कुर्यात्प्रदक्षिणं देव
मृद्गोविप्रवनस्पतीन् ॥ दाक्षायणी कुण्डली सति यज्ञोपवीते पुनर्यज्ञोपवी १६०
तग्रहणं द्वितीयप्राप्त्यर्थं ॥ अथाह वसिष्ठः ॥ स्नातकानां द्वितीयं स्यादन्तर्वा
सस्तथोत्तरं ॥ यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः ॥ उपभोगादन्यत्र न
नग्नां स्त्रियमीक्षेत ॥ नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ॥ नोपरक्त

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न वारिस्थं न मध्यं न भस्मोगतं ॥ नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चा
श्नतीं ॥ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत् ॥ पादौ न ताप
येन्नाग्नौ न चैव मिनिलंघयेत् ॥ सर्वसुरीपुत्री पुत्रगिरिष्टं ॥ एवं तु ष्ठादीनि
च ॥ यथाह शंखः ॥ तुषकेशपुरीषभस्मास्थिलोमश्लेष्मनखांस्यप्केन
निक्षिपेत् ॥ न पादेन पाणिना वा जलमभिहन्यात् ॥ मनुः ॥ मुखेनोपधमे
न्नाग्निं नग्नां नेक्षेत च स्त्रियं ॥ नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥
अधस्तान्नोपदध्याच्च न चैनमभिलंघयेत् ॥ न चैनं पादतः कुर्यान्न प्र
माणबाधमाचरेत् ॥ जलं पिबेदञ्जलिमान शयानं प्रबोधयेत् ॥ नाक्षैः
क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् ॥ विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीत
रं ॥ केशभस्मतुषांगारकपालेषु च नास्थिते ॥ विरुद्धं जनपदं ग्रामं कुलो
चारविरुद्धं ॥ बाहुभ्यां नुत्तरणं विप्रा हि स्त्रियास्मनायावस्त्रे यो कदाचन ॥
आमसोः श्रियमाकांक्षेन्न कांचिन्मर्मणि स्पृशेत् ॥ स्त्रियान्न पत्नि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रस· दूरादुच्छिष्टं च विण्मूत्रपादाम्भांसि समुत्सृजेत् ॥ अभ्यर्ह्योऽज्ञो कश्चिद्दिष्टं धर्मम भट्टी०
प्याचरेन्न तु ॥ मातृपितृतिथिभ्रातृजामिसंबंधमातुलैः ॥ वृद्धबालातुराचा
१६१ र्यवैद्यसंश्रितबांधवैः ॥ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः ॥ विवा
दं वर्जयित्वा तु सर्वान्लोकान्जयेद्गृही ॥ बाल्यषोडशवर्षपर्यंता अनुरोगी ॥
आचार्यः उपनेता ॥ संश्रितः उपजीवी ॥ दासः कर्मकारः ॥ सनाभयः सहो
दराः ॥ पृथगुपादानमजामि भगिनी ॥ प्रास्यर्थं ॥ अविप्लुतब्रह्मचर्यो लक्ष
ण्यां स्त्रियमुद्वहेत् ॥ अविप्लुतमस्खलितं ॥ श्रुतिस्मृतिसदाचारः स्वस्य च
प्रियमात्मनः ॥ सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतं ॥ ॥ अथ स्त्रील
क्षणं ॥ जानुवर्णोरुशिरःप्रमाणं नाभावभ्यच्छ स्वस्तदर्शां विपुलं च गुह्यं ॥ श्रो १६१
णीललाटं पुरुकूर्मरूपं मन्नतं च गूढमणिश्च विपुलां श्रियमादधाति ॥
कनिष्ठिका मूलमुपागता या प्रदेशिनी मध्यमिकांतराले ॥ अच्छिन्नदी
र्घा सह दायुषस्तास्य चायुषं छिन्नलघुप्रमाणः ॥ उन्नताश्च रामाणि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिप्रं सा भक्षयेत्पतिं ॥ पिंगाक्षी च गंजरखर पुरस्वा रूक्षच्छर रक्षाग्रकेशी लं
बोष्ठी वक्रनासा प्रविरलदन्ता नाक्ष्मना त्वोष्ठजिह्वा ॥ संभुक्ष्मारसन्नतभ्रू
कुचे यूमलारक्तं दरेण ॥ धनरक्त नरहिता भर्तृना रोकरो ति ॥ रक्तादे ॥ चिधरा
विपुलेनास्याद्दीर्घगुष्टेन दुर्भगा ॥ मदवांगुल्लयोः रास्ता घनाचनाः समुन्न
ताः ॥ दीर्घांगुल्ली भिः कुल्लटा रूग्णाभिरल्पनिर्धना ॥ चिपिटाभिर्भवेद्दासी
चिरल्लाभिर्दरिद्रिणी ॥ परस्परं समारूढा पदांगुल्यो भवेद्यदा हत्वा बहून
पि पतीन्परप्रेष्या नदा भवेत्तु ॥ यस्या कनिष्ठिका भूमिं न गच्छेत्सा पतिं स्य
रात्तु ॥ प्रथमं निहंत्या द्वितीयाय पतिं च यं ॥ पैनिहिनतव कारण्या हि
नेत्ते हेतु मय दि ॥ प्रदेशनीभवेद्यस्या अंगुष्ठव्यतिरेकिणी ॥ कन्येव कुटा
चरस्याद्देषएव विनिश्चयः ॥ स्निग्धाः समुन्नतास्ताम्राश्वताः पादनखाः
शुभाः ॥ राज्ञीत्वरस्त्रकस्त्वीणां पादपृष्ठं समुन्नतं ॥ दरिद्रा मध्यनम्रेण
शिराले न सदाध्वगा ॥ रोमाढ्येन भवेद्दासी निर्मांसेन च दुर्भगा ॥ रूढेगु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्म॰ स्फोशुभायोत्काव ञ्शिराच्चोत्स्कृवर्त्तुलो॥रोमहीने सम स्निग्धे यज्जंघे च रू भद्री॰
वर्त्तुले॥ रत्नं पिवत्सं मग्नं जानुयुग्मं प्रशस्यते॥विशिरैः करभाकारैरुरुभि
१६२ र्मसृणैर्घनैः॥स्फुरैत्तैरोमरहितैर्भवेद्याभूपवल्लभा॥रत्वारामयुनानार्या
दुःखं वैधव्यमृत्स्च का॥नितंबबिंबेनोनारीणा उन्नतो मांसलः स्थाथुः॥महा
भोगाय संप्रोक्तारत्वदन्योशर्मणोयत्॥नाभिप्रशस्ता विपुला मद्धी स्नोक
समुन्नता॥गीनारादक्षिणावर्त्तनाभिः स्यात्सुखं संपदे॥स्तने स्तनान्व
न्नो पृथुकुक्षि सुखास्पदं॥क्षितीशं जनयत्सुत्रं मंडूकाभेन कुक्षिणा॥य
स्याद्दन्नयमि रपार्श्वेउन्नते रोमसंयुते॥निरपत्याच दुःशीला सा मवेद्दुः
खदोवधिः॥उदारूणाति लुछ्रत्नु चिरं संनमदुत्तया॥यो बिजवर्जितभोगा १६२
घानि समिष्टान्नसेविनी॥ मध्यक्षामा वरस्फ्भंगा स्याद् ाठ्यास वल्लिचयां॥
रूज्वी त्रि चीवरोमाल्ला य स्या सत्त्रार्मनर्मभूः॥निर्लोम हृदयं यस्याः समंनि
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नत्वं वर्जितं ॥ ऐश्वर्यं चापि वैधव्यं प्रियमाधाच सो ॥ चेन्नु ॥ विस्तीर्णहृद
या योषा पुंश्चली निर्दया तथा ॥ उन्निन्नरोमहृदया पतिं हन्ति चिन्निश्चितं ॥
घनोरन्तौ हृदयौ पीनौ समौ सस्तनौ पयोधरौ ॥ स्थूलाग्रौ विरलौ शस्तौ वामो
रूणानन्नामर्भणि ॥ स्थूलहस्तौ चुचुकपूग वाराखं तस्यामरूवर्तुलं ॥ अबंधा वनतौ
स्कंधा वद्धौ घीवचक्र शौभुभौ ॥ वक्ष्यू रूस रोम च तुंग ॥ स्निग्ध च मांस ॥ हस्त
इयं मृगाक्षी णा बहु भोगाय ज्ञायतां ॥ मृदुमध्योन्नतारक्तौ तलौ पाण्यो रवं
धकं ॥ प्रशस्तरेखा पाणि मल्परेखं च शुभाश्रयं ॥ विधवा बहुरेखेण दरिद्रि
णी ॥ रोमे चिह्न शिरोरस्तं पाणि पृष्ठं समं चतं ॥ वैधव्यं हेतुरामाठ्यं निर्मां
संख्यायुम् सृज नु ॥ मत्स्येन सुभगा नारी स्वस्तिकेन चक्रभ जा ॥ पद्मेन भूपतेः
पत्नी जनयेन् नृपतिं सुतं ॥ चक्रवर्तिनः स्त्रियः पाणौ नद्यावर्तः प्रदक्षिणः ॥ शं
खातपत्रकमठ्ठा देव मात्रत्वं सूचकः ॥ अंतर्निमग्न वंशास्थि पृष्ठिं न्स्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्त० न्मांसलाः शुभाः॥ पृष्ठेन वेधयुक्तश्च भग्नं च॥ भुग्नं नु चेत्तन नाग प्रशाद्वारणा मद्दा०
त्तिदुःखिता॥ मांसलो वर्तुलः कंठः प्रशस्तश्चतुरंगुलः॥ रेखाश्चत्रयो ग्रीवा चु
१६३ विधा चा चक्रग्रीवा च किंकरी॥ वंध्या हि चिपटग्रीवा न्हस्वग्रीवा च निस्वता॥
चुबुकं द्व्यंगुलं शस्तं वृत्तं पीनं स्त कोमलं॥ तनु स्थूल चिबुकं सलग्ना निर्लोमा स्त
पो घना शुभा॥ शस्तौ कपोलौ वामाक्ष्याः पीनौ वृत्तौ समुन्नतौ॥ समं समांसलं सु
स्निग्धं स्यामोद वर्तुलं मुखं॥ स्याच्च रेखा ओष्ठ राष्ट्रस्याद्दुधप्य कलहप्रदः॥
गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाः शुभाः॥ पीताः स्याव्रा श्यदशा
नाः स्थूला दीर्घा द्विपंक्तय॥ सकृष्णा कारकश्च विरलाः दुःखदा गोत्र्य कारणं॥
अधः स्तादधिकैर्दंतैर्मातरं भक्षयेत्स्फुटं॥ जिह्वेष्टमिष्टभोक्ता स्याच्छोण १६३
मृदुस्तथा सिता॥ विशाला ययारसना यामप्र द्वालिप्रमादभाक्॥ स्निग्धं
स्ते कोकनदाभा संप्रदा [illegible] ताल्व कोमलं॥ स्मितं प्रशस्तं स्फुरमस्रो रानिमी राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिलं लोचनं ॥ समवृत्तपुटा नासा लघुछिद्रा शुभावहा ॥ चञ्चलालोचने श
स्तेर कांते कल्मतीरके ॥ गोक्षीरवर्णविशदे रक्तस्निग्धे कृष्णपक्ष्मणी ॥ त्व
न्नताक्ष्याणुदीर्घायुः हंताक्षी कर्तृटी भवेत् ॥ भ्रुवौ रक्तवर्तुले तन्व्यौ स्निग्धे कृ
ष्णे असंहते ॥ प्रशस्ते मृदुरामाणां भ्रूचेत्कार्मुकाकृती ॥ लंबो कर्णौ शुभा
वर्तौ सुखदौ च शुभप्रदौ ॥ शंकुली रहितौ तानि धौ शिरालो कुटिलौ कृशौ ॥ ला
भः शिराविरहितो निर्मोई इंदुसन्निभः ॥ अनिम्नश्चिह्नगुल्लो नार्याः सौभा
ग्यरोग्यकारणं ॥ व्यक्तः स्वस्तिकर रवच्छलाटं राज्यसंपदासीमंतः सर
लः नारीणां मौलिः शस्तः समुन्नतः ॥ गजकुंभनिभो वृत्तः सौभाग्यैश्वर्यद
चकः ॥ स्थूलमूर्धा चुकृष्ण दीर्घशीर्षा च बंधकी ॥ विशाले नापि सर्वशा
भवेद्दौर्भाग्यभाजनं ॥ केशाआलिकुलच्छायाः सूक्ष्माः स्निग्धाः सुकोम
लाः ॥ किंचिदाकुंचिताग्राश्च कुटिलाश्चातिशोभनाः ॥ वामकपोलेम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊन्म॰ शाकः श्रोणे।मिष्टान्नदः श्रेयः॥तिलकं लांछनं वा।पद्महस्तौ सौभाग्यकार ॥दी॰
१६४ णं॥नासाग्रे मशकः शोणो माहिष्यदुःखजायते॥मशकस्तिलकं चिन्हं
गुल्फे दरिद्रता॥अस्येष माद्भिने क्तानि लक्षणान्युक्तानि तदन्यत्रे
ष्टव्यानि॥॥इति स्त्रीलक्षणं॥अथ प्रतिकूलविधिः॥वधूवरार्थे घटि
तेस्मिन्निश्चिते वरस्य गृहे व्यथ कन्यकायाः॥म्रियते कश्चिन्मनुजो यदि नारी
तदा न कुर्युः खलु मंडनं ते॥वाग्निश्चये यत्नेप्यवाप्तिसरौ निधनं गतो मि
तयोश्चेत्सप्रतिकूलं स्यान्नान्येषां तु कदाचन॥स्मृत्वसिष्ठः॥वरवध्वोः पि
तामाता पितृव्यश्च सहोदराः॥एतेषां प्रतिकूलं चेन्महाविघ्नप्रदं भवेत्॥
पिता पितामहश्चैव माता चैव पितामही॥पितृव्यस्त्री सुतो भ्राता भगि १६४
नी चाविवाहिता॥एभिरेव विपन्नैश्च प्रतिकूलं बुधैः स्मृतं॥अन्यैरपि वि
पन्नैरत्र केचिदूचुर्न तन्मतं वेत्तु॥मांडव्यः॥वाग्दानानंतरं माता पिता राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्याता विपर्यये ॥ विवाहो नैव कर्तव्यः स्ववंशहितमिच्छता ॥ अथ संकटा
दौ प्रशस्तिमाह ॥ मेधातिथिः ॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्म
तिः तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् ॥ स्मृतिरत्नावल्यां ॥ पितुर
ब्दमशौचं स्यात् तदर्धं मातुरेव च ॥ मासत्रयं तु भार्यायाः तदर्धं भ्रातृपुत्रयोः ॥
अन्येषां तु सपिंडानां माशौचमासस्रसंमितं ॥ तदंते शांतिकं कृत्वा ततो लग्नं
विधीयते ॥ ज्योतिर्निबंधकारा प्रतिकूलेपि कर्तव्यो विवाहो मासमूलतरा ॥ शां
तिं विधाय गां च दद्याद्वाग्दानादि चरेत्पुनः ॥ स्मृत्यंतरे ॥ प्रतिकूलेन कर्तव्यं
लग्नं यावद्वत्सरत्रयं ॥ प्रतिकूलेपि केप्याहुः कर्तव्यं बहुविघ्नवे ॥ प्रतिकूले
सपिंडस्य मासमेकं विवर्जयेत् ॥ विवाहे तु ततः पश्चात्तयोरवा ॥ अविधीय
ते ॥ ज्योतिःसारसागरे ॥ दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये ॥
प्रौढायामपि कन्यायां नानकूलं प्रतीक्ष्यते ॥ मेधातिथिनिबंधे ॥ पुरुषं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम त्रयपयनप्रातिकूलस्वग्रामेत्रणाः॥ प्रवेशाननिगमास्तु तथा मंडनमुंडनं भू ११०
प्रेतकर्माण्यनिर्दश्य चरेन्नाभ्युदयक्रियां॥ आचतुर्थेन तः पुंसि पंचमे
१६५ तु शुभं भवेत्॥ स्मृत्यंतरेपि॥ दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य
च॥ उदरस्य वर्त्तिनश्चैव प्रतिकूलेन विघ्नत॥ संकटे समनुप्राप्ते याज्ञवल्क्ये
न योगिना॥ शांतिकं रक्तगणेशस्य कृत्वा तां शुभमाचरेत्॥ अकृत्वा शां
तिकं यस्तु निषिद्धे सति कार्याधिकार दृष्ट्वा॥ स्वेहदृष्टिः॥ प्रतिकूले
तु संजाते विवाहं नैव कारयेत्॥ अंते शेषविनाशाय कुर्याच्छांतिमिमां
शुभां॥ श्रियेजातइतिश्रियं॥ इदं विष्णुरिति विष्णुं॥ गौरीर्मिमाय
इति गौरीं॥ त्र्यंबकं॥ परं मृत्यो इति यमं॥ स्नपयित्वा तिलाज्यं जुहुयाद १६५
ष्टोत्तरशतं॥ भूः स्वाहा मंत्रेण यत्नात्॥ स्फुरवायं स्फुरवं वर्द्धनां॥ ततो
होमशेषं समाप्याथ गोद्वयं दक्षिणां दद्यात्॥ इति प्रतिकूलशांतिः॥ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथविवाहादौसूतकनिर्णयः॥विवाहादिषुमांगल्येप्रतिष्ठायांमहोत्सवे॥
आसमाप्तेनगतस्येसूतकंमृतकेपिचेति॥इतिसूतकनिर्णयः॥व्रतयज्ञ
विवाहेषुश्राद्धेहोमेजपार्चने॥प्रारब्धेसूतकंनास्तिअनारब्धेतुसूतकं॥
सूतकंमिलितमृतस्यापूपलक्षणं॥प्रारंभादूर्ध्वमाशौचेविवाहःकार्यएव
तु॥प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः॥नांदीश्राद्धंविवाहादौश्राद्धेपा
कपरिक्रिया॥निमंत्रणंवाश्राद्धेप्रारंभस्यादितिस्मृतिः॥ब्रह्मपुराणे॥
विवाहयज्ञयोर्मध्येसूतकंस्यात्तदांतराशेषमन्नंपरैर्देयंयजमानैर्भोक्तुं
चनस्पृशेत्॥तथाच॥विवाहोत्सवयज्ञादौ॥आरब्धेसूतकेयदि॥सांगं
स्वकर्मकर्तव्यमन्नदानादिकंपरैरिति॥विवाहोत्सवयज्ञेषु त्वंतरामृतसूत
तके॥पूर्वसंकल्पितंद्रव्यंदीयमानंनदुष्यति॥संग्रहे॥सर्वत्राशौचेलवणं
मधुमांसेहुष्यमूल्वेषुशाककाष्ठतृणेषुभूपयोदधिघृतेषुतिलौषधाजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०म० नेषु च नास्त्युद्वेगो वेगे तस्याम्यनुज्ञयां स्वमग्रणीयात् ॥ ॥ इति विवाहस्तन भट्टी०
कनिर्णयः ॥ अथ वधूवरादीनां विवाहाद्यसंतौ मातरि रजस्वलायां निर्ण
१६६ यः ॥ प्रचेताः ॥ यस्य मांगलिके कार्ये तस्य माता रजस्वला ॥ गते दाने तदा न तत्प्रकु
र्तव्यमायुःक्षयकरं हि तत् ॥ अलाभे सुमुहूर्तस्य रजोदोषे उपस्थिते । श्रियं
संपूज्य कर्तव्यं पाणिग्रहणमंगलं ॥ हेमीं पद्मां माषमितां श्रीसूक्तविधि
नार्चयेत् ॥ प्रत्यृचं पायसं हुत्वा गां च दद्यात् पयस्विनीं ॥ चूडोपनयनोद्वाहप्र
तिष्ठादिकमाचरेत् ॥ ७ ॥ पर्वोत्सवे शुध्यंति नार्यः सद्यो रजस्वला ॥ ९ ॥ कात्यायनो
विवाहे पुंदेहांभंगेषु चाप्यदिः ॥ अथानेकमुंडननिर्णयः ॥ व्रतसमावर्तने
केसचौलं केशांतमेतानि वदंति संतः ॥ क्षौरपुरस्सरस्य भवंति यस्माच्च १६६
त्वारि तस्मादिह मुंडनानि ॥ मुंडनं चोपनायने मेखलाविमोक्षणे वदं
ति चौलकर्मयत्तदेव मुंडनं बुधः ॥ मुंडनापरिमुंडनं भवेदायुषद्रविणदं राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विकारकं ॥ नैव शोभनमस्तु त्रायादधो मंडपात्सरतरं हि मंडपं ॥ पुत्र्याः पुन
स्यवोनेव विवाहोद्दुपनायनं ॥ यदि कुर्यात्सा चिरेण महतीमापदं व्रजेत् ॥
संसरष्टा चालरश्वे कुगेहे स्यकत्र भोजिन ॥ सूतस्य च कस्य कोद्वाह स्तानाभ्ये
तरस्य तु ॥ मौंजीबंधं तथोद्वाहं पुण्या साभ्यंतरं पिवा ॥ पुत्र्योद्वाहेन कुर्वी
त विभक्तानां नु दोषदिति ॥ कृत्स्य पेनाल्कं ॥ विभक्तानामपि युगपद्वै कुर्वस्म
निशुभकरणे दोषः ॥ ठाणत्रः क्रियमाणानामेकस्यान्मातृपूजनं ॥ नारी
श्राद्धं भवेदेकं होममंत्रा पृथक्पृथक् ॥ न जातु मंगलं कुर्यादेकस्मिन्मंडपे
ह निभ्रात्युक्ष्य युग्मेन भ्रातृभ्य भकेन तथा ॥ पुत्रीपरि[illegible]याद्दूर्ध्वं मप्य
पगवद्दिन चतुष्टयं ॥ पुत्र्यं नरस्य चुवीत नोद्वाहा मि त्रिरस्य ॥ ए[illegible]चनद्व १२
यभिन्नमातृ विषयं ॥ फाल्गुने चैत्रमासे तु पुत्रो द्वाहो पनीयने ॥ भेदाद्व
स्यकुर्वीत न च तु त्रयलंघनं ॥ इसन न मंडपं नानिर्णयः ॥ अथ वेदीलक्षणं ॥ नो
रदः ॥ हस्तोच्छ्रितां चतुर्हस्ता चतुरस्रा समंततः ॥ स्तंभैश्चतुर्भिः सुश्लक्ष्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कन्या· वामभागेतुसंमतः॥ वाचनंगणाकृतेः कुमार्यागृह्यतेस्त्रियाः॥ मं महा°
गारपुष्पनिकरैर्वर्णकैःसमलंकृतां॥ पक्षांतरे॥ कन्याहस्तेःसमभिःपं
१३८ चभिर्वाकार्यावेदिःकर्मदृष्टाच्छिता॥ रम्याहर्म्येनिर्गमाद्वामभागजा
यापस्याराग्नीषुरत्नंभयुक्ता॥ विवाहनक्षत्रशुभदिनेकार्यमंडपश्चतथैव
च॥ तत्रलग्नोसूर्येनुचन्द्रेषष्टदिनेषुवर्जयेत्॥ तथा च॥ नवत्रिंषष्टानवचा
रकः॥ शुभानवर्णकानेवविवाहमंडपवारके॥ अंकुरार्पणं॥ अथकन्या
विवाहकालः॥ अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी॥ दशवर्षाभवेत्कन्या
अतऊर्ध्वंरजस्वला॥ गौरीश्रेष्टाविवाहेतुमध्यमारोहिणीस्मृता॥ अध
माकन्यकायास्यादयोग्यापुष्पिणीस्मृता॥ कन्यायदिविवाहात्प्रागजस्ता १६०
चेत्सरिभूता॥ पादकृच्छ्रेणशुद्धिस्यात्पाणिग्रहणकर्मणि॥ पितृगेहेय
दाकन्यारजःपश्यत्यसंस्कृता॥ साकन्यावृषलीज्ञेयात्तस्त्पतिर्वृषलीपतिः॥
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञपार्श्वे ॥ विवाहे विलग्ने तंत्रे होमकालउपस्थिते ॥ कन्यामृतुमतीं दृष्ट्वा
कथं कुर्वंति याज्ञिकाः ॥ स्थापयित्वानुलां कन्यामर्चयित्वा यथाविधि ॥ युं
जानमाहुतिं दत्वा ततः कर्माणि याजयेत् ॥ युंजानमंत्रस्तैत्तिरीयश्रुतावा
याम्नातः ॥ स मंत्रः ॥ युंजानः प्रथमं मनस्तत्वाय सविता धिया ॥ अग्निर्ज्यो
तिर्निचाय्य पृथिव्या अध्याभरत् ॥ अथ विवाहः ॥ तत्र पूर्वेद्युर्नांदीश्राद्धं कु
र्यात् ॥ अथ प्रयोगः ॥ तिथ्यादि संकीर्त्य अस्य स्नातकस्य विवाहांगभूतं नां
दीश्राद्धं स्वस्तिवाचनं करिष्य इति संकल्प्य मातृपूर्वकं नांदीश्राद्धं कृत्वा ॥
परेद्युर्ब्राह्मणान्भोजयित्वा तैः कृतपुण्याहवाचनः ॥ यानं यथा ॥ हेमा
रथयानव्यं च वधूगृहं ॥ ब्रह्मपुराणे ॥ परेद्युः कृतस्नानालंकृतस्त्रेषरा
नरः ॥ भुक्त्वा निशांते पूर्वाह्णे उपडयतः सर्वदा द्विजः ॥ व्यासोपि ॥ भुक्त्वा
समुद्वहेत्कन्यां सावित्रीग्रहणं तथा ॥ उपोषितः सतां दद्याद्दर्चितापद्दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु.ध्म. जातं वै ॥ गांधर्वासुरयोरेवमुक्तैव परिणीयते ॥ ब्राह्म्यादिषु विवाहेषु भो भ.दी.
१६८ जनं नैव कुर्यात् ॥ विवाहेषु तु सर्वेषु शुल्के पत्नि यमो गिरः ॥ ॥ अथ क
न्यापितृभोजने ॥ कन्यादान ॥ निशीथे चेद्विवाभोजनमिष्यते ॥ पुनः स्त
त्याज्य पदं दीपितां कन्याप्रयच्छति ॥ त्रिधा हृत्वा यामिनीं तु द्वौ द्वौ भागौ पूर्व
वासरः ॥ उक्तं रात्रौ ॥ प्रभाते नरश्चौली पाककृतौ स्मृतः ॥ अथ रात्रौ दानाधि
कारः ॥ भारते ॥ रात्रौ दानं न शंसन्ति विना त्वभयदक्षिणाम् ॥ विद्यां कन्यां
द्विजश्रेष्ठ दीपमन्नं प्रतिश्रयं ॥ विष्णुधर्मोत्तरे ॥ भोजनं चातिथीनां च पा
थानां मतिभोजनं ॥ लग्न रात्रौ तथा देयं गवां युक्तं च भोजनं ॥ देवला[illegible] १६८
राहुदर्शन संक्रान्ति प्रतिष्ठा ऋतु कर्मसु ॥ तथोपरागपातादौ स्नानदाने
निशा शुभा ॥ वशिष्ठः ॥ अपेयं तु तदा तोयं रात्रौ मध्यमयामयोः ॥ नैमि
त्तिकं यदा कुर्यान्निसंतु मनागपि ॥ ग्रहणोद्वाहसंक्रान्ति यात्रादौ प्रसवेषु
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ दानं नैमित्तिकं ज्ञेयं रात्रावपि न दिष्यति॥ अज्ञा वृद्धा देनजाते ऽपि रेव
गृह्यते॥ पुनर्विवाहनिर्णयः॥ नारदः॥ वाचा दत्ता मनोदत्ता यफदकेन वा॥
दुष्टं सत्का गुणाढ्याय पुनर्देया तु न्यकौ॥ यमोऽपि॥ नोदिकेन न वाचापि
कन्यायाः पतिरुच्यते॥ पाणिग्रहणसंस्कारात्सलिलं तत्समे पदे॥ वरस
षान विज्ञापवाचा कन्यां प्रदीयते॥ तं चित्स्वन्यगुणाढ्याय दद्यादिसश्री
चीन्मनुः॥ व्यूढाः॥ याः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा॥ कलौ पंच न कु
र्वीत भ्रातृजायां कमंडलुं॥ अथ पर्यायविवाहास्ते संमताः सर्वकालिकाः॥
अथ कन्यावरणं॥ व्यासः॥ पंचांगशुद्धिदिवसे चंद्रताराबलान्विते॥ वि
वाहभे स्यादये वा कन्यावरणमाचरेत्॥ विवाहादिकमासेषु सर्वमंगल
माचरेत्॥ बहुपुत्राधवतीस्वधर्मनिरताः सती॥ गोत्रजा न्कुलशीलज्ञा
नृश्योन्नियानुस्कृहदोद्विजानं॥ प्रेरयेत्तु रुचिर्यग्मान्वरः शास्त्रविधान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्दुष्टान्यपि द्विजः ॥ अशुभानि तु संवीक्ष्य दिन चापि दिनत्रयं ॥ स्थित्वा
१६९ तत्रैव शुभे चैव पुनर्गच्छ सुराद्दरात् ॥ निमित्तान्यपि दृष्टानि देवात्कन्यानतो
गृहं ॥ असपिंडां द्विपितरां दृष्टं वृत्तिदोषवर्जितां ॥ गुणाढ्यां यत्नतो धीर्य
पित्रादीनपि वांधवान् ॥ ब्रूयुस्तमुकगोत्राय पौत्राया मुकशर्मणः ॥ भव
दीयां सुलक्षण्यां शीलाचारगुणान्वितां ॥ प्रजा संहस्य कर्मभ्यो रुणीम
हे नीचइति ॥ ततः कन्याप्रदातावश्र्यादास्यामि तोश्चइति ॥ ततः प्रसन्न
द्भावरायावदयुरिति हि ॥ भूषणैः फलतांबूलैर्गंधपुष्पाक्षतादिभिः ॥ शु
क्लांबरांगीन वोघैर्विप्राशीर्वचनैः सह ॥ गच्छेत्कन्यकागेहे वरः प्रणय १६९
पूर्वकं ॥ तदा कुर्यासितात्तस्याः प्रदानं प्रीतिपूर्वकं ॥ देवेंद्राणि नमस्तुभ्यं दे
वेंद्रप्रियभामिनि ॥ विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ॥ इति नार
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमत्ते॥ ॥अथ मधुपर्कः॥ संग्रहे॥ वरस्य याभवेच्छास्वातया कर्माग्निका
रयेत्॥ मधुपर्कं तथा कुर्याद्दन्यस्मार्त्वेपि दानरि॥ अलंकृतः स्नितः छत्री ःप
दानि ज्ञातिबांधवैः॥ स्त्रीवधूगृहं गत्वा मधुपर्केण पूजितः॥ अथ मधुप
र्कार्हाः॥ स्नातकायोपास्थिताय राज्ञाराचार्यश्वशुरपितृव्यमातुला
नां घेत्तिरत्नं॥ गोतमः॥ अर्घ्यमृद्धाग्निःस्नातकाय गृहमेधिने॥ क
न्यार्थिने विशेषेण राज्ञे चोपस्थिताय च॥ स्नातकायाल्विजे मित्र प्रिय
याश्वशुराय च॥ प्रतिसंवत्सरं कार्यमतिथिश्रोत्रियाय च॥ अर्घ्यं मधुप
र्कः॥ दानरत्वे॥ वैवास्य मत्विजं चैवश्रोत्रियं गृहमागतं॥ आर्हयेन्मधुप
र्केण स्नातकं प्रियमेव च॥ तत्र विष्टरलक्षणं॥ समचिरात्तिदर्भाणां वेण्य
ग्रग्रंथिभूषितो॥ विष्टरस्तस्य यज्ञेषु लक्षणं परिकीर्तितं॥ तत्र भृगुः॥ म
धुना सर्पिषा वापि सर्पृष्टं भवेद्दधि॥ मधुपर्क इति प्राज्ञैर्याज्ञियैः स्मृभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रम. धीयते ॥ आपस्तंबः ॥ मधुसंसृष्टं दधि मधुपर्कः ॥ १ यो वा मधुसंसृष्टम
भावे उदकमिति ॥ २ दधिपयसोरभावे उदकेन उदकमित्यर्थः ॥ दानखंडे ॥ द भट्टी.
१७० ध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः ॥ घृतं प्रतिनिधिं कुर्यात्सयो वा द
धिवान् १ ॥ कांस्ये निहितं दधि मधु घृतं वा मधुपर्कः ॥ अत्र भगवान् ॥
तत्रादौ चासनं दद्यात्कार्यं दर्भैश्च मिश्रितं ॥ चरायविष्टर इति त्रिरुच्या
र्यचरौ न थेति ॥ अत्र प्रयोगः ॥ आचम्य तिथ्यादि संकीर्त्य कन्यार्थमा
गताय वराय स्नातकाय विपरिच्छिताय कन्यादाननिमित्तेन मधुपर्केण पूज
नमहं करिष्ये ॥ इति संकल्प्य विष्टरादीनुपकल्पयेत् ॥ द्वितीयाविवाहेतु
स्नातकायेति पदं नोच्चरेत् ॥ प्रयोगः ॥ विष्टरो विष्टरो विष्टरः ॥ प्रतिगृह्य
तामिति मधुपर्कदाता ॥ प्रतिगृह्णामीति वरः ॥ अहं वर्ष्मे सस्य वामदे १७०
वो विष्टरोनुष्टुप् ॥ विष्टरोपवेशने वि० ॥ अनेन वरो उदगग्रे विष्टरे उपवे
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

